उद्भट-सागरः

...मार श्रीपूर्णचन्द्र कविभूषण काव्यरत्न, वि·ए

सङ्कलितः

উদ্ভটসাগর শ্রীপূর্ণচন্দ্র কবিভূষণ কাব্যরত্ন বি. এ প্রণীত, সংগৃহীত, অনূদিত বা সম্পাদিত পুস্তকাবলী :—

১। উদ্ভট-সাগরঃ (প্রথম-দ্বিতীয়-তৃতীয়-প্রবাহ-সমন্বিতঃ)। এই গ্রন্থ খানি বর্ত্তমান বৎসর হইতে সংস্কৃত প্রথম, দ্বিতীয় ও উপাধি ত্রিবিধ পরীক্ষায় কাব্য ও ব্যাকরণে পাঠ্য হইয়াছে। আগামী ... ক্ষায় ইহা হইতে প্রশ্ন থাকিবে। প্রথম-প্রবাহ প্রথম-পরীক্ষার জ... দ্বিতীয়-প্রবাহ দ্বিতীয় পরীক্ষার জন্য এবং তৃতীয়-প্রবাহ উপাধি-প... ক্ষার জন্য নির্ব্বাচিত। তিনটী প্রবাহই একত্র বদ্ধ। মূল্য কাগ... বাঁধা ২৲ (দুই টাকা); কাপড়ে সোণার জলে বাঁধা ২।০ (দু... টাকা চারি আনা)।

২। উদ্ভট-শ্লোক-মালা (বিক্রমাদিত্যের সভাস্থ নবরত্নের এবং অন্যান্য কবিগণের উদ্ভট শ্লোক)। (প্রাঞ্জল ও সুললিত বাঙ্গালা-পদ্যানুবাদ সহিত)। মূল্য কাগজে বাঁধা ১।০ ;

৩। পাণ্ডব-গীতা (প্রাঞ্জল ও সুললিত বাঙ্গালা-পদ্যানুবাদ সহিত)। মূল্য

...-কৃত); প্রশ্নোত্তর-মালা (জৈন ...লিকা (কৃষ্ণানন্দ সরস্বতী-কৃত)। ...পদ্যানুবাদ সহিত)। মূল্য ।৵০

...ত নানা দেব-দেবীর সংস্কৃত স্তব ...শ্লোকের সুললিত বাঙ্গালা পদ্যানু-...দেড় টাকা)।

...দাস চট্টোপাধ্যায়।
...ওয়ালিস ষ্ট্রীট, কলিকাতা।

उद्भट-सागरः

प्रथम-द्वितीय-तृतीय-प्रवाह-समन्वितः

उद्भटसागर श्रीपूर्णचन्द्र कविभूषण काव्यरत्न वि.ए

सङ्कलितः

कलिकाता-कर्णवोयालिस् ष्ट्रीटस्थ

२०१-संख्यकभवनात्

श्रीयुक्त गुरुदास चट्टोपाध्याय महाशयेन

प्रकाशितः।

१८२९ शकाब्दाः।

Printed by Radhashyam Das
VICTORIA PRESS.
2. Goabagan Street, Calcutta.

उत्सर्ग-पत्रम् ।

वङ्गसन्तानानुरागरञ्जितहृत्पटाय
संस्कृतभाषारविन्दमधुमत्तमधुपाय

सरस्वती-शास्त्रवाचस्पति-सम्बुद्धागमचक्रवर्त्ति-विद्यार्णवोपाधिकाय
सि-एस्-आइ, एम्-ए, डि-एल्, डि एस्-सि, पि-एच् डि,
एफ्-आर्-ए-एस्, एफ्-आर्-एस्-इ, एफ्-ए-एस्-वि-
उपनामकाय माननीयधर्म्माधिकरणनायकाय
आचार्य्यवर्य्याय परमपूज्यपादाय
श्रीयुक्ताय

स्यार् आशुतोष मुखोपाध्याय नाइट्

महोदयाय उत्सृष्टोऽयं ग्रन्थः

(१)

आधिव्याधिविनाशकर्म्मनिपुणो गङ्गाप्रसादः पिता
वात्सल्यादिमहागुणैकवसतिर्माता जगत्तारिणी ।
पापध्वंसकरञ्च पुण्यजनकं वासो भवानीपुरं
सार्थं नाम सुराशुतोष तव च त्वत्तो महान् नापरः ॥

(२)

दीनानामाधिशान्त्यै वितरति सुफलं यः सदा प्रार्थनीयं
यस्य च्छायाऽनुकम्पा बहुलसुमनसामाश्रयः सन्ततं यः ।
संविस्तीर्थ्यास्ति नित्यं य इह सुखकरीः कीर्त्तिशाखाप्रशाखा-
स्तप्तानां तापनाशी स जयति नितरामाशुतोषाख्यवृक्षः ॥

(३)

नो मालिन्यं कदाचिद् भजति हि दिवसे ग्रस्यते केनचिद् वा
नो मेघैश्छाद्यते वा नयनसुखहरैर्दूष्यते वा कलङ्कैः ।
नो क्षुद्रां क्षीयते वा क्वचिदपि समये पीड्यते पीड़या वा
धन्यो देवाशुतोष प्रभवति भुवि ते निर्म्मलः कीर्त्तिचन्द्रः ॥

(४)

अन्तःश्वेतां बहिःश्यामामाशुतोषसरस्वतीम् ।
दण्डिनाऽजानता प्रोक्ता 'सर्व्वशुक्ला सरस्वती' ॥

(५)

इन्द्रस्येव शची स्मरस्य च रतिः कात्यायनी शूलिनः
स्वाहाऽग्नेरिव केशवस्य कमला च्छायेव सूर्य्यस्य च ।
शीतांशोरिव रोहिणी च मतिमन् देवाशुतोष प्रभो
विद्या ते महती सदा फलवती त्वय्येव रंरम्यते ॥

(६)

स्वर्गः कल्पमहीरुहामिव सरः पङ्केरुहाणामिव
रत्नानामिव रत्नसानुशिखरी खं तारकाणामिव ।
पाथोधिः पयसामिव प्रभवति श्लाघ्यैः सुधीसङ्गतैः
सौजन्यादिगुणैर्भवान् मतिमतामेकाश्रयो भूतले ॥

(७)

दोषे कर्कशता गुणे प्रणयिता पापे परं भीरुता
सत्ये निर्भयता बुधे विनयिता वित्ते परित्यागिता ।
साधौ सादरता खले विमुखता शास्त्रेषु मर्म्मज्ञता
शक्तौ सच्चमता स्थिता च सततं देवाशुतोष त्वयि ॥

(८)

भूदेवेशाशुतोषास्यराकातारकनायकः ।
विद्वन्नेत्रचकोराणां सदास्ति सुखदायकः ॥

(९)

दारिद्र्यं दुर्बलं दुःस्थं पुनस्तस्यैव पीड़नम् ।
आशुतोष स ते दोषः क्लीवे योज्यं न पौरुषम् ॥

(१०)

मित्राणां प्रियवर्द्धनो भव सदा नैदाघनीरं यथा
शत्रूणां भयवर्द्धनो भव भृशं नैदाघरौद्रं यथा ।
प्रत्यूहः क्षयमेतु नित्यमिह ते नैदाघरात्रिर्यथा
जीवस्ते च विवर्द्धतां प्रतिदिनं नैदाघघस्रो यथा ॥

(११)

अव्यायामाः सुरभिसमये कामसक्ता निदाघे
रक्ता वर्षास्वभिनवजले पङ्किले पल्वलानाम् ।
कटूष्णोष्णे शरदि निरताः स्वापशीला हिमर्त्तौ
शीते रात्रिभ्रमणनिपुणास्तेऽरयः सन्तु सर्व्वे ॥

(१२)

तृष्णार्त्तोऽलिः कुसुमजरसं चातको वारिवाहं
तारानाथं स्मरति च यथा शुष्ककण्ठश्चकोरः ।
भ्रान्तो वत्सश्च निजजननीं दुःस्थसाहित्यसेवी
श्रीमन्तं त्वां स्मरति सततं पूर्णचन्द्रस्तथैव ॥

(१३)

चन्द्रार्द्धशोभितललाट सुराशुतोष
किं ते वदामि सुगुणान् गुणसागरस्य ।

त्वन्नामकीर्त्तिपरिकीर्त्तनयत्न एष
पादान्तरेणमभिवाञ्छति पूर्णचन्द्रः ॥

(१४)

इष्टं शिवास्यगुणितं निधिना समेतं
कृष्णावतारनिहतं वियदिन्द्रियेण ।
यच्छेषितं शरकरेण हृतं तदब्दं
वङ्गेषु शिष्यवदनेषु तवाऽस्तु नाम ॥

(१५)

अस्मिन्नुङ्गटसागरे नहि जड़े कश्चिद् गुणो विद्यते
येन भ्रान्ततटान्तविश्रमवतां तृष्णानिवृत्तिर्भवेत् ।
तस्मात् स्वादुतमं पवित्रममलं पीयूषपूरोपमं
गङ्गासङ्गिसरस्वतीरसमहं संप्रार्थये साम्प्रतम् ॥

(१६)

अस्त्यस्मिन्नवतारणा रसनिधौ नानारसानां जनाः
क्षारत्वान्न पिबन्ति सागररसं देवाशुतोष प्रभो ।
क्षारश्चेत् तव वामनेत्रपतनं प्राप्नोति दैवात् तदा
स्वाकारं परिहाय देवकृपया क्षीरं भवेत् तत् पुनः ॥

(१७)

यस्य श्रीः सदने गिरा च वदने चित्ते च चिन्तामणि-
र्यः स्थैर्य्ये तुहिनालयो निरुपमे धैर्य्ये च सर्व्वसहा ।
यो वङ्गेषु मतः सदा सुरगुरुर्विद्यार्थिनां गाहतां
तं तुच्छोङ्गटसागरोऽयमतलस्पर्शं हि विद्यार्णवम् ॥

तदीयश्रीचरणाश्रितेन

श्रीपूर्णचन्द्रेण

मङ्गलाचरणम् ।

(१)

यो निर्म्माति बिभर्त्ति संहरति च ब्रह्मादिमूर्त्त्या जगद्
वह्निव्योमवसुन्धराम्बुपवना यस्याऽपरा मूर्त्तयः ।
यो बाह्यान्तरसर्व्वदिक्षु विहरन्नेकोऽखिलं वीक्षते
यः सर्व्वाश्रयभूरचिन्त्यमहिमा देवाय तस्मै नमः ॥

(२)

पृथ्वीपातकिपापपर्व्वतपवी पापाब्धिपारप्लवौ
पापप्रान्तरपांशुपक्षपथिकप्राणप्रदौ पादपौ ।
पापप्राज्यपयोदपालिपवनौ पापेभपञ्चाननौ
पादौ पाशुपतौ प्रपश्य परमौ प्राक् पूर्णचन्द्र प्रगे ॥

(३)

जय जय हे शिव दर्पकदाहक दैत्यविघातक भूतपते
दशमुखनाशकशायकदायक कालभयानक भक्तगते ।
त्रिभुवनकारकधारकमारक संसृतिसारक घोरमते
हरिगुणगायक ताण्डवनायक मोक्षविधायक योगरते ॥

(४)

दीर्घाक्षी दीप्रदन्ता दनुजदलदला देवतादुःखदात्री
दिव्यास्त्रै र्दिव्यकान्ति र्दरदवदमना दीप्तदेहा दुकूलैः ।
दृप्तानां दर्पदात्रैर् दशदिशि दशकं दृप्तदोषां दधाना
देवी दुर्गा दुरन्तं दलयतु दुरितं दुर्गतिद्रावदक्षा ॥

(५)

यस्याः शिल्पमनल्पकं त्रिभुवनं काव्यञ्च वेदत्रयं
यन्नाथस्त्रिपुरान्तकस्त्रिपथगा यस्याः सपत्नी मता ।
या कालत्रयमीक्षितुं सुविपुलं धत्ते च नेत्रत्रयं
सा त्रैगुण्ययुता करोतु कमलं देवी त्रिशूलायुधा ॥

(६)

सजलजलदकालं प्रेमवापीमरालम्
अभिनववनमालं क्षेमवल्लीप्रवालम् ।
भुवननलिननालं दानवानां करालं
निखिलमनुजपालं नौमि तं नन्दबालम् ॥

(७)

पुलिनवनविहारिन् बल्लवीचित्तहारिन्
दनुजदलनकारिन् योगिहृत्पद्मचारिन् ।
भवजलनिधितारिन् पीतकौशेयधारिन्
शमनदरविदारिन् पाहि मां विश्वभारिन् ॥

(८)

पण्डितान्नमरण्येऽपि मूर्खान्न नास्ति कुत्रचित् ।
इति मूर्खे परा प्रीतिर्यस्यास्तां श्रियमाश्रये ॥

(९)

हरिप्रियां भजे मत्तो दीनस्य न हलिप्रियाम् ।
न भुक्त्वापि नरः पूर्व्वां मत्तो भुक्त्वैव चापराम् ॥

(१०)

यो लङ्केशगुरुः कुमारजनको योऽसौ गवीशध्वजो
यो गङ्गां धरति स्वयं हिमकरोद्दीप्ताङ्गकान्तिः सदा ।
यो नित्यं खलु भूविशेषसदनो वामाङ्गसङ्गस्तथा
भक्त्योमाधवमादिहीनमनिशं तं श्रेयसे संश्रये ॥

भगवच्चरणाश्रितस्य

श्रीपूर्णचन्द्रस्य ।

अवतरणिका ।

इह खलु भारतभूमौ प्राचीनकालादारभ्य संस्कृतभाषारविन्दमधुमत्तमधुपा बहवः पण्डिताः प्रादुरासन् । तेषु कालिदास-भारवि-भवभूति-माघ-श्रीहर्ष-बाणभट्ट-प्रभृतीनां प्रथितप्रचुरयशसां कवीनां मानससरोवरसमुद्भूतानि विविधरसभावमयमकरन्दपरागपूर्णानि कविताकनककमलानि सुविकाशमासाद्य पृथिव्यां सर्व्वेषां सचेतसां यथा चित्तमाकर्षन्ति, तथा निखिलसंसारनिगूढ़तत्त्वविदस्ते तद्वदन्ये च कविकुलतिलकाः प्रसङ्गपरवशतया तत्कालोचितवक्तव्यवर्णनमुखेन यानि पद्यानि रचयामासुस्तान्युद्भटकवितेति नाम्ना सहृदयहृदयाधिष्ठानपरम्परया महार्घरत्नवदद्यापि लोके सादरं विराजन्ते। इयञ्च कविता भारतस्य क्वचित्प्रदेशे सुवचनमिति क्वचित्प्रदेशे सुभाषितमिति क्वचिच्च सूक्तमित्याख्यायते। का खलु तावदुद्भटकविता ? कया रीत्या वा तस्या अन्वर्थता नामधेयस्येति निरूपयितुमीहमानैरस्माभिरिह मतद्वैधं दृश्यते। तत्र केचिदाहुः ग्रन्थविशेषसन्निवेशरहिता सामयिकनिमित्तवशान्महाजनरचिता चित्तचमत्कारिणी संस्कृतकवितैवोद्भटकवितेति, "उद्भट" शब्दस्य महाशयार्थवाचकत्वात् प्रकृष्टार्थवाचकत्वाच्च। तदुक्तमभिधानचिन्तामणौ

"भट्टिच्छे तूद्भटोदारोदात्तोदीर्णमहाशयाः ।
महामना महात्मा च ॥"

उत्पलमालायाञ्च—

"उद्भटः कच्छपे सूर्ये प्रकृष्टे तु विलिङ्गकः ।"

अन्ये त्वेवं ब्रुवन्ति यत् कश्मीरदेशे उद्भटनामा कश्चित् कविराविरासीत् । स च उद्भटभट्टः, भट्टोद्भटः, उद्भटाचार्य्येति तिसृभिराख्याभिरभिहितो बभूव । कह्लणकविविरचितराजतरङ्गिणीनामकश्मीरदेशजवृत्तान्तपुरावृत्तपाठादेवमवगम्यते यत् कश्मीरदेशे कदाचित् जयापीड़ो नाम कश्चिन्नरपतिः एकोनाशीत्युत्तरसप्तशतीमित (७७९) खृष्टीयाब्दादारभ्य त्रयोदशाधिकाष्टशतसंख्यक (८१३) खृष्टाब्दं यावत् चतुस्त्रिंशद् (३४) वत्सरान् कश्मीरराजासनमलञ्चकार। स चात्मनः कवित्वशक्तिमत्तया बहून्

सुकविपण्डितान् सबहुमानमानाय्य स्वस्य सदसि समतिष्ठिपत्। तेषु च भट्टोद्भटः, दामोदरगुप्तः, मनोरथः, शङ्खदत्तः, चटकः, सन्धिमान्, वामनः, चौरश्चेतेऽष्टौ महाकवयः प्रधानपदवीमध्यरुक्षन्। तत्राप्युद्भटकविरेव प्रधानमासीत्। स च स्वरचिताभिरुच्चावचमधुरकविताभिर्जयापीड़महाराजं सुपरितोष्य तत्सकाशात् प्रतिदिनं लक्षं दीनारानलभत। एतेनैव महाकवेरुद्भटस्य महत्याः कवित्वशक्तेः कीदृक् चित्तचमत्कारित्वं तदनुमानञ्च सर्व्वैः सुगममेव। भूपतेर्जयापीड़स्य च निरतिशयकवित्वप्रियतया तस्य सभा बहुसुपण्डितसनाथा शुशुभे। इदमेवाभिप्रेत्य कह्लणकवेः सूक्तमेतत्—

"समग्रहीत् तथा राजा सोऽन्विष्य निखिलान् बुधान्।
विद्वद्दुर्भिक्षमभवद् यथाऽन्यनृपमण्डले॥"

राजतरङ्गिणी ४।४९२

जयापीड़स्य राज्ञः कवेरुद्भटस्य चेतिवृत्तं प्रमाणीकर्त्तुं राजतरङ्गिण्याः कश्चिदंश उद्ध्रियते। यथा—

"वचो मूर्खोऽयमित्येव कश्चैचिद् वदते स्फुटम्।
सर्व्वज्ञानं ददच्चक्रे सर्व्वान् विद्याभियोगिनः॥
देशान्तरादागमय्य व्याचक्षाणः क्षमापतिः।
प्रावर्त्तयत विच्छिन्नं महाभाष्यं भूमण्डले॥
क्षीराभिधाच्छब्दविद्योपाध्यायात् संभृतश्रुतः।
बुधैः सह ययौ वृद्धिं स जयापीड़पण्डितः॥
भूपतेरात्मना स्पर्द्धां चक्रमे न स कस्यचित्।
आत्मनस्तु बुधैः स्पर्द्धां शुद्धधीर्बह्वमन्यत॥
तावत् पण्डितशब्देऽभूद् राजशब्दादपि प्रथा।
तैस्तैर्दोषैर्न तु ग्लानिं कालान्तरवदाययौ॥
नृपतौ विद्वदायत्ते राजसांमुख्यकाङ्क्षिभिः।
गृहा बभूवुर्विदुषां व्याप्ताः सेवागतैर्नृपैः॥
अध्यक्षो भक्तशालायां शुक्रदन्तस्य मन्त्रिणः।
विद्वत्तया थक्कियाख्यस्तेन सीकृत्य वर्द्धितः॥

विद्वान् दीनारलक्षेण प्रत्यहं कृतवेतनः।
भट्टोऽभूदुद्भटस्तस्य भूमिभर्त्तुः सभापतिः॥
स दामोदरगुप्ताख्यं कुट्टनीमतकारिणम्।
कविं कविं बलिरिव धुर्य्यं धीसचिवं व्यधात्॥
मनोरथः शङ्खदत्तश्चटकः सन्धिमांस्तथा।
बभूवुः कवयस्तस्य वामनाद्याश्च मन्त्रिणः॥"

राजतरङ्गिणी ४।४८७-४९७

"अवस्थावेदकास्तत्र ग्रथिताः पृथिवीभुजा।
आर्द्रान्तःकरणैः श्लोकाः स्मर्य्यन्तेऽद्यापि सूरिभिः" ॥

राजतरङ्गिणी ४।५५०

उद्भटभट्टो हि कुमारसम्भव-काव्यालङ्कारसंग्रह-भामहालङ्कारविवरणानीति ग्रन्थत्रयमरचयत्। प्रतीहारेन्दुराजो नाम कश्चित् काव्यालङ्कारसंग्रहस्य लघुवृत्तिनाम्नीं टीकां प्रणीय तत्रैवोद्भटभट्टस्य तत्तद्ग्रन्थत्रयप्रणयनवार्त्तां निरदिशद्। वुलार्-साहेव-महोदयेन च कश्मीरदेशे काव्यालङ्कारसंग्रहमेकमासाद्य कश्मीररिपोर्टनामकपत्रस्य ६५-संख्यकपृष्ठे एवमुक्तं यद् "उद्भटभट्टः किल जयापीड़स्य राज्ञः सकाशात् प्रतिदिनं लक्षसंख्यकान् दीनारान् लभते स्म। स च कविर्न कञ्चिद् वृहद्ग्रन्थं प्रणिनाय। तस्य स्वप्रणीते काव्यालङ्कारसंग्रहनामकेऽलङ्कारग्रन्थे यान्युदाहरणानि सन्ति तानि स्वरचितकुमारसम्भवादेवाजहार।

पिटार्-पिटारसन्-साहेवोऽपि वक्ष्यमाणपद्यचतुष्टयमुद्भटकविकृतमिति प्रतिपादयामास। तद् यथा—

(१)

"छिन्नं स्वेन समुद्भटेन सरसं स्वीयं मनो जायते
श्रुत्वाऽन्यस्य समुद्भटं खलु मनः श्रोतुं पुनर्वाञ्छति।
अज्ञान् ज्ञानवतोऽपि येन वशगान् कर्त्तुं समर्थः सुधीः
कार्य्यस्तस्य समुद्भटस्य मनुजैरावश्यकः संग्रहः॥"

(२)

"अयं बन्धुः परो वेति गणना लघुचेतसाम्।
पुंसामुदारचित्तानां वसुधैव कुटुम्बकम्॥"

(३)

"किं कौमुदीः शशिकलाः सकला विचूर्ण्य
संयोज्य चामृतरसेन पुनः प्रयत्नात्।
कामस्य घोरहरहुङ्कृतिदग्धमूर्त्तेः
सञ्जीवनौषधिरियं विहिता विधात्रा॥"

(४)

"किमिह बहुभिरुक्तैर्युक्तिशून्यैः प्रलापै-
र्द्वयमिह पुरुषाणां सर्व्वदा सेवनीयम्।
अभिनवमदलेखालालसं सुन्दरीणां
स्तनभरपरिखिन्नं यौवनं वा वनं वा॥"

यदाहं बाल्ये वयसि वर्त्तमान उत्तरपाड़ास्थ-राजकीय-इंराजीविद्यालयप्रविष्टोऽव-सरक्रमेण परमपूज्यपादस्य मदीयगुरोः स्वर्गीयकालीकुमारकाव्यचणमहोदयस्य चतु-ष्पाठीमाश्रित्य काव्यव्याकरणान्यधीयानः कालमनयं, तदा प्रायशो गुरुमुखाद् बह्वीरुद्भट-कविता अशृणवम्, ताश्च साग्रहमलिखम्। अथोच्चविद्यालयप्रवेशमासाद्य सौभाग्यवशाद-खिलजनमाननीयस्य महात्मनः स्वर्गीयस्य ईश्वरचन्द्रविद्यासागरस्य भूदेवमुखोपाध्यायस्य च स्नेहास्पदीभूय तयोः सकाशात् प्रायेण पञ्चशतसंख्यकश्लोकान् समग्रहीषम्। तदनु स्वर्गीय-महाराज-बाहादुर-शतीन्द्रमोहनठाकुरस्य मातृश्राद्धावसरे नानादिग्देशादागतानां परमपूज्यपादानां ब्राह्मणपण्डितानां कृपया उद्भटश्लोकानां त्रिसहस्री मया समाहृता। एवंक्रमेण भारतस्य नानास्थानेभ्यो बहुतरप्राचीनपुस्तकेभ्यश्च श्लोकसंग्रहेण साम्प्रतं मद-न्तिके द्वाविंशतिसहस्राधिकलक्षोद्भटश्लोकाः सन्ति।

एषूद्भटश्लोकेषु रसभावभूयिष्ठा बहवो मधुरश्लोका बङ्गभाषात्मकपद्यानुवादैः सह हितवादि-एडुकेशनगेजेट-प्रभृतिषु संवादपत्रेषु प्रकाशिताः सौष्ठवातिशयेन सर्व्वेषां सचेतसां हृदयान्यानन्दयन्।

स्वदेशीया वैदेशिकाश्च वहवो गुणग्राहिणः पण्डिता मन्मुखनिःसृतमुद्भटश्लोकमाकर्ण्य परमानन्दमलभन्त। भिनिस्-टनि-थिव-पिटार्सन्-प्रभृतयः कतिपये संस्कृतभाषानुरागिणः साहेव-महोदयाः संस्कृतोद्भटश्लोकान् समाकर्ण्य संस्कृतभाषाया माधुर्य्यम् उद्भटश्लोकरचयितॄणां कवीनाञ्च नैपुण्यं नितरां प्राशंसिषुः।

अस्मिन् ग्रन्थे श्लोकनिचयस्य पाठच्छन्दोव्याकरणशुद्धिनिमित्तं मया वहुलः प्रयासः कृतः। परन्तु केषाञ्चित् श्लोकानां तात्पर्य्यं किञ्चिदस्पष्टमस्ति। तदर्थसमन्वयस्तु पाठकवृन्दैः कृपया कार्य्य इत्यभ्यर्थये। अन्यच्च ईदृशा अपि विधाः श्लोका अत्र तिष्ठेयुः ये च ग्रन्थान्तरविशेषेऽपि सन्निविष्टाः सन्ति। तज्जनितो ममापराधः सदयैः सहृदयपाठकैः क्षन्तव्य इत्यपि प्रार्थये। वहुजनमुखत आकर्ण्य संगृहीतेऽस्मिन् श्लोकसमूहे यदि कुत्रचित् कश्चिद्‌ भ्रमः प्रमादो वा स्यात् तन्न विचित्रम्। तदर्थं पाठकवृन्दं सविनयं निवेदयामि यदि तत्तद्वैगुण्यं कृपया मां विज्ञापयेत्, तदा मे परमोपकारो भवेत्, तदर्थञ्चाहं तेषां चरणतले कृतज्ञः स्थास्यामि, कर्त्तव्यञ्चैतन्महद्भिः। तथाचोक्तं

"गच्छतः पतने भूमौ प्रमादान्नहि विस्मयः।
हसन्ति दुर्ज्जनास्तत्रोत्तोलयन्ति तु सज्जनाः॥"

प्रतिप्रवाहं शेषभागे एकैकं शुद्धिपत्रं दत्तम्। पाठकमहोदयैः कृपया तदनुसृत्य दुष्टश्लोकानां दोषांशं परिहृत्य पठनीयाः श्लोका इत्येषा मे प्रार्थना।

वहुभाषावित् पण्डितप्रवरो मदीयपरमसुहृत् स्वर्गीयो हरिनाथ दे एम्-ए महोदयः मन्मुखाद्‌ उद्भटकवितां श्रोतुं विश्वविद्यालयस्य सहकारि-रेजिष्ट्रार-पदाभिषिक्तं श्रीयुक्त गिरिशचन्द्र मुखोपाध्याय एम्-ए महानुभवमनुरुद्धवान्। अहमपि तदर्थं "इम्पिरियाल लाइब्रेरी"नामकपुस्तकालयं गत्वा तावुभावुद्भटकवितामश्रावयम्। तौ च तामाकर्ण्य परां प्रीतिमलभेताम्। स च हरिनाथस्तदानीमेवमुक्तो मया, यत् वहुभाषाभिज्ञः पण्डितो भवान् यदि मां यत्र कुत्रचिद्‌ भाषायां यं कमपि रसभावमयं श्लोकं ब्रूयात्, तदा ततोऽप्यधिकप्रकर्षवत्तया चित्तचमत्कारिणं संस्कृतश्लोकं भवन्तमहं श्रावयितुं शक्नोमीति मनेय। अथैतदाकर्ण्य सोऽपि ल्याटिन्-ग्रीक-फ्रेञ्च-जर्म्मान्-इंराजी-आरव्य-पारसीकाद्यनेकभाषाणां विविधविषयभेदभिन्नान् भावान् मामब्रवीत्; अहञ्च तत्तद्भावमयमधुरोद्भटश्लोकान् श्रावयित्वा तं नितरामप्रीणयम्। तदानीं तया प्रीणितेन

तेनोक्तम् "अस्मद्देशीयब्राह्मणपण्डिता यथा सकौशलं मधुरभावसन्निवेशनेन संस्कृतोद्भट-श्लोकान् रचयामासुस्तथा रीत्या श्लोकान् रचयितुं संस्कृतभाषाविदन्य: कोऽपि पार्थिव-कविर्न शशाक। इयञ्च दैवी भाषा सगुणालङ्कारा सती यथा रसभावादिकं पुष्णाति, काप्यन्या मानवी भाषा न तथेति"।

यदाहं जयपुरप्रदेशमगमं तदा परमपूजनीयस्य पण्डितप्रवरस्य महामहोपाध्याय श्रीयुक्त हरप्रसाद शास्त्रि एम-ए, सि-आइ-इ महोदयस्य कनिष्ठसहोदरेण प्रत्नतत्त्ववित्-पण्डितेन स्वर्गीय मेघनाद भट्टाचार्य्य वि-ए महानुभवेन सह मम सप्रेमपरिचय: सञ्जात:। स च मां जयपुरमहाराजस्य पुस्तकागारं नीत्वा बहूनामुद्भटकवितानां प्राचीनपुस्तकान्यदर्शयत्। ममाभिमतोद्भटसागरे पाठान-मोगल-नवाव-प्रभृतीनां वर्णन-सनाथा ये श्लोका: सन्ति, तान् सर्व्वान् स एव मे प्रादात्। साम्प्रतं स महात्मा यद्यजीविष्यत् तदा मे महोपकारोऽभविष्यत्। मनेत्र ममैव दुरदृष्टतया स इदानीं दिवं गत:।

अथैकदा माननीयो धर्म्माधिकरणिकवर: प्रात:स्मरणीयो संस्कृतभाषाविशारद: संस्कृतोद्भटकवितासु परानुरक्तिमान् स्यार् श्रीयुक्त गुरुदास वन्द्योपाध्याय केटि, एम्-ए, डि-एल्, पि-एच् डि महोदयो मत्तो बहुरुद्भटकविता निशम्य तासां प्रशस्ति-प्रसङ्गेन मामवदत्—"एकैका उद्भटकविता एकैकमनर्घरत्नम्। ईदृश्य: प्राज्या: कविता-स्त्वय्येव सन्तीति रत्नाकरोऽसीति"। अथ तस्यैव महात्मन: कतिपयैस्तावकूटविषयकै: श्लोकै: प्रयोजनमासीदिति तद्विषया वङ्गानुवादसनाथा: कतिपये श्लोका मया तदन्तिकं प्रेषिता:। स चैतान् इंराजीभाषयानूद्य माननीयं सुपण्डितं लायनाभिधं राजपुरुषं श्रावयित्वा परमप्रीणयत्। तत: स मामवोचत्—"भद्र! एतान्यनर्घाणि भारत-रत्नानि साधारणसमक्षमुपस्थाप्य विधीयतां परोपकृतिर्देशस्य। आवेदयन्तां राजपुरुषा भवतोऽभिमतम्। अहमपि साहायकं ते करिष्यामि। लायन्-साहेबोऽपि भवत्प्रदत्तान् उद्भटश्लोकानाकर्ण्य परां तुष्टिमुपागमत्।"

कलिकाताराजकीयसंस्कृतविद्यामन्दिराध्यक्षो मदीयपरमहितैषी महात्मा पण्डित-प्रवरो महामहोपाध्यायो डक्टार् श्रीयुक्त सतीशचन्द्र विद्याभूषण एम्-ए, पि-एच् डि, एफ्-ए-एस्-वि महोदयो मत्सकाशात् श्रुतोद्भटश्लोक: परां प्रीतिमुपागतस्तेषां श्लोकानां मुद्रणाय च मां प्रोत्साहितवान्।

हितवादि-पत्रिकायां ममोद्भटश्लोकानां मुद्रणकाले अहमेकदा भ्रमणार्थं कटक-प्रदेशमगमम्। तत्रत्यस्य प्रधानस्य व्यवहाराजीवस्य श्रीयुक्तस्य जानकीनाथ वसु एम्-ए, बि-एल् महोदयस्य साहाय्येन परमविद्यानुरागिणा स्वर्गीयेन मयूरभञ्जाधिपतिना महाराज बाहादुर श्रीश्रीरामचन्द्र भञ्ज देव महोदयेन सह संहतो मे संस्तवः। असौ महात्मा मत्त उद्भटश्लोकान् शुश्रूषुरिति विज्ञाय तमहं कतिपयान् श्लोकानश्रावयम्। स च नितरां प्रीतो मुद्रासहस्रं मे प्रत्यग्रहीत्। परं ममाधन्यतया सोऽचिरादेव पञ्चत्वमुपागतः।

कलिकाता-पाथुरियाघाटा-वास्तव्यो महाराजः स्वर्गीयो महानुभावो यतीन्द्रमोहन-ठाकुरः संस्कृतभाषायां सुपण्डित उद्भटकवितायां परमानुरक्तश्चासीत्। हितवादि-पत्रिकायाम् एडुकेशनगेजेटे च यानुद्भटश्लोकानहं प्राकाशयं स सबहुमानं तानपठत् परां प्रीतिञ्चालभत। अथ मन्मुखाद् उद्भटकविताः श्रोतुं तदीयं सभापण्डितं नैयायिक-चूड़ामणिं मदीयपरमहितैषिणं सुहृदं परमपूज्यपादं श्रीयुक्त पार्व्वतीचरण तर्कतीर्थ महोदयमनुरुद्धवान्। ततोऽहं "एमारेल्ड् बाओयार" गत्वा तमुद्भटश्लोकान् श्रावितवान्। ततः प्रभृति स प्रतिसप्ताहमेव मन्मुखाद् उद्भटकविताः शृणोति स्म। अतिविरलो हि तत्-सदृशः सुरसिकः सुपण्डितश्च श्रोता। अहो मे दुर्दैवं यत् सोऽधुना दिवं गत इति।

उद्भटकविताकोविदो मनस्विवर्य्यः पण्डितप्रवरो महात्मा राय श्रीयुक्त राजेन्द्र-चन्द्र शास्त्रि बाहादुर एम्-ए, पि-आर्-एस् महोदयः कृपयाऽतीतपञ्चविंशतिवत्सरेषु बहूनि नवीनानुद्भटपद्यानि संगृह्य मह्यं समर्प्य च मम महोपकारमकार्षीत्। उद्भटकवितासु तस्य सहजः परमानुरागो वर्त्तते। तत एव यत्र कुत्रचिदुद्भटकवितार्थं याच्यमानोऽप्यसौ कदाचित् पराङ्मुखो नाभूत्। पण्डिताग्रगण्येन मदीयपरमहितैषिणा उद्भटकवितानुरागिणा कलिकाता-संस्कृत-विद्यामन्दिरस्य अध्यक्षचरेण महामहोपाध्याय श्रीयुक्त कालीप्रसन्न भट्टाचार्य्य विद्यारत्न एम्-ए महोदयेन तथा नवद्वीपपुण्यभूमिवास्तव्येन श्लेषालङ्कारसनाथश्लोकरचनासिद्धहस्तेन मदीयपरमभक्तिभाजनेन महामहोपाध्याय श्रीयुक्ता-जितनाथ न्यायरत्न महानुभवेन च ममैतदुद्भटसागरस्य पाण्डुलिपिः कृपया परिदृष्टा।

"हितवादि"-सम्पादकौ स्वर्गीयकालीप्रसन्नकाव्यविशारद-श्रीचन्द्रोदयविद्याविनोदौ, "वङ्गवासि"-स्वत्वाधिकारी स्वर्गीय योगेन्द्रनाथ वसुः, "वङ्गवासि"-सम्पादकः श्रीविहारि-लाल सरकारः, "एडुकेशन-गेजेट"-सम्पादकः श्रीमुकुन्ददेव मुखोपाध्याय राय

वाहादुर एम्-ए, वि-एल्, "वसुमती"-सम्पादकचर: श्रीजलधर सेन:,—एते उद्भट-कवितानुरागिण: सुपण्डिता: सहृदया महोदया: परमप्रीतिभरं सानुकम्पं स्वस्वसंवाद-पत्रेषु बहुदिनपर्य्यन्तं मद्दत्ता बहुला उद्भटकविता मुद्रितवन्त: ।

एते महामहोपाध्यायादयो महानुभवा: पण्डिता उद्भटसागरसङ्कलने साहायकं कुर्व्वन्त: मां नितरां प्रोत्साहितवन्त:—

काशीधामनिवासिन:—स्वर्गीय महामहोपाध्याय राखालदास न्यायरत्न:, स्वर्गीय महामहोपाध्याय कैलासचन्द्र शिरोमणि:, महामहोपाध्याय शिवकुमार शास्त्री, महामहोपाध्याय सुब्रह्मण्य शास्त्री, स्वर्गीय महामहोपाध्याय गङ्गाधर शास्त्री, स्वर्गीय महामहोपाध्याय दामोदर शास्त्री, स्वर्गीय महामहोपाध्याय गोविन्द शास्त्री, स्वर्गीय महामहोपाध्याय राम-मिश्र शास्त्री, स्वर्गीय महामहोपाध्याय सुधाकर द्विवेदी, महामहोपाध्याय विन्ध्येश्वरी-प्रसाद:, स्वर्गीय सुरेन्द्रनाथ तर्कतीर्थ:, श्रीवामाचरण न्यायवैशेषिकाचार्य्य:, कविराज श्रीउमाचरण कविरत्न:, स्वर्गीय हरकुमार शास्त्री, श्रीश्रीशङ्कर तर्करत्न:, श्रीप्रियनाथ तत्त्वरत्न:, श्रीदक्षिणाचरण विद्यानिधि:, श्रीहाराणचन्द्र विद्यारत्न: व्याकरणोपाध्याय:, श्रीहरिहर शास्त्री, श्रीविजयकृष्ण काव्यतीर्थ वेदान्तवागीश:, श्रीताराचरण काव्यतीर्थ साहित्योपाध्याय:, श्रीश्यामाकान्त काव्यतीर्थ:, स्वर्गीय हरनाथ विद्यारत्न: ।

मिथिलानिवासिनौ—स्वर्गीय विश्वनाथ ओझा:, स्वर्गीय दीननाथ मिश्र: ।

उत्कलनिवासिन:—महामहोपाध्याय श्रीसदाशिव मिश्र:, स्वर्गीय राय राधानाथ राय वाहादुर:, जानकीनाथ वसु एम्-ए, वि-एल् ।

वङ्गदेशनिवासिन:—(१) स्वर्गीय महामहोपाध्याय महेशचन्द्र न्यायरत्न:, स्वर्गीय महामहोपाध्याय चन्द्रकान्त तर्कालङ्कार:, स्वर्गीय महामहोपाध्याय कृष्णनाथ न्याय-पञ्चानन:, स्वर्गीय महामहोपाध्याय दीनबन्धु न्यायरत्न:, स्वर्गीय महामहोपाध्याय रामनाथ सिद्धान्तपञ्चानन:, स्वर्गीय महामहोपाध्याय श्रीरामशिरोमणि:, स्वर्गीय महा-महोपाध्याय यदुनाथ सार्व्वभौम:, स्वर्गीय महामहोपाध्याय राजकृष्ण तर्कपञ्चानन:, स्वर्गीय महामहोपाध्याय द्वारकानाथ सेन: । स्वर्गीय महामहोपाध्याय विजयरत्न सेन: ।

(२) महामहोपाध्याय श्रीहरप्रसाद शास्त्रि एम्-ए, सि-आइ-इ, महामहोपाध्याय श्रीकामाख्यानाथ तर्कवागीश:, महामहोपाध्याय श्रीशिवचन्द्र सार्व्वभौम:, महामहोपाध्याय

श्रीयादवेश्वर तर्करत्नः, महामहोपाध्याय श्रीप्रमथनाथ तर्कभूषणः, महामहोपाध्याय श्रीगुरुचरण तर्कदर्शनतीर्थः ।

(३) स्वर्गीय गिरिशचन्द्र विद्यारत्नः, स्वर्गीय नवीनचन्द्र विद्यारत्नः, स्वर्गीय हरिश्चन्द्र तर्करत्नः, स्वर्गीय गुरुनाथ काव्यतीर्थः, स्वर्गीय कृष्णकुमार विद्यारत्नः, स्वर्गीय तारकचन्द्र सांख्यसागरः, स्वर्गीय भगवतीचरण स्मृतितीर्थः, स्वर्गीय सूर्य्यकुमार भट्टाचार्य्यः, स्वर्गीय ताराप्रसन्न सेन कविराजः, स्वर्गीय रामचन्द्र विद्याविनोद कविराजः, स्वर्गीय नीलकान्त तर्कवागीशः, स्वर्गीय गुरुचरण विद्याभूषणः, स्वर्गीय कालीकुमार तर्कतीर्थः, स्वर्गीय दुर्गाचरण तर्करत्नः ।

(४) श्रीपार्व्वतीचरण तर्कतीर्थः, श्रीभुवनेश्वर विद्यालङ्कारः, श्रीकालीपद काव्य-तीर्थः, श्रीहरचन्द्र तर्कपञ्चाननः, श्रीहरिश्चन्द्र कविरत्नः, श्रीदुर्गाचरण सांख्यवेदान्त-तीर्थः, श्रीराजेन्द्रनाथ विद्याभूषणः, श्रीयामिनीनाथ तर्कवागीशः, श्रीदेवेशचन्द्र विद्या-रत्नः, श्रीहरिचरण काव्य-व्याकरणतीर्थः, श्रीधीरानन्द काव्यनिधिः, श्रीयज्ञेश्वर काव्यतीर्थः, श्रीगोविन्दचन्द्र विद्याभूषणः श्रीरसिकमोहन विद्याभूषणः, कविराज श्रीयामिनीभूषण राय कविरत्न एम्-ए, एम्-वि ।

(५) राय श्रीयतीन्द्रनाथ चौधुरी श्रीकण्ठ एम्-ए, वि-एल्, राय श्रीविनोद-विहारि वसु वि-ए, स्वर्गीय अमृतलाल मुखोपाध्याय एम्-ए, वि-एल्, स्वर्गीय आशुतोष विश्वास एम्-ए, वि-एल्, श्रीद्वारकानाथ चक्रवर्त्ति एम्-ए, वि-एल्, श्रीगिरिशचन्द्र मुखोपाध्याय एम्-ए, स्वर्गीय कालीप्रसन्न घोष विद्यासागरः, श्रीआनन्दचन्द्र रायः, स्वर्गीय इन्द्रनाथ वन्द्योपाध्याय एम्-ए, वि-एल्, श्रीअक्षयचन्द्र सरकार वि-एल्, स्वर्गीय रजनीकान्त सेन वि-एल् ।

(६) मयमनसिंहजेलान्तर्गतसुसङ्गदुर्गापुराधिपतिः महाराज वाहादुर स्वर्गीय कुमुदचन्द्र सिंह वि-ए, मुक्तागाछा-वास्तव्या स्वर्गीया राज्ञी विद्यामयी देवी, राजा श्रीजगत्किशोर आचार्य्य चौधुरी, कुमार श्रीजितेन्द्रकिशोर आचार्य्य चौधुरी, महाराज वाहादुर स्वर्गीय सूर्य्यकान्त आचार्य्य चौधुरी ।

परिशेषे ममैतद्विशेषवक्तव्यं यत् कलिकाता-संस्कृतविद्यालयाध्यापकचरः प्रातः-स्मरणीयः परमपूज्यपादो नवद्वीपनिवासी पण्डितप्रवरो महात्मा श्रीयुक्त शिवनारायण

शिरोमणिस्तथा सुपण्डितमदीयपुत्रः कलिकाता-संस्कृतविद्यालये वर्त्तमानाध्यापको मदीयकनिष्ठसहोदरप्रतिमः श्रीयुक्त मन्मथनाथ विद्यारत्न महोदयः, हावड़ाजिलान्तर्गत-वाजेशिवपुर-वास्तव्यः पण्डितकुलतिलकः परमपूजनीयो महात्मा श्रीयुक्त श्यामाचरण कविरत्न महानुभवश्च ग्रन्थस्यास्य सङ्कलनकार्य्ये निःस्वार्थतया परमप्रीतिमत्तया च मम यथेष्टमानुकूल्यमकुर्व्वन्। अतो मया प्रागुक्तानां सर्व्वेषां महात्मनामन्तिके यावज्जीवं कृतज्ञेन भवितव्यमिति।

नानाशास्त्रसागरपारगस्य प्रातःस्मरणीयस्य परमपूज्यपादस्य सहृदयस्य श्रीयुतस्य स्यार् आशुतोष मुखोपाध्याय केटि, सरस्वती-शास्त्रवाचस्पति-सम्बुद्धागमचक्रवर्त्ति-विद्यार्णवमहोदयस्य संस्कृतभाषायां निरतिशयानुरक्तिमत्तया भारतभूमेर्लुप्तप्रायोद्भटकवितारत्नानां समुद्धरणार्थे सातिशययत्नवत्तया च तस्यैव महापुरुषस्य परमपवित्रे श्रीकरकमले उद्भटसागराख्योऽयं ग्रन्थः सभक्तिविनयं समर्प्यते

भद्रकाली।
२४ श्रावणः, जन्माष्टमी, १३२४
वङ्गाब्दाः। ९ आगष्टः, बृहस्पतिवारः,
१९१७ खृष्टीयाब्दाः।

तदीयश्रीचरणाश्रितेन कृतज्ञेन
उद्भटसागरोपाधिकेन
श्रीपूर्णचन्द्रेण।

उद्भट-सागरः ।

प्रथम-प्रवाहः ।

विषय-सूची ।

विषयः पत्राङ्कः

उद्भट-सागरः ।

प्रथम-प्रवाहः ।

श्लोक-सूची ।

(अ)

श्लोकाद्यांश:	श्लोकाङ्क:
गृही चेत् समवाप्नोति गृहिणीं	१२१
गोपाल इति मत्वा त्वां प्रचुर	१५
ग्रीष्मकाले दिनं दीर्घं शीतकाले तु	१०२
(च)	
चन्दनं शीतलं लोके चन्दनादपि	१३५
(छ)	
छायामन्यस्य कुर्वन्ति तिष्ठन्ति	६०
(ज)	
जठरवसतिकाले कीदृशी यन्त्रणा स्यात्	२६
जलमन्नं तथा काव्यं त्रीणि रत्नानि	११३
जिता धनवता दारा जिता वस्त्रवता	१५०
ज्येष्ठत्वं जन्मना नैव गुणैर्ज्येष्ठत्व	११५
ज्योतिरिङ्गण कथं न लज्जसे	४४
(त)	
तं वन्दे पद्मसद्मानमुपवीत	५
तावद् गर्ज्जति मण्डूक:	४८
तुल्यवर्णच्छद: कृष्ण: कोकिलै: सह सङ्गत:	४१
तृणादपि लघुस्तूलस्तूलादपि च	१०८
तृणानि शुष्काणि वने चरित्वा	४७
त्वयि वर्षति जीमूत सर्व्वे	६३
(द)	
दलानाञ्च फलानाञ्च सन्तु ते ते	४९
दासेरकस्य दासीयं बदरी यदि	७२
दिग्वाससं गतव्रीड़ं जटिलं धूलिधूसरम्	१२५
दिङ्मण्डलं परिमलै: सुरभीकरोषि	८०
द्राक्षा म्लानमुखी जाता शर्करा	११०
(ध)	
धन्यं भारतभूतलं प्रियतमं सारस्वतं	१
धन्या: कवीश्वरास्ते हि रससागरपारगा:	११२
(न)	
न केवलं मनुष्येषु दैवं देवेष्वपि	१४१
न भारा: पर्व्वता भारा न भारा: सप्त	९५

उद्भट-सागरः ।

प्रथम-प्रवाहः ।

ग्रन्थारम्भः ।

(१)

धन्यं भारतभूतलं प्रियतमं सारस्वतं मन्दिरं
धन्या संस्कृतवाक् सुधापरतरा गीर्वाणसंसेविता ।
धन्या ब्राह्मणपण्डिताः सुकवितापाण्डित्यसंमण्डिता-
स्तेषामुद्भटभाषितं क्षितितले जीयात् समाः शाश्वतीः ॥

(उद्भटसागरस्य)

(२)

वन्दे भूदेवपादाब्जं यत्प्रसादान्नवं नवम् ।
उद्भटश्लोकपीयूषं पिबन्तु भुवि मानवाः ॥

(उद्भटसागरस्य)

देवता-तरङ्गः ।

परब्रह्म ।

(३)

वन्देऽहं विश्वकर्त्तारं विश्वपं विश्वनाशकम् ।
विश्वदिग्देशकालज्ञं विश्वेशं विश्ववन्दितम् ॥

(उद्भटसागरस्य)

(४)

यथा तथापि यः पूज्यो यत्र तत्रापि योऽर्चितः ।
योऽपि वा सोऽपि वा योऽसौ देवस्तस्मै नमोऽस्तु मे ॥

(पण्डित-जगद्धरस्य)

ब्रह्मा ।

(५)

तं वन्दे पद्मसद्मानमुपवीतच्छटाछलात् ।
गङ्गा स्रोतस्त्रयेणैव यं सदैव निषेवते ॥

(राजशेखरस्य)

सरस्वती ।

(६)

अवगाहस्व वाग्देवि रम्यमुद्भटसागरम् ।
उद्भटश्लोकपद्मेन रचय श्रुतिभूषणम् ॥

(उद्भटसागरस्य)

(७)

अपूर्वस्तव भाण्डारो मातर्भारति दृश्यते ।
अव्यये व्ययमाप्नोति व्यये चाव्ययतामियात् ॥

सरस्वती (तुम्बी)

(८)

वाणीं लक्ष्यीकृत्य कथयति :—

नादाम्बुधेः परं पारं किं न वेत्सि सरस्वति ।
अद्यापि मज्जनभयात् तुम्बीं वहसि वक्षसि ॥

विष्णुः ।

(९)

नमोऽस्तु विष्णवे सृष्टिस्थितिप्रलयहेतवे ।
खगेन्द्रकेतवेऽपारसंसारपारसेतवे ॥

(उद्भटसागरस्य)

लक्ष्मीः ।

(१०)

लक्ष्मीकुहकेन पुरुषा अन्धा इव भवन्तीति दर्शयति :—

लक्ष्मि क्षमस्व वचनीयमिदं मयोक्त-
मन्धीभवन्ति पुरुषास्त्वदुपासनेन ।

नो चेत् कथं कमलपत्रविशालनेत्रो
नारायणः स्वपिति पन्नगभोगतल्पे ॥

लक्ष्मी-लीला ।

(११)

मन्ये लक्ष्मि त्वया सार्द्धं समुद्राद् धूलिरुत्थिता ।
पश्यन्तोऽपि न पश्यन्ति श्रीमन्तो धूलिलोचनाः ॥

रामचन्द्रः ।

(१२)

रसनां तिरस्कुर्व्वन् रामनामोत्कर्षं सूचयति रसने इति :—

रसने त्वं रसज्ञेति वृथैव स्तूयसे बुधैः ।
अपारमाधुरीधामरामनामपराङ्मुखी ॥

सीता ।

(१३)

मातापितृभ्यां कन्याया यन्नाम न हि रच्यते ।
रामेण सह तन्नाम ममास्येऽस्तु निरन्तरम् ॥

(उद्भटसागरस्य)

कृष्णः ।

(१४)

श्रीनन्दनयनानन्दं यशोदानन्दकन्दुकम् ।
गोगोपगोपिकागोपं राधानाथं नमाम्यहम् ॥

(उद्भटसागरस्य)

(१५)

गोपाल इति मत्वा त्वां प्रचुरक्षीरवाञ्छया ।
श्रितो मातुः स्तनक्षीरमपि लब्धुं न शक्नुयात् ॥

(१६)

कश्चिद्‌ भक्तो भगवति कृष्णे चित्तमावेशयितुं वाग्वैचित्र्यमवलम्ब्य भगवन्तं प्रार्थयते रत्नाकरेति :—

रत्नाकरस्तव गृहं गृहिणी च पद्मा
किं देयमस्ति भवते जगदीश्वराय ।
आभीरवामनयनाहृतमानसाय
दत्तं मनो यदुपते कृपया गृहाण ॥

कृष्णलीला ।

(१७)

कश्चिद्‌ भक्तः नन्दनन्दनपलायनं मनसिकृत्य कथयति :—

चौरसारमपहृत्य शङ्कया
स्वीकृतं यदि पलायनं त्वया ।

मानसे मम घनान्धतामसे
नन्दनन्दन कथं न लीयसे ॥

राधिका ।

(१८)

राधिकां नौमि नीलाब्जमदमोचनलोचनाम् ।
श्रीनन्दनन्दनप्रेमवापीखेलन्मरालिकाम् ॥

(उद्भटसागरस्य)

शिवः ।

(१९)

शिशिरकिरणधारी शैलबालाविहारी
भवजलनिधितारी योगिहृत्पद्मचारी ।
शमनजभयहारी प्रेतभूमिप्रचारी
कृपयतु मयि देवः कोऽपि संहारकारी ॥

(उद्भटसागरस्य)

(२०)

पार्वतीफणिबालेन्दुभस्ममन्दाकिनीयुता ।
पवर्गमण्डिता मूर्त्तिरपवर्गफलप्रदा ॥

(२१)

शिवाराधनं सर्व्वैरेव सुलभमित्याह मूर्त्तिरिति :—

मूर्त्तिर्मृदा विल्वदलेन पूजा
प्रयाससाध्यं वदनञ्च वाद्यम् ।
फलञ्च तद् यन्मनसाभिकाङ्क्ष्यं
निःस्वस्य विश्वेश्वर एव देवः ॥

शिवलीला ।

(२२)

स्वयं सुरेशः श्वशुरो नगेशः
सखा धनेशस्तनयो गणेशः ।
तथापि भिक्षां कुरुते महेशः
ललाटवह्नेरयमेव शेषः ॥

(२३)

अशान्तिमयः खलु संसारभावः सर्व्वानेवाभिभवतीति दर्शयितुं तदवस्थं शिवं वर्णयति एकेति :—

एका भार्य्या समररसिका निम्नगा च द्वितीया
ज्येष्ठः पुत्रो द्विरदवदनः षण्मुखोऽतो द्वितीयः ।
नन्दी भृङ्गी प्लवगवदनो वाहनं पुङ्गवेशः
स्मारं स्मारं स्वगृहचरितं भस्मदेहो महेशः ॥

पार्वती ।

(२४)

स्वयं पञ्चमुखः पुत्रौ गजाननषडाननौ ।
दिगम्बरः कथं जीवेदन्नपूर्णा न चेद् गृहे ॥

(२५)

यत्रास्ति भोगो न च तत्र मोक्षो
यत्रास्ति मोक्षो न च तत्र भोगः ।
उमापदाम्भोजयुगार्चने तु
भोगश्च मोक्षश्च करस्थ एव ॥

गङ्गा ।

(२६)

जठरवसतिकाले कीदृशी यन्त्रणा स्यात्
सकृदपि मनसि स्वे जह्नुजे चिन्तय त्वम् ।
जठरवसतिनाशे साभिलाषो जनन्या-
स्तव जठरनिवासं याचते पूर्णचन्द्रः ॥

(उद्भटसागरस्य)

(२७)

वरं भागीरथीतीरे नीरेणोदरपूरणम् ।
तत्र चेल्लभ्यते शाकः कः काकः पाकशासनः ॥

(२८)

यदा यदा यान्ति नरा हि जाह्नवीं
रुदन्ति पापानि वदन्ति चाप्रियम्।
अरे कृतघ्ना नितरां नराधमाः
स्वयं समुत्पाद्य निहन्तुमुद्यताः॥

(२९)

कालीवट्टे गङ्गा कथं तनुतरेत्याह :—

कालीवट्टे कलौ काले किल्बिषकुलनाशने।
सपत्नीविभवं दृष्ट्वा गङ्गा च मलिना कृशा॥

(राजकुमार न्यायरत्नस्य)

मूर्त्ति-समष्टिः।

हरगौरी-मूर्त्तिः।

(३०)

वागर्थाविव संयुक्तौ वागर्थप्रतिपत्तये।
जगतो जनकौ वन्दे शर्व्वाणीशशिशेखरौ॥

(क्षेमेन्द्रस्य)

शिव-राम-मूर्त्तिः ।

(३१)

सेतुबन्धे रामेश्वरमूर्त्तिस्थापनात् परं नारदेन रामेश्वरशब्दस्य कः समास इति रामः शिवो ब्रह्मा च पृष्टः । अथ तेषामुत्तराणि षष्ठीति :—

षष्ठीतत्पुरुषं रामो बहुव्रीहिं महेश्वरः ।
रामेश्वरपदे ब्रह्मा कर्म्मधारयमब्रवीत् ॥

जीव-तरङ्गः ।

राजा ।

(३२)

राजा बन्धुरबन्धूनां राजा चक्षुरचक्षुषाम् ।
राजा पिता च माता च सर्व्वेषां न्यायवर्त्तिनाम् ॥

(३३)

राजानं प्रथमं विन्देत् ततो भार्य्यां ततो धनम् ।
राजन्यसति लोकेऽस्मिन् कुतो भार्य्या कुतो धनम् ॥

मन्त्री ।

(३४)

मन्त्रिगुणमाह सारेति :—

सारगर्भैरकुटिलैरच्छिद्रैः सुपरीक्षितैः ।
मन्त्रिभिर्धार्य्यते राज्यं सुस्तम्भैरिव मन्दिरम् ॥

आकवरः ।

(३५)

विधिना तुलिताविति सेकेन्दरपुरन्दरौ ।
गुरुः सेकेन्दरः पृथ्वीं लघुरिन्द्रो दिवं ययौ ॥

(नायक-गोपालस्य)

प्रतापादित्यः ।

(३६)

राज्ञः प्रतापादित्यस्य समीपे कस्यचित् भिक्षुकस्योक्तिरियम् :—

प्रतापादित्य भूपाल भालं मम विलोकय ।
स्वेदेन प्रोज्झिताः सन्तु विधेर्दुर्लेखपंक्तयः ॥

(अविलम्ब-सरस्वत्याः)

कृष्णचन्द्रः ।

(३७)

नवद्वीपाधिपति-महाराज-कृष्णचन्द्र' प्रति कवेरुक्तिरियम् :—

निष्कलङ्को निरातङ्कः पद्मिनीप्राणवल्लभः ।
चतुःषष्टिकलो भाति कृष्णचन्द्रः सदा भुवि ॥

(भारतचन्द्र-रायगुणाकरस्य)

अश्वः ।

(३८)

हरिणशिशोः शीघ्रगामित्वं पराभवितु' तत्पश्चाद्धावमानं घोटकं प्रत्युक्तिरियम् :—

अयि तुरङ्ग कुरङ्गशिशोर्जवं
जयसि चेदिह किं तव पौरुषं ।
यदि विधातृवशेन मनागपि
स्खलसि विश्वविसारियशःक्षतिः ॥

उष्ट्रः ।

(३९)

असाधारण एकोऽपि गुणः सर्व्वान् दोषानावृणोतीत्याह :—

वपुर्विषमसंस्थानं कर्णज्वरकरो रवः ।
करभस्याशुगत्यैव छादिता दोषसंहतिः ॥

(भट्टभल्लटस्य)

काकः ।

(४०)

गुणवतां समक्षे निर्गुणानामसङ्कोचव्यवहारो दोषायेत्याह :—

अहो मोहो वराकस्य काकस्य यदसौ पुरः ।
सरीसर्त्ति नरीनर्त्ति शिखण्डिराजहंसयोः ॥

(४१)

तुल्यवर्णच्छदः कृष्णः कोकिलैः सह सङ्गतः ।
केन विज्ञायते काकः स्वयं यदि न भाषते ॥

काक-कोकिलौ ।

(४२)

मूर्खपण्डितयोराकृतिसाम्येऽपि गुण एव तयोर्भेदं जनयतीत्याह :—

अहं पिको भवान् काकः समानः कालिमावयोः ।
प्रभेदं कथयिष्यन्ति काकलीकोविदाः पुनः ॥

कोकिलः ।

(४३)

सदैव यस्य संसर्गं कुर्व्वन्ति तस्य विशेषगुणवत्त्वं न हि सर्व्वे जानन्तीत्याह :—

रसालशिखरासीनाः शतं सन्तु पतत्रिणः ।
तन्मञ्जरीरसास्वादं जानन्त्येव कुहूमुखाः ॥

खद्योतः ।

(४४)

यस्य यादृक् सामर्थ्यं तस्य तदनुसरणमेव श्रेय इत्याह :—

ज्योतिरिङ्गण कथं न लज्जसे यत्तमः शमयितुं प्रवर्त्तसे ।
एतदेव बहु किं न मन्यसे यत् त्वमत्र तिमिरेषु लक्ष्यसे ॥

गर्द्दभः ।

(४५)

कण्ठदोषो हि गुणवन्तमपि दूषयतीत्याह :—

खरोऽपि प्रचुरं भारं नित्यं वहति दूरतः ।
खरस्वरतया त्वेष न हि स्पृश्योऽवरैरपि ॥

चातकः ।

(४६)

माननाशात् प्राणनाशोऽपि वरमित्याह :—

एक एव खगो मानी चिरं जीवतु चातकः ।
पुरन्दरं याचते वा म्रियते वा पिपासया ॥

धेनुः ।

(४७)

तृणानि शुष्काणि वने चरित्वा
पीत्वापि तोयान्यमृतं स्रवन्ति ।

यद्गोमयाद्याश्च पुनन्ति लोकान्
गोभिर्न तुल्यं धनमस्ति किञ्चित् ॥

भेकः ।

(४८)

तावद् गर्ज्जति मण्डूकः कूपमाश्रित्य निर्भयः ।
यावत् करिकराकारः कृष्णसर्पो न दृश्यते ॥

भ्रमरः ।

(४९)

यत्र यस्य विशेषनैपुण्यमस्ति तस्य गुणदोषविवेचने तस्यैवाधिकारो नान्यस्येत्याह :—

दलानाञ्च फलानाञ्च सन्तु ते ते विवेकिनः ।
मकरन्दविशेषज्ञो विना भृङ्गमिहास्ति कः ॥

मत्स्यरङ्कः ।

(५०)

मत्स्यरङ्क निरातङ्को लवणाम्भसि मज्जसि ।
इयं हि जाठरी ज्वाला व्याकुलीकुरुते न कम् ॥

मयूरः ।

(५१)

ये च परोपकारी व्रतमिति गणयन्ति ते नूनं यत्र तत्र स्थिता अपि तत् पालयन्तीत्याह :—

व्यजनैरातपत्रैश्च भूत्वा पिच्छैः कलापिनाम् ।
स्थानभ्रष्टैः क्रियतेऽपि परेषां तापवारणम् ॥

मृगः ।

(५२)

वसन्त्यरण्येषु तृणं चरन्ति
पिबन्ति तोयान्यपरिग्रहाणि ।
तथापि वध्या हरिणा नराणां
को लोकमाराधयितुं समर्थः ॥

(मुक्तापीडस्य)

वृश्चिकः ।

(५३)

विषकुम्भसहस्रेण गर्वं नाप्नोति वासुकिः ।
वृश्चिको विन्दुमात्रेण वहत्यूर्द्ध्वं स्वकण्टकम् ॥

शफरी ।

(५४)

स्वल्पैरपि वित्तविद्यादिभिरात्मश्लाघिनम् प्रत्युक्तिरियम् :—

अगाधजलसञ्चारी विकारी नापि रोहितः ।
गण्डूषजलमात्रेण शफरी फर्फरायते ॥

शुकः ।

(५५)

अखिलेषु विहङ्गेषु हन्त स्वच्छन्दचारिषु ।
शुक पञ्जरबन्धस्ते मधुराणां गिरां फलम् ॥

सर्पः (अनन्तः) ।

(५६)

बहवः फणिनः सन्ति भेकभक्षणदक्षकाः ।
स एक एव शेषो हि धरणीधरणक्षमः ॥

(वैद्यभानुपण्डितस्य)

सिंहः ।

(५७)

महान्तः कदापि स्वभावान्न स्खलन्तीत्याह :—

सदाऽमन्दमदस्यन्दि मातङ्गपिशिताशनः ।
अलब्धाभीष्टभक्ष्योऽपि तृणान्यत्ति न केशरी ॥

हंसः ।

(५८)

पूर्वमुत्तमं संसेव्य पश्चाद्दैववशादधमसेविनं प्रत्युक्तिरियम् :—

कंसारिचरणोद्भूतसिन्धुकल्लोललालितम् ।
मन्ये हंस मनो नीरे कुल्यानां रमते न ते ॥

(शार्ङ्गधरस्य)

(५९)

उत्तमाधमयोः प्रभेदः कर्मण्येव प्रतीयते इत्याह :—

हंसः श्वेतो बकः श्वेतः को भेदो बकहंसयोः ।
नीरक्षीरविभागे तु हंसो हंसो बको बकः ॥

उद्भित्-तरङ्गः ।

सामान्य-वृक्षः ।

(६०)

छायामन्यस्य कुर्वन्ति तिष्ठन्ति स्वयमातपे ।
फलन्ति च परार्थाय वृक्षाः साधुजना इव ॥

(६१)

बहुसम्पदः सहृदया येन केनापि पराभीष्टं पूरयन्तीत्याह :—

पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
धन्या महीरुहा येभ्यो विमुखा यान्ति नार्थिनः ॥

(६२)

गृहमागतानां क्षुद्राणामतिथिसत्कारः कथञ्चित् सुकरः महतान्तु दुष्कर एवेत्याह :—

विश्रान्तशशकाः सन्ति सर्व्वत्र बहुपादपाः ।
स एव विरलो वृक्षो यत्र श्राम्यति कुञ्जरः ॥

अर्कः ।

(६३)

कोऽपि सर्व्वांस्तोषयितुं न पारयतीत्याह :—

त्वयि वर्षति जीमूत सर्व्वे पल्लविता द्रुमाः ॥
अस्माकन्त्वर्कवृक्षाणां पूर्व्वपत्रञ्च नश्यति ॥

अश्वत्थः ।

(६४)

रोपितैः सेवितैः किं तैः सत्यश्वत्थेऽन्यपादपैः ।
वर्द्धितो नरकाद् रक्षेत् स्पृष्टोऽरिष्टानि हन्ति यः ॥
(मागधमाधवस्य)

इक्षुः ।

(६५)

कान्तोऽसि नित्यमधुरोऽसि रसाकुलोऽसि
किञ्चासि मानवमनःसुखदः सदैव ।
इक्षो तवास्ति सकलं परमेकमूनं
यत् सेवितो मधुरतां त्यजसि क्रमेण ॥

कल्पतरुः ।

(६६)

कस्यचित् समीपादभीष्टफललाभे विलम्बमसहमानस्योक्तिरियम् :—

कल्पवृक्षोऽपि कालेन भवेद् यदि फलप्रदः ।
को विशेषस्तदा तस्य वन्यैरन्यैर्महीरुहैः ॥

कार्पासः ।

(६७)

नीरसान्यपि रोचन्ते कार्पासानां फलानि नः ।
येषां गुणमयं जन्म परेषां गुह्यगुप्तये ॥

केतकी ।

(६८)

केतकीकुसुमं भृङ्गश्छिन्नगात्रोऽपि सेवते ।
दोषः करोति किं नाम गुणापहृतचेतसाम् ॥

चन्दनः ।

(६९)

विपुलविभवमपि दानवर्ज्जितं प्रत्युक्तिरियम् :—

मूलं भुजङ्गैः शिखरं प्लवङ्गैः
शाखा विहङ्गैः कुसुमञ्च भृङ्गैः ।
श्रितं सदा चन्दनपादपस्य
परोपकाराय सतां विभूतिः ॥

तालः ।

(७०)

उच्चैस्तरोऽपि विटपी श्रुततालसंज्ञो
मार्त्तण्डचण्डकिरणैरतितप्तमूलः ।

योग्यः कथं भवति तापकलापशान्त्यै
लोकस्य शोकसहितस्य तृषातुरस्य ॥

दूर्वा ।

(७१)

अन्तःसारवत्ता क्षुद्रमपि न जहातीत्याह :—

निष्पिष्टापि पदाघातैः खरतापैश्च तापिता ।
अजाद्यैश्चर्विताप्येषा न दूर्वा म्रियते क्वचित् ॥

द्राक्षा ।

(७२)

दासेरकस्य दासीयं वदरी यदि रोचते ।
एतावतैव किं द्राक्षा न साक्षादमृतप्रदा ॥

(कर्पूरस्य)

नारिकेलः ।

(७३)

उपकर्तुः प्रत्युपकृतिः सतां स्वाभाविकीत्याह :—

प्रथमवयसि पादे तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेरा नराणाम् ।

ददति परममिष्टं तोयमाजीवनान्तं
नहि कृतमुपकारं साधवो विस्मरन्ति ॥

निम्बः ।

(७४)

शर्कराघृतयोगेन निम्बबीजं प्रतिष्ठितम् ।
तथा क्षीरसदाक्षेपे निंम्बः किं मधुरायते ॥

पद्मम् ।

(७५)

-यथाकथमपि नीचसाम्यं न स्पृहणीयमित्याह :—

वरमश्रीकता लोके नासमानसमानता ।
इतीव कुमुदोद्भेदे कमलं मुकुलायते ॥

पनसः ।

(७६)

अस्ति चेत् पानसं बीजं व्यञ्जनैः किं प्रयोजनम् ।
-नास्ति चेत् पानसं बीजं व्यञ्जनैः किं प्रयोजनम् ॥

पलाशः ।

(७७)

सुरक्तेन सुरम्येण किं पलाशेन पक्षिणाम् ।
यस्य पुष्पे न सौरभ्यं फले न मधुरो रसः ॥

वेतसः ।

(७८)

सर्व्वेषामपि वृक्षाणां कार्य्यज्ञो वेतसद्रुमः ।
नम्रीभूयावति प्राणान् नदीपूररिपूदये ॥

शालिः ।

(७९)

तुल्यरूपाण्यपि वस्तूनि गुणविशेषादन्यस्माद् भिद्यन्ते इत्याह :—

एकभूरुहयोरेकदलयोरेककाण्डयोः ।
शालिश्यामाकयोर्भेदः फलेन परिचीयते ॥

सहकारः ।

(८०)

दिङ्मण्डलं परिमलैः सुरभीकरोषि
सौन्दर्य्यमावहसि लोचनलोभनीयम् ।
हंहो रसाल फलवर्य्य तथापि दूये
यद् ग्रन्थिलं स्वहृदयं कठिनं विधत्से ॥

स्वभावोक्ति-तरङ्गः ।

पर्वतः (मलयः)

(८१)

यो हि आश्रितानां सर्व्वथा हितं साधयति स एव गरीयानित्याह :—

किं तेन हेमगिरिणा रजताद्रिणा वा
यत्राश्रिता हि तरवस्तरव स्त एव ।
मन्यामहे मलयमेव यदाश्रयेण
शाखोटनिम्बकुटजा अपि चन्दनाः स्युः ॥

सागरः ।

(८२)

निर्लज्जो हि मुहुस्तिरस्कृतोऽपि स्वभावं न जहातीत्याह मथित इति :—

मथितो लङ्घितो बद्धः पीतो यद्यपि सागरः ।
गर्जत्युच्चैस्तथाप्येष जड़ात्मानो हि निस्त्रपाः ॥

(८३)

पात्रापात्रमविविच्य आदरानादरौ न युक्त इत्याह अध इति :—

अधःकरोषि यद् रत्नं मूर्ध्नि धारयसे तृणम् ।
दोषस्तवैष जलधे रत्नं रत्नं तृणं तृणम् ॥

(८४)

यस्य यद्ध वस्तु परार्थं न साधयति तेन स्पर्द्धमानः स भिन्द्यते इत्याह वातेति :—

वातोल्लासितकल्लोलं धिक् ते सागर गर्ज्जितम् ।
यस्य तीरे तृषाक्रान्तः पान्थः पृच्छति कूपिकाम् ॥

सुवर्णम् ।

(८५)

हा हेम किं न तत्रैव विलीनं दहनोदरे ।
पाषाणशकलाधीनं यत् ते गुणपरीक्षणम् ॥

(८६)

महान्तः कष्टसहस्राण्यपि सोढुं शक्नुवन्ति नीचसंसर्गस्तु तेषामसह्य एवेत्याह :—

न दुःखं दहने घर्षे छेदने ताड़नेऽपि मे ।
एकं मे विषमं दुःखं गुञ्जया सह तोलने ॥

(अमरुकस्य)

निन्दा-प्रशंसा-तरङ्गः ।

(क) निन्दा-तरङ्गः ।

अप्रवास-निन्दा ।

(८७)

यो न भ्रमति देशेषु न च संसेवते बुधान् ।
तस्य सङ्कुचिता बुद्धिर्घृतविन्दुरिवाम्भसि ॥

असन्तोष-निन्दा ।

(८८)

आशाया असीमत्वं दर्शयति गिरिरिति :—

गिरिर्महान् गिरेरब्धि र्महानब्धे र्नभो महत् ।
नभसोऽपि महत् ब्रह्म ततस्तृष्णा महीयसी ॥

उदर-पूर्त्ति-निन्दा ।

(८९)

किमकारि न कार्पण्यं कस्यालङ्घि न देहली ।
अस्य दग्धोदरस्यार्थे किमनाटि न नाटकम् ॥

ऋण-निन्दा ।

(९०)

स्मृते सीदन्ति गात्राणि दृष्टे प्रज्ञा विनश्यति ।
यस्मिंस्तद्विषमत्युग्रम् उत्तमर्णाभिशब्दितम् ॥

कुकवि-निन्दा ।

(९१)

कूटकाव्यरचनापक्षपातिनः कवेरुक्तिरियम् :—

किं काव्येन कवेस्तेन किं काण्डेन च धन्विनः ।
परस्य हृदये लग्नं न घूर्णयति यच्छिरः ॥ (१)

(त्रिविक्रमभट्टस्य)

कुपुत्र-निन्दा ।

(९२)

शिशुं प्रविशतः प्रायः प्रतिवेशिगुणागुणौ ।
गन्धोऽन्यसन्निधेरेव संक्रामति समीरणे ॥

(हरिहरस्य)

कुवैद्य-निन्दा ।

(९३)

वैद्यराज नमस्तुभ्यं त्वं यमज्येष्ठसोदरः ।
यमः संहरते प्राणान् त्वन्तु प्राणान् धनानि च ॥

कुसंसर्ग-निन्दा ।

(८४)

लघुना सङ्गतो लोको लघुतामेति निश्चितम् ।
पश्य तुम्बीफलालम्बी लौहोऽपि प्लवते जले ॥

कृतघ्न-निन्दा ।

(८५)

न भाराः पर्व्वता भारा न भाराः सप्त सागराः ।
निन्दका हि महाभारा भारा विश्वासघातकाः ॥

कृपण-निन्दा ।

(८६)

उपभोक्तुं न जानाति कदापि कृपणो जनः ।
आकण्ठजलमग्नोऽपि कुक्कुरो लेढ़ि जिह्वया ॥

खल-निन्दा ।

(८७)

अपूर्व्वा दृश्यते व्याली खलाननबिलाश्रया ।
कर्णमूले दशत्येकं हरत्यन्यस्य जीवितम् ॥

गृहस्थाश्रम-निन्दा ।

(९८)

न विप्रपादोदकपङ्किलानि
न वेदपाठध्वनिगर्ज्जितानि ।
स्वाहास्वधाकारविवर्ज्जितानि
श्मशानतुल्यानि गृहाणि तानि ॥

दारिद्र्य-निन्दा ।

(९९)

एको हि दोषो गुणसन्निपाते
निमज्जतीन्दोरिति यो बभाषे ।
नूनं न दृष्टं कविनापि तेन
दारिद्र्यदोषो गुणराशिनाशी ॥

(१००)

मम तिस्रो गता भार्य्या विद्याबुद्धिविभूतयः ।
चतुर्थी दुर्गतिः साध्वी सैवैका मां न मुञ्चति ॥

(१०१)

शीतवस्त्रं प्रार्थयमानस्य भिक्षुकस्य सूक्तिरियम् :—

रात्रौ जानु दिवा भानुः कृशानुः सन्ध्ययोर्द्वयोः ।
इत्थं शीतं मया नीतं जानुभानुकृशानुभिः ॥

(जयन्तीदेव्याः)

दुर्जन-निन्दा ।

(१०२)

ग्रीष्मकाले दिनं दीर्घं शीतकाले तु शर्व्वरी ।
परोपतापिनः सर्व्वे प्रायशो दीर्घजीविनः ॥

(प्रेमचन्द्रतर्कवागीशस्य)

(१०३)

भुजङ्गानां विषं दन्ते मक्षिकाणाञ्च मस्तके ।
वृश्चिकानां तथा पुच्छे सर्व्वाङ्गेषु दुरात्मनाम् ॥

धनि-निन्दा ।

(१०४)

भक्ते द्वेषो जड़े प्रीतिररुचिर्गुरुलङ्घनम् ॥
मुखे च कटुता नित्यं धनिनां ज्वरिणामिव ॥

(आनन्दवर्द्धनस्य)

निर्गुण-निन्दा ।

(१०५)

एकमेव पुरस्कृत्य दश जीवन्ति निर्गुणाः ।
विना तेन न शोभन्ते संख्याङ्केष्विव विन्दवः ॥

परगृहवास-निन्दा ।

(१०६)

शिरसा धार्य्यमाणोऽपि सोमः सौम्येन शम्भुना ।
कृशत्वं परमं धत्ते कष्टः खलु पराश्रयः ॥

भिक्षुक-निन्दा ।

(१०७)

काकेनाह्वयते काको भिक्षुणा न तु भिक्षुकः ।
काकभिक्षुकयोर्मध्ये वरं काको न भिक्षुकः ॥

(१०८)

तृणादपि लघुस्तूलस्तूलादपि च याचकः ।
वायुना नीयते नासौ स्वतः प्रार्थनशङ्कया ॥

मद्य-पान-निन्दा ।

(१०९)

वैकल्यं धरणीपातमयथोचितजल्पनम् ।
सन्निपातस्य चिह्नानि मद्यं सर्व्वाणि दर्शयेत् ॥ (१)

(भल्लटस्य)

(ख) प्रशंसा-तरङ्गः ।

उद्भट-कविता-प्रशंसा ।

(११०)

द्राक्षा म्लानमुखी जाता शर्करा चाश्मतायुता ।
उद्भटस्य रसस्याग्रे सुधा भीता दिवं गता ॥

(१११)

भाषासु मधुरा मुख्या दिव्या गीर्वाणभारती ।
तत्र सुमधुरं काव्यमुद्भटस्तु ततोऽपि च ॥

कवि-प्रशंसा ।

(११२)

धन्याः कवीश्वरास्ते हि रससागरपारगाः ।
नास्ति येषां यशःकाये जरामरणजं भयम् ॥

काव्य-प्रशंसा ।

(११३)

जलमन्नं तथा काव्यं त्रीणि रत्नानि भूतले ।
मूढैः पाषाणखण्डेषु रत्नसंज्ञा विधीयते ॥

गुण-प्रशंसा ।

(११४)

गुणाः सर्वत्र पूज्यन्ते पितृवंशो निरर्थकः ।
वसुदेवं परित्यज्य वासुदेव उपास्यते ॥

(११५)

ज्येष्ठत्वं जन्मना नैव गुणैर्ज्येष्ठत्वमुच्यते ।
गुणाद् गुरुत्वमायाति दुग्धं दधि घृतं क्रमात् ॥

गृहस्थाश्रम-प्रशंसा ।

(११६)

सविप्रपादोदककर्दमानि
सवेदपाठध्वनिगर्ज्जितानि ।
स्वाहास्वधाकारनिरन्तराणि
स्वर्गेण तुल्यानि गृहाणि तानि ॥

चरित्र-प्रशंसा ।

(११७)

विदेशेषु धनं विद्या व्यसनेषु धनं मतिः ।
परलोके धनं धर्म्मः शीलं सर्व्वत्र वै धनम् ॥

दान-प्रशंसा ।

(११८)

भवन्ति नरकाः पापात् पापं दारिद्र्यसम्भवम् ।
दारिद्र्यमप्रदानेन तस्माद्दानपरो भवेत् ॥

(११९)

सत्यं सत्यं मनोर्वाक्यं नादत्तमुपतिष्ठते ।
अम्बुभिः पूरिता पृथ्वी चातकस्य मरुस्थली ॥

धनि-प्रशंसा ।

(१२०)

धनमदमत्तं प्रति कस्यचित् कवेः सूक्तिरियम् :—

सुवर्णं बहु यस्यास्ति तस्य न स्यात् कथं मदः ।
नामसाम्यादहो यस्य धुस्तूरोऽपि मदप्रदः ॥

नारी-प्रशंसा ।

(१२१)

गृही चेत् समवाप्नोति गृहिणीं हृदयङ्गमाम् ।
सारं पश्यति संसारं न तु भारं कदाचन ॥

(नीलकण्ठस्य)

पण्डित-प्रशंसा ।

(१२२)

अज्ञानदूरीकरणाय ज्ञानवन्तमाश्रयेदित्याह :—

उद्यन्तु शतमादित्या उद्यन्तु शतमिन्दवः ।
न विना विदुषां वाक्यैर्नश्यत्याभ्यन्तरं तमः ॥

(भट्टमल्लस्य)

(१२३)

महान्तो हि अन्येषां गुणमाकर्ण्य सर्व्वत्र प्रशंसन्ति दोषन्तु निगूहन्तीत्याह गुणेति :—

गुणदोषौ गुणी गृह्णन्निन्दुक्ष्वेडाविवेश्वरः ॥
शिरसा श्लाघते पूर्व्वं परं कण्ठे सुरक्षति ॥ (१)

(जैन्दुकस्य)

परोपकार-प्रशंसा ।

(१२४)

सूर्य्यश्चन्द्रो घनो वृक्षो नदी गावी च सज्जनः ।
एते परोपकाराय विधात्रैव विनिर्म्मिताः ॥

पुत्र-प्रशंसा ।

(१२५)

दिग्वाससं गतव्रीड़ं जटिलं धूलिधूसरम् ।
पुण्यवन्तो हि पश्यन्ति महादेवमिवात्मजम् ॥

प्रवास-प्रशंसा ।

(१२६)

यो हि भ्रमति देशेषु सेवते च सुपण्डितान् ।
तस्य विस्तारिता बुद्धिस्तैलबिन्दुरिवाम्भसि ॥

महत्त्व-प्रशंसा ।

(१२७)

अधोगत्वा स्वयं क्षुद्रा उत्थाप्यन्ते महात्मना ।
जलेन नीयते तैलमूर्द्ध्वं संमिश्रणात् परम् ॥

मित्र-प्रशंसा ।

(१२८)

करोतु तादृशीं प्रीतिं यादृशी नीरपङ्कयोः ।
रविणा शोषिते नीरे पङ्कदेहो विदीर्य्यति ॥

विद्या-प्रशंसा ।

(१२९)

सद्विद्या यदि का चिन्ता वराकोदरपूरणे ।
शुकोऽप्यशनमाप्नोति रामरामेति च ब्रूवन् ॥

वीर-प्रशंसा ।

(१३०)

एकचक्रो रथो यन्ता विकलो विषमा हयाः ।
आखिलं व्योम तेजस्वी तथाप्याक्रमति रविः ॥

सन्तोष-प्रशंसा ।

(१३१)

कर्त्तव्यपरायणा हि कर्त्तव्यपालने कथमपि न पराङ्मुखीभवन्तीत्याह :—

उदारस्य तृणं वित्तं शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्य्या निस्पृहस्य तृणं जगत् ॥

सहाय-प्रशंसा ।

(१३२)

सर्व्वगुणसम्पन्नोऽपि सहायं विना नोत्कर्षं लभते इत्याह :—

गुणैः सर्व्वज्ञकल्पोऽपि सीदत्येको निराश्रयः ।
अनर्घमपि माणिक्यं हेमाश्रयमपेक्षते ॥

सुजन-प्रशंसा ।

(१३३)

निसर्गेण विशुद्धात्मा सुजनो व्यजनोपमः ।
परसन्तापशान्त्यर्थं परिभ्रमति सर्व्वदा ॥

सुपुत्र-प्रशंसा ।

(१३४)

निर्गुणबह्वपेक्षया गुणवानेकोऽपि श्लाघ्य इत्याह :—

एकेनापि सुपुत्रेण सिंही स्वपिति निर्भयम् ।
सहैव दशभिः पुत्रैर्भारं वहति गर्दभी ॥

सुसंसर्ग-प्रशंसा ।

(१३५)

चन्दनं शीतलं लोके चन्दनादपि चन्द्रमाः ।
ताभ्यां चन्दनचन्द्राभ्यां शीतलः साधुसंगमः ॥

रस-तरङ्गः ।

(क) करुण-रसः ।

(१३६)

अहो बद्धजटे रामे सुमन्त्रे गृहमागते ।
त्यक्तो राजा सुतत्यागादविश्वस्तैरिवासुभिः ॥

(ख) शान्त-रसः ।

उपदेशः ।

(१३७)

शुभवासनया चेतो महत्या जायते महत् ।
आत्मानं चिन्तयन् रुद्रं नन्दी रुद्रत्वमागतः ॥

कर्म्म-फलम् ।

(१३८)

सुमहत् फलवैषम्यं कर्म्मणामिह दृश्यते ।
वहन्ति शिविकां केचिदारोहन्त्यपरे सुखम् ॥

काल-चरित्रम् ।

(१३९)

प्लवन्ते प्रस्तरा नीरे मानुषा घ्नन्ति राक्षसान् ।
कपयः कर्म्म कुर्व्वन्ति कालस्य कुटिला गतिः ॥

दैव-बलम् ।

(१४०)

विपरीते विधौ सर्व्वं वैपरीत्याय कल्पते ।
दग्धशम्बूकचूर्णानि दह्यन्ते सलिलैरपि ॥

(१४१)

न केवलं मनुष्येषु दैवं देवेष्वपि प्रभु ।
सत्यपि धनदे मित्रे चर्म्माम्बरधरो हरः ॥

(रविगुप्तस्य)

विवेकः ।

(१४२)

मृत्योर्बिभेषि किं मूढ़ भीतं मुञ्चति नो यमः ।
अजातं नैव गृह्णाति कुरु यत्नमजन्मनि ॥ (१)

विषय-भोग-दूषणम् ।

(१४३)

विषयासक्तिर्मृत्युचिन्तां विस्मारयतीत्याह :—

करिष्यामि करिष्यामि करिष्यामीति चिन्तया ।
मरिष्यामि मरिष्यामि मरिष्यामीति विस्मृतम् ॥

(१४४)

मातापितृमयो बाल्ये यौवने दयितामयः ।
वृद्धेऽपत्यमयो मूढ़ो हन्त नात्ममयः क्वचित् ॥

वैराग्यम् ।

(१४५)

मरणजीवनयोर्जीवनमेव विचित्रमित्याह :—

उद्घाटितनवद्वारे पञ्जरेऽसुविहङ्गमः ।
यत्तिष्ठति तदाश्चर्यं प्रयाणे विस्मयः कुतः ॥

(ग) हास्य-रसः ।

(१४६)

कमले कमला शेते हरः शेते हिमालये ।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥

विविध-तरङ्गः ।

आय-व्ययौ ।

(१४७)

आयं व्ययञ्च मध्यस्था व्ययमेव सुहृज्जनाः ।
ज्ञातयः शत्रवश्चैव पश्यन्त्यायं न च व्ययम् ॥

कस्तूरी ।

(१४८)

अयि त्यक्तासि कस्तूरि पामरैः पङ्कशङ्कया ।
खेदेनालं महीपालाः किं न सन्ति महीतले ॥

तुलादण्डः ।

(१४९)

स्तोकेनोन्नतिमायाति स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्तिस्तुलाकोटेः खलस्य च ॥

दारिद्र्य-विमोचनोपायः ।

(१५०)

जिता धनवता दारा जिता वस्त्रवता सभा ।
अभ्यागतो जितो गोभिर्दारिद्र्यं कृषिभिर्जितम् ॥

विद्याधनोपार्ज्जनम् ।

(१५१)

स्वल्पमपि हितकरं नोपेक्षेत इत्याह :—

क्षणशः कणशश्चैव विद्यामर्थञ्च सञ्चयेत् ।
क्षणत्यागे कुतो विद्या कणत्यागे कुतो धनम् ॥

सुजन-दुर्ज्जन-पार्थक्यम् ।

(१५२).

अधमा धनमिच्छन्ति धनमानौ च मध्यमाः ।
उत्तमा मानमिच्छन्ति मानो हि महतां धनम् ॥

इति प्रथम-प्रवाहः समाप्तः ।

उद्भट-सागरः ।

प्रथम-प्रवाहः ।

परिशिष्टम् ।

टिप्पनी ।

(३) विश्वपं—विश्वं पाति रक्षतीति विश्व+पा+कर्त्तरि ड ।

(४) तथा च "तव तत्त्वं न जानामि कीदृशोऽसि महेश्वर । यादृशस्त्वं महादेव तादृशाय नमो नमः ॥"—इति शिवस्तोत्रे ।

(५) पद्मसद्मानम्—चतुर्मुखम् । उपवीतम्—यज्ञसूत्रम् ।

(६) सरिदुदधिगतं पङ्कजेन्दीवरादीति कविसमयप्रसिद्धिः । यथा काचिन्नारी उदधिगतेन पद्मेन कर्णभूषणं रचयति तद्वदित्यर्थः ।

(७) भारति—सरस्वति । इयात्—प्राप्नुयात् । लौकिकं हि धनं व्ययितञ्चेत् चीयते, भारतीभाण्डारस्तु व्ययितोऽप्युपचीयते इति वैचित्र्यम् । तथाचोक्तं—'न दानेन चयं याति विद्यारत्नं महाधन'मिति ।

(९) खे आकाशे गच्छन्तीति खगाः पक्षिणः तेषु इन्द्रः श्रेष्ठः गरुड़ः स एव केतुचिह्नं यस्य तस्मै गरुड़वाहनाय इत्यर्थः ।

(१०) वचनीयं—निन्दावादम् । त्वदुपासनेन—उप समीपे आसनमवस्थानमुपासनम्, तव उपासनं तेन, तवेति कर्त्तरि षष्ठी । स्वपिति—निद्राति । पन्नगभोगतल्पे—सर्पफणारूपशय्यायाम् । का कथा प्राकृतजनेषु, नारायणोऽपि लक्ष्मीकुहकेन अन्धीभूतः, अन्यथा कथमनन्तशय्यामधिशेते इति भावः ।

(१२) न रक्ष्यते—सीतावद् दुःखप्राप्तिशङ्कया इति भावः । रामेण—रामनाम्ना ।

(१४) कन्दुकः—क्रीड़नविशेषः, भाँटा, गोला इति भाषा । गोपं—रक्षकम् ।

(१५) श्रितः—शरणं प्रपन्नः । गोपाल इति मत्वा—गाः पालयतीति अन्वर्थनामस्मरणात् । त्वामाश्रितानां पुरुषाणां पुनर्जन्मविरहात् मातुः स्तनक्षीरस्यापि अलभ्यत्वं, अपरप्रचुरक्षीरवाञ्छा तु सुदूरपराहतेति भावः ।

(१६) एवंविधैश्वर्यशालिनोऽपि भवतो मनो नास्तीत्येकमभावं पूरयितुं प्रार्थयते

आभीरेति। वामे सुन्दरे नयने यस्याः सा वामनयना रमणी। आभीरवामनयना गोपरमणी, तया हृतं मानसं यस्य तस्मै।

(१७) चौरस्य सारत्वं नवनीतमित्यर्थः। घनान्धतामसे—अन्धयति चक्षुष्मन्तमन्धं करोतीति अन्धं; घनं सूचिभेद्यं; घनं अन्धं यत् तमस्तेनावृतं तस्मिन्; निविड़ाज्ञानान्धकारपूर्णे इत्यर्थः। न लीयसे—आत्मगोपनं न करोषि, घनतिमिरमयस्थानस्यैव आत्मगोपनोपयोगित्वात्।

(१८) नीलाब्जस्य नीलपद्मस्य मदमोचने गर्व्वनाशके लोचने यस्याः ताम्। वापी—दीर्घिका। मरालिका—हंसी।

(१९) शिशिरकिरणः—चन्द्रः। शैलबाला—पार्व्वती। प्रेतभूमिप्रचारी—प्रेतभूमौ श्मशाने विचरति यः सः। कृपयतु—कृपां करोतु, कृपाशब्दात् करोत्यर्थे णिचि कृपि इति नामधातोः रूपम्। कोऽपि—अनिर्व्वचनीयस्वरूपः। देवः—दीव्यतीति देवो द्योतनशीलः। शिवः इति शेषः। असाधारणविशेषणप्रयोगात् विशेष्योपस्थितिः।

(२२) नगेशः—हिमालयः। धनेशः—कुवेरः। ललाटवह्निः—ललाटे वह्निर्यस्य स तस्य हतभाग्यस्येत्यर्थः। शेष:—परिणामः।

(२३) अथ शिवशरीरे भस्महेतुर्वर्ण्यते एकेति। एका भार्य्या—पार्व्वती। समररसिका—समररसं वेत्ति या सा—मधुकैटभादिवधहेतुत्वात्। द्वितीया—गङ्गा। निम्नगा—शिरसि स्थापितापि निम्नं गन्तुं शीलं यस्याः सा तथाभूता—पयसां निसर्गेण निम्नगामित्वात्। द्विरदवदनः—द्वौ रदौ दन्तौ यस्य स द्विरदो हस्ती; द्विरदवदनो गणेशः। षण्मुखः—कार्त्तिकेयः; अतः—अस्य इत्यर्थः, षष्ठी स्थाने तस्। भस्मदेहः—स्वगृहं परित्यज्य श्मशानवासीत्यर्थः।

(२४) स्वयं पञ्चमुखः शिव इति शेषः। गृहे चेत् अन्नपूर्णा न तिष्ठेदिति शेषः। तदा दिगम्बरः—दिश एव अम्बरं वस्त्रं यस्य स शिवः; निर्धन इत्यर्थः; तथा च —"दिगम्बरत्वेन निवेदितं वसु" इति कुमारे। अतएव पञ्चानन-गजानन-षड़ानन-रूपेषु बहुषु आननेषु अन्नदानासमर्थ इति भावः। एतेन अन्नपूर्णाप्रभावात् शिवगृहमपि अन्नपूर्णं जातमिति अन्वर्थनामा सा देवीत्युक्तं भवति।

(२५) यत्र यस्मिन् कर्म्मणि कृते भोगः ऐहिकं सुखं भवतीति शेषः, तत्र मोक्षो न।

(२६) जङ्गु जठरस्थिता त्वं जठरवासक्लेशं जानासीति त्वां याचते इत्यर्थः।

(२७) भागीरथीतीरे शाकलाभः इन्द्रत्वलाभादपि सुखकर इति भावः पाकशासनः—इन्द्रः।

(२८) अथ वचनभङ्ग्या गङ्गायाः पापनाशिनीं शक्तिमाह यदेति। पापानि—

जाह्नवीगामिभिर्नरैः कृतानीति शेषः । वदन्ति—जाह्नवीगामिनो नरानिति शेषः । अप्रियम्—वक्ष्यमाणं श्रुतिकटु वचनं । कृतघ्नाः—कृतानि प्राक्सम्पादितानि पापकर्म्माणि घ्नन्ति जाह्नवीसेवया विनाशयन्ति ये ते कृतघ्नास्तत्सम्बोधने, हन्तेष्टक् प्रत्ययः । नितरां—भृशं । समुत्पाद्य—जनयित्वा । स्वयमुत्पाद्य स्वयमेव हननस्य अयौक्तिकत्वात् । तथाच—"विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतमि"ति कुमारे ।

(३०) अथ रघुवंशस्य प्रथमश्लोकस्यानुरूपः श्लोको वाणीति । वाणी वाक्य, अर्थः अभिधेयः, संयुक्तौ नित्यसम्बद्धौ, प्रतिपत्तये सम्यग्ज्ञानाय, जनकौ मातापितरौ, शर्वाणी पार्वती, शशिशेखरः शिवः । अहं वागर्थाविव संयुक्तौ जगतो जनकौ शर्वाणी-शशिशेखरौ वन्दे इत्यन्वयः । वाक्यार्थौ यथा नित्यसम्बद्धौ पार्व्वतीपरमेश्वरौ अपि तथा—अर्द्धनारीश्वरमूर्त्तौ एकं परित्यज्य अपरस्य क्षणमप्यनवस्थानात् । अतएव वाक्यार्थयोः सम्यग्ज्ञानलाभाय तयोरेवाराधनमुचितमिति भावः । यतस्तौ जगतो मातापितरौ अतो वन्दे । एतेन तयोराराधने कारणान्तरमपि दर्शितम् ।

(३१) रामस्य ईश्वर इति षष्ठी तत्पुरुष इति राममतं । राम एव ईश्वरो यस्येति बहुव्रीहिरिति शिवमतम् । राम एव ईश्वर इति कर्म्मधारय इति ब्रह्ममतं । षष्ठीतत्पुरुषं वदता रामेण स्वापेक्षया शिवस्य गौरवं ज्ञापितम् । बहुव्रीहिं स्वीकुर्व्वता शिवेन तद्विपरीतं कृतम् । अथ ब्रह्मा कर्म्मधारयेण रामशिवयोरभेदं बोधितवान् ।

(३३) विन्देत्—लभेत । राजप्रसादे लब्धे सति भार्य्यां धनञ्च लभेत । भार्य्या कुतः किंनिमित्ता, धनञ्च कुतः किंनिमित्तं, प्रबलैरपहृतत्वात् विफलमेवेति भावः ।

(३४) सारगर्भैः—सारवद्भिः, पक्षे निखिलकार्य्याणां सारभूतं तत्त्वं जानद्भिः । अकुटिलैः—सरलैः, पक्षे कुटिलतादोषरहितैः । अच्छिद्रैः—नीरन्ध्रैः, पक्षे दोषशून्यैः । सुपरीक्षितैः—कृतगुणदोषविचारैः, उभयत्र तुल्यमेतत् । धार्य्यते—रक्ष्यते ।

(३५) सेकेन्दरः—आकबरापरनामधेयो भूसम्राट्, पुरन्दर इन्द्रः, एतौ विधिना तुलितौ—गुरुलाघवपरिज्ञानाय तुलादण्डे स्थापितौ । सेकेन्दरस्य धराधिपत्यं इन्द्रस्य च स्वर्गाधिपत्यं गुरुलाघवमूलकमेवेति भावः ।

(३६) आदित्यस्य तव विलोकनजनितेन खेदेन घर्म्मवारिणा मम भालस्थितानि विधिलिखितानि दुःखसूचकाक्षराणि नश्यन्तु, भवदीयकृपावलोकनेन मम दुःखानि दूरीभवन्तु इति भावः ।

(३७) निष्कलङ्कः—पक्षे कलङ्की, निरातङ्कः—निर्भयः, पक्षे राहुग्रासाद् भीतः । पद्मिनीप्राणवल्लभः—पद्मिनी सुन्दरस्त्रीविशेषः । राजमहिषी च तल्लक्षणोपेता ।

(३८) विधातृवशेन—दैवाधीनतया । मनागपि—ईषदपि । स्खलसि—भ्रष्टो

भवसि। स्वसदृशकिञ्चिद्गुणवतो निकृष्टस्य तद्गुणपराभवाय उत्कृष्टेन कदापि न चेष्टितव्यमिति भावः।

(३९) विषमं उन्नतानतं संस्थानं अवयवसन्निवेशो यस्य तादृशं वपुः। करभस्य —उष्ट्रस्य।

(४०) मोहः—मूढ़ता। वराकस्य—नीचस्य। सरीसर्त्ति—मुहुरितस्ततो गच्छति, नरीनर्त्ति—पुनः पुनः नृत्यति। तस्य ससङ्कोचमवस्थानमेव युक्तमिति भावः।

(४१) तुल्यवर्ण एकवर्णश्छदः पक्षो यस्य तादृशः। सङ्गतः—एकत्रावस्थितः।

(४२) कालिमा—कृष्णत्वम्। काकलीकोविदाः—अव्यक्तसूक्ष्ममधुरध्वनिः काकली तस्या रसज्ञाः। पुनः—किन्तु।

(४३) रसालः—चूतवृक्षः। पतत्रिणः—पक्षिणः। तन्मञ्जरीरसास्वादं—तस्य रसालस्य मञ्जरी अभिनवक्षुद्रपल्लवः तस्य रसास्वादस्तं। कुहूमुखाः—कोकिलाः।

(४४) ज्योतिरिङ्गणः—खद्योतः, "जोनाकी" इति भाषा।

(४५) खरः—गर्द्दभः। खरस्वरतया—कर्णपीड़कतीक्ष्णस्वरत्वेन हेतुना। अवरैः—नीचैः।

(४६) पुरन्दरं इन्द्रं याचते पिपासोपशमनाय जलमिति शेषः। असति प्रार्थनापूरणे पिपासया म्रियते, म्रियमाणोऽप्यन्यं न याचते इत्यर्थः।

(४८) विद्याचारित्रादिगुणैरसम्पन्नस्य तावदेव वावदूकता न यावत् महतामुदयः।

(४९) दलानाञ्च—पत्राणाञ्च। विवेकिनः—विवेचकाः। मकरन्दः—मधु।

(५०) निरातङ्कः—निर्भयः। लवणाम्भसि लवणमिश्रं अम्भो यस्य तस्मिन् समुद्रे मज्जसि हिंस्रजलचरसङ्कुलोऽयं समुद्र इत्यविमृश्यैव मग्नो भवसि। जाठरी—उदरसम्बन्धिनी।

(५१) व्यजनैः—तालवृन्तैः। आतपत्रैः—छत्रैः। कलापिनां पिच्छैः—मयूरपुच्छैः।

(५२) चरन्ति—भक्षयन्ति। अपरिग्रहाणि—नास्ति परिग्रहः अन्यस्य स्वीकारो येषां तानि, अस्वामिकानि निर्झरतोयादीनीत्यर्थः। आराधयितुं—तोषयितुम्।

(५४) विकारी—चापल्यादिविकारविशिष्टः। शफरी—क्षुद्रमत्सी, पुठीमाछ इति भाषा। फर्फरायते—अतिचपलतया फर्फरशब्दं करोति।

(५६) दक्षकाः—दक्षा एव दक्षकाः, स्वार्थे कप्रत्ययः।

(५७) सदेत्यादि—निरन्तरप्रचुरमदस्राविहस्तिमांसभोजनशीलः। अक्लृप्तं असम्पादितं अभीष्टं भक्ष्यं येन सः।

(५८) कंसारिर्विष्णु तस्य चरणोद्भूता या सिन्धुर्नदी गङ्गेति यावत् तस्याः कल्लोलैन महातरङ्गेण लालितं पोषितं ते मनः कुल्यानां क्षुद्रक्षविमसरितां नीरे जले न रमते नानुरज्यते।

(५९) नीरमिश्रक्षीरविभागे नीरं विहाय क्षीरपानरूपे कर्म्मणि हंस एव समर्थो बकस्तु नेति।

(६०) परार्थाय—परेषां प्रयोजनं साधयितुं। साधुजनाय स्वयं दुःखमनुभूय परेषां सुखमुत्पादयन्ति। तेषाञ्च सम्पदमपरे परिगृह्य भुञ्जते इति परस्परसादृश्य-मवगम्यमिति।

(६१) महीरुहाः—वृक्षाः। अर्थिनोः—याचकाः।

(६२) विश्रान्ताः अध्वगा येषु ते। शाखी—वृक्षः। श्राम्यति—विश्राममुखं लभते। कुञ्जरः—हस्ती।

(६३) अर्कवृक्षः—आकन्द इति ख्यातो वृक्षविशेषः। वर्षासु अर्कवृक्षाणां पत्रापगमो भवतीति प्रसिद्धिः।

(६४) अरिष्टानि—दुरदृष्टानि अशुभानि वा। किं—अन्येषां पादपानां वर्द्धनं सेवनञ्च निरर्थकमिति भावः।

(६७) नः अस्मभ्यं रोचन्ते। "रुच्यर्थानां प्रीयमाणः" इति चतुर्थी। गुणमयं सूत्रात्मकं प्रशंसनीयमित्यपि व्यज्यते। महात्मानोऽपि गुणमयजन्मानः परेषां गुह्य-गोपनञ्च कुर्व्वन्ति, अतस्तत्सादृश्यमेषामिति।

(७१) खरतापैः प्रखरसूर्य्यकिरणैः। अजाद्यैः छागलादिभिः।

(७२) दासेरकस्य—उष्ट्रस्य। दासी प्रीतिकरी। एतावतैव—वदर्य्या रुचिकर-त्वेनैव।

(७३) प्रथमवयसि—शैशवदशायाम्। पादे—मूलदेशे।

(७५) इतीव—अस्मात् कारणादिव। उद्भेदः—विकाशः।

(७६) पनसस्य इदं पानसं, कण्टकिफलबीजं अस्ति चेत् व्यञ्जनैः सूपादिभिः किं प्रयोजनम्।

(७८) कार्य्यज्ञः—कर्त्तव्यावधारणपटुः। अवति—रक्षति। पूरः—प्रवाहः।

(७९) एकस्यां भुवि चैव रोहत उत्पद्येते यौ तयोः। एकं अभिन्नं दलं ययोः। एककाण्डयोः—अभिन्नगुच्छयोः। शालिश्यामाकयोः—हैमन्तिकश्यामाक-धान्ययोः।

(८१) हेमगिरिणा—सुमेरुणा। रजताद्रिणा—हिमालयपर्व्वतेन। मन्यामहे—

प्रशंसाम:। आखोट:—वृक्षविशेष:, श्रेओढ़ा इति भाषा। कुटज:—कुर्चि इति भाषा।

(८२) मथितादि चतुर्णां देवासुरै:, हनूमता, कपिभि:, अगस्त्येनेति कर्तृपद-चतुष्टयं क्रमादूहनीयम्। जड़ात्मान:—जड़स्वभावा:, पक्षे डलयोरभेदात् जलात्मान इत्यपि। निस्त्रपा:—नास्ति त्रपा लज्जा येषां ते।

(८३) अध:—नीचं। मूर्ध्नि—शिरसि। रत्नं रत्नं तृणं तृणमिति पूर्व्वरत्न-तृणयोरुद्देश्यता परयो विंधेयता। अतोऽर्थभेदाभावात् न द्विरुक्तिदोष:। तवैतदा-चरणेन रत्नानामपकर्षं तृणानाञ्चोत्कर्षं न कोऽपि ज्ञास्यति, प्रत्युत तवैव दोषं कीर्त्त-यिष्यतीति भाव:। धारयसे इति धृञ्ङ्स्थितावित्यकर्म्मकस्य धृधातोर्णिजन्तरूपम्।

(८४) कूपिकां—कूपं।

(८५) हा खेदे। हेम—स्वर्णं। दहनोदरे—दहनस्य अग्नेरुदरे। शकलं खण्डम्।

(८६) गुञ्जया—गुञ्जा, कुँच इति भाषा, तया।

(८८) अनन्ताया आशाया पूरणासम्भवात् परिहार एव श्रेयानिति भाव:।

(९१) तेन काव्येन—प्रसादगुणवता सरलकाव्येन। काण्डेन—बाणेन। धन्विन:—धनुर्धारिण:। न घूर्णयति—न व्याकुलीकरोति।

(९२) अन्यसन्निधे:—अन्येषां सन्निधि: समीपावस्थानं तस्मात्, हेतौ पञ्चमी।

(९४) तुम्बीफलं—अलावु। प्लवते—सन्तरति, गुरुत्वाभावान्न निमज्ज-तीत्यर्थ:।

(९७) दष्टसत्त्वस्यैव जीवननाशनियम: खलस्तु एकं दशति अपरं विनाशयति अतो व्यालीयं अपूर्वा नवीना अपरव्यालीभ्यो विलक्षणेत्यर्थ:।

(९८) न विप्रपादोदकपङ्किलानि—येषु गृहेषु ज्ञानोपदेशकपूज्यपादब्राह्मणानां पादप्रक्षालनं न भवति, यानि गृहाणि तेषां गतायातरहितानीत्यर्थ:। स्वाहा च स्वधा च तयो: कार: करणं तेन विवर्ज्जितानि, दैवपैत्रक्रियाकाण्डशून्यानीत्यर्थ:।

(१००) गता:—मां परित्यज्य प्रस्थिता:।

(१०१) जानु आश्रयणीय मिति शेष:।

(१०४) भक्ते अनुरक्ते जने द्वेष: विराग:, पक्षे भक्ते अन्ने। जड़े मूर्खे प्रीतिरासक्ति:, पक्षे डलयोरैक्यात् जड़े जले प्रीति: तत्पानेच्छा। अरुचि: खाद्यद्रव्ये विराग:, लोकेषु अननुराग:। ज्वरिणां अन्नद्वेष: जलपिपासा च स्वत:सिद्धा। गुरुलङ्घनं महतामतिक्रम:, धनिनामेतत् स्वाभाविकं, ज्वरिणान्तु गुरुलङ्घनं महत्

लङ्घनं उपवासादिः न्याय्यमेव। मुखे च निश्चं सर्व्वदा कटुता कठोरभाषित्वं, ज्वरिणां तु कटुरसवत्ता, अतएव उभयोरेकरूपता॥

(१०६) सौम्येन—शान्तमूर्त्तिना। कष्टः—क्लेशकरः।

(१०७) काकाः कुत्रचित् किञ्चिद्भक्ष्यमासाद्य शब्दायते, तैः शब्दैरन्येऽपि काकास्तत्रोपगच्छन्तीति प्रसिद्धिः।

(१०८) असौ याचकः वायुना न नीयते तूलापेक्षया अस्य लघुत्वेऽपि स्थानात् स्थानान्तरं न प्राप्यते। कुत इत्याह स्वत इति। संसर्गमात्रेणैव यदि मां याचेत इति भयादेव।

(१०९) वैकल्यम्—मानसं विकृतभावम्। धरणीपातम्—पृथिवीपृष्ठे पतनम्। अयथोचितजल्पनम्—युक्तिविरुद्धं वाक्यम्। सन्निपातस्य—त्रिदोषात्मकस्य रोगविशेषस्य। चिह्नानि—लक्षणानि।

(१११) मुख्या—प्रधाना। गीर्व्वाणभारती—देवभाषा, संस्कृतभाषा इति यावत्।

(१२०) मदो मत्तता हिताहितविवेकशून्यत्वमिति यावत्। नामसाम्यात्—सुवर्णस्य नाम्नः साहश्यात्, धुस्तूरः कनकाऽह्वय इत्यमरात्। धुस्तूरफलं मत्ततां जनयतीति लोकप्रसिद्धमेव।

(१२३) क्ष्वेड़ं—विषम्। ईश्वरः—शिवः। ईश्वरः शिवो यथा इन्दुक्ष्वेड़ौ चन्द्रं विषञ्च गृह्णन् पूर्व्वं इन्दुं शिरसा श्लाघते शिरसि धृत्वा प्रशंसति, परं विषं कण्ठे सुरक्षति, तथा गुणी गुणदोषौ अन्येषामिति शेषः, गृह्णन् जानन् पूर्व्वं गुणं शिरसा श्लाघते शिर उन्नमय्य प्रशंसतीत्यर्थः, परं दोषं कण्ठे सुरक्षति गोपायति, नान्यस्य कस्यचित् ब्रवीतीत्यर्थः।

(१२४) एते येन येन कर्म्मणा परोपकारं कुर्व्वन्ति, तैः कर्म्मभिरेतेषां न कश्चित् स्वोपकारोऽस्तीति।

(१२५) गतव्रीड़ं—निर्लज्जं। जटिलं—चूड़ाकरणात् प्राक् केशच्छेदनाभावात् जटावन्तं। आत्मजं—शिशुसुतं।

(१२८) कर्द्दमितं स्थानं रवितेजसा शुष्कं सत् विदीर्णं भवति॥

(१२९) वराकोदरपूरणे—क्षुद्रजठरभरणे।

(१३०) यन्ता—सारथिः। विकलः—अनूरुः। विषमाः—अयुग्माः सप्तसंख्यकाः दुर्ग्राह्या इत्यपि।

(१३१) उदारस्य—दानशीलस्य। शूरस्य—वीरस्य। विरक्तस्य—वैराग्ययुक्तस्य।

निस्पृहस्य—सर्व्वथा स्पृहाशून्यस्य ब्रह्मानन्दमनुभवत इति यावत्। सर्व्वत्र तृणं तृणवत् तुच्छं भवतीत्यर्थः।

(१३२) सीदति—अवसादमाप्नोति। एकः—एकाकी। अनर्घं—अमूल्यं। हेमाश्रयं—स्वर्णसाहाय्यम्।

(१३३) निसर्गेण—स्वभावेन विशुद्धः निर्म्मलः आत्मा यस्य तादृशः सुजनः व्यजनस्य उपमा सादृश्यं यस्य सः परेषां सन्तापस्य दुःखस्य पक्षे उत्तापस्य शान्तिरेव अर्थः प्रयोजनं यस्मिन् तद् यथा तथा परिभ्रमति कार्य्यव्यापृतो वर्त्तते। व्यजनपक्षे घूर्णते।

(१३४) स्वपिति—योग्यपुत्रे भारं विन्यस्य निद्राति। सत्स्वपि दशसु पुत्रेषु भारवहनक्लेशो गर्द्दभीं न मुञ्चति।

(१४०) सर्व्वं वस्तु। वैपरीत्याय कल्पते विपरीतगुणं भवति। दग्धेत्यादि—वह्निदाहप्रशमनकारीण्यि सलिलान्यपि तेषां वह्निदाहं जनयन्तीति।

(१४१) धनदे—कुवेरे। चर्म्माम्बरधरः—शार्द्दूलचर्म्मरूपवस्त्रपरिधायी।

(१४२) अजन्मनि—अपुनरावृत्तये, मोक्षार्थमिति यावत्।

(१४५) द्वे चक्षुषी, द्वौ कर्णौ, द्वे नासिके, मुखं, पायुः, उपस्थश्च एतानि नव-द्वाराणि। असवः प्राणा एव विहङ्गमः।

(१४६) मत्कुणः—छारपोका इति भाषा।

(१४८) कस्तूरी—मृगनाभिः। पामरैः—मूढ़ैः अगुणज्ञैरिति यावत्। अलं—व्यर्थम्; "अलं व्यर्थसमर्थयोः" इत्यमरः।

(१४९) स्तोकेन—अल्पेन। तुलाकोटेः—तुलादण्डस्य।

(१५०) धनिनो वसनभूषणादिभिस्तां तोषयन्ति। विशिष्टपरिच्छदा हि सभाया-माद्रियन्ते। अभ्यागतः अतिथिः। गोभिरिति करणे तृतीया। जितः गृहस्थेनेति शेषः, दधिदुग्धादीनां सुलभत्वादिति भावः। कृषिभिः कृषकैः। कृषका हि प्रायो ग्रासाच्छादन-दुःखं नानुभवन्तीत्यर्थः।

(१५१) क्षणशः—क्षणेन क्षणेन। कणशः कणेन, कणेन। सञ्चयेदिति भौवादिकस्य चिधातो रूपम्।

उद्भट-सागरः ।

प्रथम-प्रवाहः ।

शुद्धि-पत्रम् ।

अशुद्धिः	पृष्ठम्	पङ्क्तिः	शुद्धिः
स्रोतस्त्रयैणेव	२	१४	स्रोतस्त्रयेणेव
रत्नाकरेति	५	१२	रत्नाकर इति
पूजाप्रयाससाध्य'	७	४	पूजाऽप्रयाससाध्य'
ज्येष्ठः पुत्रो	७	१८	पुत्रोऽपरको
षण्मु खोऽतो	७	१८	षण्मु खश्च
प्लवगवदनो	७	१९	च कपिवदनो
धनम्	१०	१५	धनम्
र्दुर्लेख	११	१६	र्दुर्लेख
पतत्रिणः	१३	१८	पतत्त्रिणः
पर्व्वपत्रञ्च	१९	१८	पूर्व्वपत्रञ्च
उपकर्त्तुः	२२	१६	उपकर्त्तुः
रिपदये	२४	९	रिपूदये
आदरानादरो न युक्त	२५	१५	आदरानादरौ न युक्तौ
घुर्णयति	२८	१०	घूर्णयति
त्तुन्तु	२८	२०	त्वन्तु
महाभारा भारा	२९	९	महाभारास्तथा
ब्रूवन्	३७	१७	ब्रुवन्
(१)	४१	९	परिहर्त्तव्यमिदम्
बाक्य	३	७	वाक्यं
मुख	७	२	मुखे

उद्भट-सागरः ।

द्वितीय-प्रवाहः ।

विषय-सूची ।

उद्भट-सागरः ।

द्वितीय-प्रवाहः ।

श्लोक-सूची ।

श्लोकाद्यांश:			श्लोकाङ्क:
(छ)			
छायया कति न तर्पिता	...	...	११४
(ज)			
जगत्प्राणो हरेत् प्राणान्	...	...	११५
जलस्य वह्निना वैरं विधाता	...	...	२४६
जातोऽहं जनको ममैष जननी	...	...	२१७
जामातरि कृष्णसर्पे पावके	...	...	१५१
जायमानो हरेद् दारान्	...	...	१७१
जीवनं सुखदं यत्र मरणञ्च	...	...	५८
ज्ञानं वर्द्धयति श्रियं वितनुते	...	...	२१४
(त)			
तच्छायां परमां मन्ये	...	...	२२४
तव करकमलस्थां	...	...	३
तवैव शरणागतं भवदधीन	...	...	१२४
ताताज्ञया तात वनं	...	...	१९
तिमिरारिस्तमो हन्ति	...	...	८२
तीरेऽस्मिन् शफरीं गिलन्ननुदिनं	...	...	९०
तुरगशतसहस्रं गोगणानाञ्च लक्षं	...	...	१८५
तृणे कणेऽपि ते शक्तिः	...	...	१३६
तृणैव हि मनुष्याणाम्	...	...	१३७
त्यक्तं जन्मवनं तृणाङ्कुरवती	...	...	२०४
(द)			
दग्धं खाण्डवमर्जुनेन बलिना	...	...	२५७
दिव्यं चूतरसं पीत्वा	...	...	९१

(प)

(ह)

उद्भट-सागरः ।

द्वितीय-प्रवाहः ।

देवता-तरङ्गः ।

परब्रह्मः ।

(१)

वैद्यं व्याधिविषाकुलो धनपतिं दारिद्र्यदुष्टो जनः
खाद्यञ्च क्षुधितो हिमाम्बु तृषितश्छायातरुं तापितः ।
शोकार्त्तः स्वजनं वियोगविधुरो वत्सो यथा मातरं
तद्वत् तत् सततं स्मरामि परमं ब्रह्माभिधेयं महः ॥

(उद्भटसागरस्य)

ब्रह्मा ।

(२)

कुलशैलदलं पूर्णसुवर्णगिरिकर्णिकम् ।
नमोऽधितिष्ठतेऽनन्तनालं कमलविष्टरम् ॥

(जगद्धरस्य)

सरस्वती ।

(३)

तव करकमलस्थां स्फाटिकीमक्षमालां
नखकिरणविभिन्नां दाड़िमीबीजबुद्ध्या ।
प्रतिपलमनुकर्षन् येन कीरो निषिद्धः
स भवतु मम भूत्यै वाणि ते मन्दहासः ॥

(कमलाकरस्य)

(४)

श्वश्रूं विना वृत्तिरिह स्वतन्त्रा
प्रायः स्नुषाणामपवादहेतुः ।
यद्वाक्षि लोके रमया विहीनां
सतीमपि त्वामसतीं वदन्ति ॥

विष्णुः ।

(५)

यन्नामस्मरणादेव न लक्ष्मीश्चपलायते ।
स पातु श्रीपतिर्युष्मानलक्ष्मीश्च पलायते ॥

(उद्भटसागरस्य)

(६)

उत्पाद्य यादवकुलं स्वयमेव हंसि
प्राणप्रियां जनकजां विपिने जहासि ।
सर्वस्वदं बलिमधोनयसि च्छलेन
कस्त्वां स्मरेद् यदि भयं यमजं न तिष्ठेत् ॥

लक्ष्मीः ।

(७)

कीदृशं गृहमधिवससीति नारायणेन पृष्टा लक्ष्मीराह :—

यत्राभ्यागतदानमानचरणप्रक्षालनान्नाशनं
सत्सेवा पितृदेवतार्च्चनविधिः सत्यं गवां पालनम् ।
धान्यानामपि संग्रहो न कलहश्चित्तानुरूपा प्रिया
हृष्टेत्याह हरिं वसामि कमला तत्र स्थिराऽहं सदा ॥

लक्ष्मी-चरित्रम् ।

(८)

लक्ष्मीः कथं ब्राह्मणेभ्यः कुप्यतीत्याह :—

नाथे क्षतपदघात-
स्त्वलुक्षिततातः सपत्निकासेवी ।
इति दोषादिव रोषाद्
माधवयोषा द्विजं त्यजति ॥

(९)

लक्ष्मीदेव्या आगमने गमने च गृहस्थानामवस्थाभेदं वर्णयति :—

यावदेव कमला कृपान्विता
तावदेव भवनं वधूः सुखम् ।
पौरुषान्विततनुर्जनादरो
नास्ति चेत् प्रथमवर्णवर्जितम् ॥

(१०)

निर्धना हि पण्डिताः मूर्खास्तु कथं न तथेति पृष्टा लक्ष्मीराह :—

मूर्खाय द्रविणं ददासि कमले विद्वत्सु किं मत्सरो
नाहं मत्सरिणी न चापि चपला नैवाऽस्ति मूर्खे रतिः ।
मूर्खेभ्यो द्रविणं ददामि नितरां तत्कारणं श्रूयतां
विद्वान् सर्वगुणेन भूषिततनुर्मूर्खस्य नान्या गतिः ॥

(११)

कमला कथं ब्राह्मणपण्डितान् न दयते इत्याह :—

आघातो भृगुणा कृतो निजपतेः पादेन शौरेरुर-
स्यम्भोधिं किल कुम्भसम्भवमुनिस्तातं निजं पीतवान् ।
विच्छिन्नच्छदनं प्रियं द्विजगणाः कुर्वन्ति च श्रीफल-
मित्थं ब्राह्मणदुर्नयादसदया पद्मालया तान् प्रति ॥

अनन्तः ।

(१२)

अनन्तदेवं भूकम्पनिवारणार्थमर्थयते :—

युक्तोऽसि भुवनभारे
मा वक्रां वितनु कन्धरां शेष ।
त्वय्येकस्मिन् दुःखिनि
सुखितानि भवन्ति भुवनानि ॥

रामचन्द्रः ।

(१३)

वामे भागे जनकतनया राजते यस्य नित्यं
भ्रातृप्रेमप्रवणहृदयो लक्ष्मणो दक्षिणे च ।
पादाम्भोजे पवनतनयः श्रीमुखे बद्धनेत्रः
साक्षात् ब्रह्म प्रणतवरदं रामचन्द्रं तमीडे ॥
(उद्भटसागरस्य)

(१४)

खरतरवरशरहतदशवदन
खगचर नगधर फणधरशयन ।
परपदलयकर भवभयशमन
जगदघमपहर कमलजनयन ॥

(१५)

सर्वविभक्तिमत् रामनाम स्मरति :—

रामो राजमणिः सदा विजयते रामं रमेशं भजे
रामेणाभिहता निशाचरचमू रामाय तस्मै नमः।
रामात् नास्ति शुभायनं परतरं रामस्य दासोऽस्म्यहं
रामे चित्तलयः सदा भवतु मे भो राम मामुद्धर ॥

(१६)

अहल्यां मानुषीकृत्य गच्छन्तं नदीतरणकाले नावमारुरुक्षुं रामं प्रति नाविकस्योक्तिरियम् :—

मानुषीकरणरेणुरस्ति ते
पादयोरिति कथा प्रथीयसी।
क्षालयामि तव पादपङ्कजं
नाथ दारुदृषदस्य का भिदा ॥

सीता।

(१७)

कयाचित् राक्षस्या स्वपरिचयं पृष्टा लङ्कावस्थानकाले सीता नाहं पापीयसी तेषां नामग्रहणेऽपि शक्ते ति मन्यमाना इदमाह :—

स्वरोचिषा कमलमलङ्करोति य-
स्तदन्वये द्विशरशताङ्ग एकराट्।
तदात्मजौ विपिनचरौ तयो रमा
यमाह च स्वरविगमेऽस्मि तद्वधूः ॥

(१८)

मायामृगं निहत्य पर्णशालामागतो रामचन्द्रः सीतामपश्यन् यदि नाम परिहासच्छलेन क्वापि लुकायिता भवेदिति विचिन्त्य सीतामुद्दिश्याह :—

वितर वितर वाचं क्वास सीते गता त्वं
विरमतु परिहासः सर्वथा दुःसहो मे ।
त्वमसि खलु तनूजा हन्त सर्वंसहाया
सुतविरहविमुक्तप्राणराजात्मजोऽहम् ॥

कौशल्या ।

(१९)

वनगमनकाले रामं प्रति कौशल्योक्तिरियम् :—

तातान्वया तात वनं प्रयाहि
व्याजेन बाल क्षणमत्र तिष्ठ ।
पन्थानमावेदयितुं मदीयाः
प्राणा बहिर्भूय पुरःसरन्तु ॥

कृष्णः ।

(२०)

यां स्नात्वा यमुनां पिपासुरनिशं व्यूहो गवां गाहते
विद्युत्वानिति नीलकण्ठनिवहो यां द्रष्टुमुत्कण्ठते ।

उत्तंसाय तमालपल्लवमिति च्छिन्दन्ति यां गोपिकाः
कान्तिः कालियशासनस्य वपुषः सा पावनी पातु वः ॥

(२१)

विधीयते यद् यदुनन्दनेन
नापेक्ष्यते तत्र सहायशक्तिः ।
पञ्चालबालाञ्चलदीर्घतायां
न तत्र तन्तुर्न च तन्तुवायः ॥

(२२)

स्यात् कृष्णनामचरितादिसिताऽपविद्या-
पित्तोपतप्तरसनस्य न रोचिकैव ।
किन्त्वादरादनुदिनं खलु सैव सेव्या
स्वाद्वी भवेदपि च तद्गदमूलहन्त्री ॥

(२३)

हरिचरणमाश्रितानां शत्रुभावी नास्तेव इत्याह :—

अरुणोपरि विधुपालो
तदुभयपार्श्वे तमःस्तोमः ।
हरिचरणभजनगुणोऽयं
शात्रवमात्रं न कुत्रापि ॥

(२४)

पथि धावन्निह पतितो
रोदिष्यम्बाकरावलम्बाय ।
पतितोद्धारणसमये
किमात्मानं न त्वं स्मरसि ॥

(२५)

भगवत्समीपे भक्तस्य निवेदनमेतत् :—

आनीता नटवन्मया तव पुरः श्रीकृष्ण या भूमिका
व्योमाकाशखखाम्बराब्धिवसवस्त्वत्प्रीतयेऽद्यावधि ।
प्रीतो यद्यपि ताः समीक्ष्य भगवन् यद् वाञ्छितं देहि मे
नो चेद् ब्रूहि कदापि मानय पुनर्मामीदृशीं भूमिकाम् ॥

कृष्ण-लीला ।

(२६)

श्रीकृष्णस्य चूडायाः कथं वामवक्रता इत्याह: —

यद् ध्यायेत् सततं विधिः पदयुगं नाभ्यम्बुजे संस्थितो
गङ्गां यत्पदसम्भवां स्मररिपुर्धत्ते स्वशीर्षे सदा ।
यन्नित्यं कमला च सेवति परं यत्नेन पादद्वयं
तद् द्रष्टुं कमलापतेः सुकुटिला वामा च चूड़ा चिरम् ॥

मुरली ।

(२७)

गुरुजनपरिचर्य्याधैर्य्यगाम्भीर्य्यलज्जा
निजनिजगृहकर्म्म स्वामिनि प्रेमसेवा ।
इति कुलरमणीनां वर्त्म जानन्ति सर्व्वा
मुरमथन समस्तं हंसि वंशीरवेण ॥

कृष्णविरहे गोकुलावस्था ।

(२८)

कृष्णविरहेण व्रजवासिनां गोपानां गोपीगणानाञ्च अवस्थां वर्णयत उद्धवस्योक्तिरियम् :—

दोहः प्रायो न भवति गवां दोहनञ्चेन्न पाकः
क्षीराणां स्यात् स यदि घटते दुर्लभं तद्दधित्वम् ।
दध्नः सिद्धौ क्व खलु मथनं मन्थने क्वोपयोगः-
तक्रादीनामिति गतिरभूदद्य गोधुग्गृहेषु ॥

राधिका ।

(२९)

धन्येयं धरणी ततोऽपि मथुरा तत्रापि वृन्दावनं
तत्रापि व्रजवासभाग्युवतयस्तत्रापि गोपाङ्गनाः ॥
तत्राचिन्त्यगुणैकधामपरमानन्दात्मिका राधिका
लावण्याम्बुनिधिस्त्रिलोकरमणीचूड़ामणी काचन ॥

(भट्टमाधवस्य)

(३०)

सखीं प्रति राधिकाया खेदोक्तिरियम् :—

न कालिन्दीनीरं नवजलधरं नीलनलिनं
वयस्यां श्यामाभां पिकमधुकरौ गञ्जनभिया ।
दृशोरग्रे कुर्व्वे तदपि सखि मर्म्माण्यविरतं
ननान्दुर्दृग्भङ्गी हरि हरि भुजङ्गी दशति मे ॥

यशोदा ।

(३१)

यशोदया समा कापि देवता नास्ति भूतले ।
उदूखले यया बद्धो मुक्तिदो मुक्तिमिच्छति ॥

गोपी ।

(३२)

यस्य तनूरुहकुहरे
नटनं ब्रह्माण्डकोटीनाम् ।
तमिमं गोपकृशाङ्गी-
लोचनभङ्गी विघूर्णयति ॥

(३३)

वृन्दावनं विहाय मथुरामागतं कृष्णं प्रति गोपीनामुक्तिरियम् :—

भक्तिप्रीतिप्रणयसहितं मानदम्भादुपेतं
चेतोऽस्माकं गुणवदगुणं गोदुहामङ्गमेतत् ।
विक्रीतं ते युगपदुभयं स्वीकृतं तत् त्वयाथ
हृद् गृह्णासि त्यजसि च वपुर्नाथ कोऽयं विचारः ॥

बलरामः ।

(३४)

कदाचिद् भगवतो जगन्नाथदेवस्य रथयात्रायां सहसा रथात् पतितं बलरामं विलोक्य पुरीराजेन चलद्दृविष्णुना "औत्पातिकम्" इति सभयमुक्तम्। तत्रावस्थितो जगन्नाथतर्कपञ्चाननस्तदाकर्ण्य "औत्पातिकम्" इत्यस्य वक्ष्यमाणश्लोकेन पूरणं कृतवान् :—

औत्पातिकं तदिह देव विचिन्तनीयं
नारायणो यदि पतेदथवा सुभद्रा ।

कादम्बरीमदविघूर्णितलोचनस्य
युक्तं हि लाङ्गलभृतः पतनं पृथिव्याम् ॥
(जगन्नाथतर्कपञ्चाननस्य)

शिवः ।

(३५)

चन्द्रार्द्धशोभितललाट महामहिम्नः
किं ब्रूम ईश्वर गुणान् गुणसागरस्य ।
त्वन्नामकीर्त्तिपरिकीर्त्तनयत्न एष
पादाब्जरेणुमभिवाञ्छति पूर्णचन्द्रः ॥
(उद्भटसागरस्य)

(३६)

अनुप्रासमुखेन शिवं स्तौति :—

कल्पान्तक्रूरकेलिः क्रतुकदनकरः कुन्दकर्पूरकान्तिः
क्रीड़न् कैलासकूटे कलितकुमुदिनीकामुकः कान्तकायः ।
कङ्कालक्रीड़नोत्कः कलितकलकलः कालकालीकलत्रः
कालिन्दीकालकण्ठः कलयतु कुशलं कोऽपि कापालिकः कौ ॥

---

(३७)

कश्चित् शिवं आक्षिप्य कथयति देव तव पारिषदानां मध्ये एतादृशः कोऽपि नास्ति यो मम दुःखं तवान्तिके निवेदयेत् :—

दोषाकरः शिरसि भाति गले द्विजिह्वः
पाषाणजा सहचरी पशुरन्तरङ्गः ।
दुःखं निवेदयति को भवदन्तिके मे
त्वञ्च त्रिलोचन निमीलितलोचनोऽसि ॥

(३८)

भूषा भस्मभुजङ्गमास्थिनिचयः स्थानं श्मशानं प्रियं
त्रैलोक्यापचयोद्यतं विषमपि त्यक्त्वाऽमृतं स्वीकृतम् ।
यत् त्यक्तं सकलैः सुरासुरनरैस्तत्ते प्रियं प्रायश-
स्त्यक्तुं नार्हसि देव मामपि यतस्त्यक्तोऽस्मि सर्वैः प्रभो ॥

(३९)

कस्यचित् शैवस्य खेदोक्तिरियम् :—

एतज्जन्मनि वित्तवस्त्वमतुलं जन्मान्तरे शम्भुता
शम्भो सेवनया तवेत्यवहृतं व्यासादिवाक्यैर्मया ।
त्वत्सेवाविधिनैव सम्प्रति गतं जन्मैव न श्रीरभूद्-
देवाज्ञापय पारलौकिककथाऽप्येवं यथार्था न किम् ॥

शिवलीला ।

(४०)

शिवस्य चन्द्रकलाधारणकारणं कथयति :—

गङ्गाजलनयनानल-
मिलनादेकत्र नैव कल्याणम् ।
तत् किं धूर्ज्जटिमूर्द्धनि
मध्यस्था वैधवी लेखा ॥

(४१)

शिवस्य मन्मथदेहत्वकारणमाह :—

काली कान्ता विषमनयना सर्वदा युद्धशीला
पुत्रोऽप्येकः करिवरमुखो षण्मुखश्च द्वितीयः ।
भृत्योऽपि स्यात् कपिवरमुखो वाहनं वृद्ध उक्षा
स्मारं स्मारं स्वगृहचरितं मन्मयो विश्वनाथः ॥

(४२)

शिवस्य विषपानकारणं कथयति :—

वृद्धोक्षः प्रपलायते प्रतिदिनं सिंहावलोकाद् भिया
पश्यन् मत्तमयूरमन्तिकचरं भूषाभुजङ्गव्रजः ।
कृत्तिं कृन्तति मूषिकोऽपि रजनौ भिक्षान्नमाभक्षयन्
दुःखेनेति दिगम्बरः स्मरहरो हालाहलं पीतवान् ॥

(४३)

श्मशानवासिनः शिवस्य गृहस्थाश्रमवासकारणमाह :—

उज्झित्वा दिशमम्बरं वरतरं वासो वसानश्चिरं
हित्वा वासरसं पुनः पितृवने कैलासहर्म्याश्रयः ।
त्यक्त्वा भस्म कृताङ्गरागनिचयः श्रीखण्डसारद्रवै-
र्देवेशोऽपि हिमाद्रिजापरिणयं कृत्वा गृहस्थः शिवः ॥

(४४)

शिवस्य भिक्षाकरणप्रवृत्तेः कारणं कथयति :—

सीमन्तिनी यस्य गृहेऽन्नपूर्णा
त्रिलोकरक्षां कुरुतेऽन्नदानैः ।
संभिक्षते सोऽपि कपालपाणि-
र्ललाटलेखा न पुनः प्रयाति ॥

अर्द्धनारीश्वरः ।

(४५)

शिवस्य अर्द्धनारीश्वरत्वग्रहणकारणं कथयति :—

गरलपानजनिर्भरसंज्वरं
वपुरवेक्ष्य हरस्य हरप्रिया ।
हिमयितुं हिमभूमिधरात्मजा
किमु तदर्द्धमयी करुणामयी ॥

पार्वती ।

(४६)

निर्वाणदानगीर्वाणसर्वगर्वापहारिणि ।
कर्म्मनिर्म्मूलनार्थाय दयस्व विन्ध्यवासिनि ॥

(उद्भटसागरस्य)

(४७)

दुर्गानामोच्चारणमहिमानं दर्शयति :—

शूलं शूली चक्रमादाय चक्री
दण्डं दण्डी वज्रमस्त्रञ्च वज्री ।
धावन्त्यग्रे पृष्ठतः पार्श्वतश्च
दुर्गादुर्गावादिनो रक्षणाय ॥

(४८)

देव्या लोकविरुद्धं भावं वर्णयन् तस्या एवानुग्रहं याचते भक्तः :—

स्त्रीरूपाऽपि दिगम्बरा त्रिजगतो माताऽपि सद्यौवना
कन्याऽद्रेरपि कोमला त्रिजगति व्याप्ताऽप्यदृश्या जनैः ।
साध्वी च क्रमते स्वभर्त्तृहृदयं श्यामा जगन्मोहिनी
चित्रं रूपमवस्थितं भवतु ते मत्सम्पदे सर्वदा ॥

शक्तिलीला ।

(४९)

कथं नाम दुर्गा दशभुजेत्युत्प्रेक्षते :—

पशुपतेरखिलेषु गलेषु सा
युगपदर्पयितुं कुसुमस्रजम् ।
परिणये द्विभुजा हिमशैलजा
दशभुजा किमभूदपि लीलया ॥

(५०)

शिवस्य वचोदेशे कालीमूर्त्तिधारणस्य कारणं कथयति :—

मातः कालि तवाऽङ्घ्रिफुल्लकमलं कैवल्यदं शीतलं
संन्यस्योरसि कालकूटकवलज्वालापनुत्त्यै हरः ।
कालग्रासविनाशकारिणि करालास्ये महेशप्रिये
संप्राप्याऽतुलनिर्वृतिं किमु भयादद्यापि तन्नोज्झति ॥

(५१)

स्वर्गौकसां स्तुतिगिराऽभिनवेन्दुचूड-
वचोऽधिरूढचरणा शरणागतानाम् ।
संग्राममुक्तवसना दशनाग्रदष्टा
नम्रप्रसारिरसनाऽतिह्रियेव काली ॥

गङ्गा ।

(५२)

याविर्भूता मुरहरपदात् शम्भोः शिरोराजिनी
या त्रैलोक्ये विहरणपरा कुण्ड्यां विधेः स्थायिनी ।
या स्वं गर्भं समधिवसतां गर्भाग्निविध्वंसिनी
सा मन्दस्य प्रभवतु ममाऽनन्दाय मन्दाकिनी ॥

(उद्भटसागरस्य)

(५३)

गङ्गे तव महिमानं
वक्तुं मनीशः फणीशोऽपि ।
वितरसि तत् पदमच्युत-
मच्युतपदपरिच्युताऽपि त्वम् ॥

(५४)

स्थापितमपहरतीयं
मा कुरु विश्वासमेतस्याम् ।
इह हि समर्पितवपुषो
न भवति वपुषः पुनर्लाभः ॥

(५५)

निधानं धर्म्माणां किमपि च विधानं नवमुदां
प्रधानं तीर्थानाममलपरिधानं त्रिजगतः ।
समाधानं बुद्धेरथ खलु तिरोधानमधियां
श्रियामाधानं नः परिहरतु तापं तव तनुः ॥
(पण्डितराजजगन्नाथस्य)

(५६)

गङ्गाया दर्शनान्मुक्तिरित्याह :—

देहस्नेहो यदि तव सखे मद्वचः पालनीयं
गङ्गां द्रष्टुं कथमपि न तत्सन्निधौ यास्यसि त्वम् ।
मुक्तिव्याघ्री तदुभयतटव्यापिनी चित्ररूपा
तत्रायान्तं ग्रसति न पुनर्देहसम्बन्धगन्धः ॥

हरशिरश्चन्द्रः ।

(५७)

शिवशिरसि स्थिता शशिकला कथं क्षीणाऽसीति केनचित् पृष्टा पृच्छन्तं प्रत्याह :—

वासः समं नेत्रहुताशनेन
गर्जन् फणीन्द्रो भयमातनोति ।
किं पृच्छसि त्वं वपुषः कृशत्वं
भागीरथी जीवनमादधाति ॥

काशीधाम-महिमा ।

(५८)

जीवनं सुखदं यत्र मरणञ्च ततोऽधिकम् ।
नौमि तां मुक्तिदां काशीं यत्रास्ति सशिवः शिवः ॥

(उद्भटसागरस्य)

मूर्त्तित्रयम् ।

(५९)

विधाता चेत् स्रष्टा सृजतु शुभकार्य्यं मम शतं
हरिश्चेत् पाता मां जनिमृतिभयात् पातु नियतम् ।
हरश्चेत् संहर्त्ता हरतु मम पापं निरवधि
यतन्तां ते सर्व्वे मम सकरुणं मोचनविधौ ॥

(उद्भटसागरस्य)

हरिहर-मूर्त्तिः ।

(६०)

हरिहरमूर्त्तिं वर्णयति :—

विहगपुङ्गवपुङ्गववाहनं
मकरकुण्डलि कुण्डलिकुण्डलि ।
वपुरुमाधवमाधवयोरिदं
जयति चन्द्रकिचन्द्रकि चन्द्रकि ॥

---

(१) कृष्णयशोदा-प्रश्नोत्तराणि ।

(६१)

कृष्णेनाऽम्ब गतेन रन्तुमधुना मृद् भक्षिता स्वेच्छया
सत्यं कृष्ण क एवमाह मुषली मिथ्याऽम्ब पश्याऽननम् ।
व्यादेहीति विकाशितेऽथ वदने दृष्ट्वा समस्तं जगत्
माता यस्य जगाम विस्मयरसं पायात् स वः केशवः ॥

---

(२) दुर्गाकार्त्तिकेय-प्रश्नोत्तराणि ।

(६२)

चापल्यादिह वः सदाऽस्मि विधुरा यास्यामि तातालयं
तातस्ते जनयित्रि को गिरिगणस्येशो हि तातो मम ।
मातस्त्वं किमहो गिरीशदुहितेत्याभाषमाणे गुहे
प्रोन्मीलत्स्मितमुग्धनम्रवदना गौरी चिरं पातु वः ॥

(प्रेमचन्द्रतर्कवागीशस्य)

---

(३) बलिवामन-प्रश्नोत्तराणि ।

(६३)

कस्त्वं खर्व द्विजोऽहं कुत इह नृपतेर्दक्षिणार्थी मखेऽस्मिन्
स्वर्णं गां वा गृहाण त्रिपदपरिमितां भूमिमभ्यर्थयेऽहम् ।
तुभ्यं दत्तेति यावद् वदति बलिरसौ तावदेव त्रिपादै-
स्त्रैलोक्याक्रान्तमूर्त्तिः प्रहसितवदनो वामनः पातु युष्मान् ॥

---

(४) भरतकैकेयी-प्रश्नोत्तराणि ।

(६४)

मातस्तातः क्व यातः सुरपतिभवनं हा कुतः पुत्रशोकात्
कोऽसौ पुत्रश्चतुर्णां त्वमवरजतया यस्य जातः किमस्य ।
प्राप्तोऽसौ काननान्तं किमिति नृपगिरा किं तथासौ बभाषे
मद्वाग्बद्धः फलं ते किमिह तव धराधीशता हा हतोऽस्मि ॥

(हनुमतः)

---

(५) राधाकृष्ण-प्रश्नोत्तराणि ।

(६५)

राधे त्वं परिमुञ्च नीलवसनं प्रारुह्य नावं मम
वातो वारिदसंभ्रमाद् यदि वहेन्मग्ना भवेन्नौरियम् ।
शुक्लं तद् वसनान्तरं परिदधास्यादौ तवेदं वपुः
श्यामं श्याम नवीननीरदसमं तन्मेः समाच्छाद्यताम् ॥

(६६)

राधे चौर्य्यगुणाऽसि केशव हृतं किं ते परस्यैव वा
हंसीजानु मृगीक्षणं विधुसुधा कुम्भीशकुम्भद्वयम् ।
मच्चित्तं हरिमध्यकं विधिकृतं वस्त्रादिचौर्य्यं न मे
राधाया इतिवाक्यमुग्धहृदयो राधापतिः पातु वः ॥

---

(६) राधागोपिका-प्रश्नोत्तराणि ।

(६७)

नन्दगोपगृहपण्यवीथिका-
मालि यामि वद किं तवाऽनये ।
नीलमुज्ज्वलगुणं मनोहर-
मानयस्व सखि केशवन्धनम् ॥

---

(७) लक्ष्मीपार्वती-प्रश्नोत्तराणि ।

(६८)

भिक्षुः क्वास्ति बलेर्मखे पशुपतिः किं नास्त्यसौ गोकुले
मुग्धे पन्नगभूषणः सखि सदा शेते स शेषोपरि ।
दुर्गे मुञ्च विषादमाशु कमले नाहं प्रकृत्या चला
चेत्थं श्रीगिरिजासमुद्रसुतयोर्वाक्चातुरी पातु वः ॥

(६९)

हे गङ्गाधरपत्नि चक्रिवधु किं कुत्राऽस्त्यसौ नर्त्तको
वृन्दारण्यभुवि क्व सर्पकुतुकी स्यात् कालियस्य ह्रदे ।
भिक्षुः कुत्र गतोऽस्ति यज्ञसदने क्वासौ विषादी वकी-
क्रोड़े स्यादिति पद्मजागिरिजयोर्वाग्भङ्ग्यः पान्तु वः ॥

---

(८) विष्णुशस्त्र-प्रश्नोत्तराणि ।

(७०)

चक्र ब्रूहि विभो गदे जय हरे कम्बो समाज्ञापय
भो भो नन्दक जीव पन्नगरिपो किं नाथ भिन्नो मया ।
को दैत्यः कतमो हिरण्यकशिपुः सत्यं भवद्भिः शपे
केनास्त्रेण नखैरिति प्रवदतो विष्णोर्मुखं पातु वः ॥

(९) हरपार्वती-प्रश्नोत्तराणि ।

(७१)

मौलौ किं नु महेश मानिनि जलं किं वक्त्रमम्भोरुहं
किं नीलालकवेणिका मधुकरी किं भ्रूलता वीचिका ।
किं नेत्रे शफरौ किमु स्तनयुगं रम्यं रथाङ्गद्वयं
सासूयामिति गोपयन् गिरिसुतां गङ्गाधरः पातु वः ॥

(७२)

निशि तमसि समुपस्थितं शिवमवलोक्य पार्वती जिज्ञासते शिवोऽपि तां प्रत्याह :—

केयं मूर्द्धन्यन्धकारे तिमिरमिह कुतः सुभ्रु कान्तेन्दुयुक्ते
कान्ताऽप्यत्रास्ति काचिन्ननु भवतु मया पृष्टमेतावदेव ।
नाहं द्वन्द्वं करोमीत्यपनय शिरसस्तूर्णमेनामिदानी-
मित्थं प्रोक्तो भवान्या प्रतिवचनजितः पातु वश्चन्द्रचूडः ॥

(७३)

भिक्षाटनात् प्रतिनिवृत्य सायं गृहागतं शिवं पार्वती पृच्छति। सोऽपि तां प्रतिवक्ति कस्त्वमित्यादि :—

कस्त्वं भो रजनीमुखे पशुपतिः किं मे हरिर्वाहनं
देवोमापतिरत्र नास्ति कमला शूली न वैद्यालयः।
भीमोऽहं गिरिराजपुत्रि चपले न द्रौपदीमन्दिर-
मित्थं तत्परिहासकेलिकलया मुग्धो हरः पातु वः॥

(७४)

कस्मात् पार्वति निष्ठुराऽसि सहजं शैलोद्भवानामिदं
निःस्नेहाऽसि कुतो न भस्मपरुषः स्नेहं क्वचिद् विन्दति।
कोपस्ते मयि निष्फलः प्रियतमे स्थाणोः फलं किं भवे-
दित्थं निर्वचनीकृतो दयितया शम्भुः शिवायाऽस्तु वः॥

(७५)

कस्त्वं शूली मृगय भिषजं नीलकण्ठः प्रियेऽहं
केकामेकां कुरु पशुपतिर्लाङ्गूलं ते कथं न।
स्थाणुर्मुग्धे न वदति तरुर्जीवितेशः शिवाया
गच्छाटव्यामिति हतवचाः पातु वश्चन्द्रचूड़ः॥

जीव-तरङ्गः ।

राजा ।

(७६)

इन्द्रात् प्रभुत्वं ज्वलनात् प्रतापं
क्रोधं यमाद् वैश्रवणाच्च वित्तम् ।
पराक्रमं रामजनार्दनाभ्या-
मादाय राज्ञः क्रियते शरीरम् ॥

राजसभा ।

(७७)

अन्धा विद्वज्जनैर्हीना मूका कविभिरुज्झिता ।
बधिरा गायनैर्हीना सभा भवति भूभृताम् ॥
(भट्टमल्लस्य)

मन्त्री ।

(७८)

अमात्यः स सदा श्रेयान् काकिनीं यः प्रवर्द्धयेत् ।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥

साधारण-राजस्तुतिः ।

(७९)

लक्ष्मीः स्थिरा क्वचिदहो क्वचिदेव वाणी
नैकत्र धीर वसतः सततं विरोधात् ।
चित्रं परं तदुभयोस्त्वयि सन्निवेशो
मन्ये तवास्ति हृदये भगवान् मुकुन्दः ॥

(८०)

दुर्य्योधनः सकर्णोऽसि हृदि शल्योऽसि विद्विषाम् ।
सकृपो धृतराष्ट्रोऽसि त्वमेकः कौरवायसे ॥

(८१)

द्वारं खड्गिभिरावृतं बहिरपि प्रस्विन्नगण्डैर्गजै-
रन्तः कञ्चुकिभिः स्फुरन्मणिधरैरध्यासिता भूमयः ।
आक्रान्तं महिषीभिरेव शयनं त्वद्विद्विषां मन्दिरे
राजन् सैव चिरन्तनप्रणयिनी शून्येऽपि राज्यस्थितिः ॥

जन्तुवर्गः ।

काकः ।

(८२)

तिमिरारिस्तमो हन्ति तेन शङ्कितमानसाः ।
वयं काका वयं काका रटन्तीति प्रगे द्विकाः ॥

(८३)

नो चारू चरणौ न चापि रुचिरा चञ्चुर्न रुच्यो रवो
नो लीलाललिता गतिर्न च शुचिः पक्षग्रहोऽयं तव ।
श्रोतृश्रुत्यतिदुर्भगं रवमिह स्थाने वृथैवोद्गिरन्
मूर्ख ध्वाङ्क्ष न लज्जसेऽप्यसदृशं पाण्डित्यमुन्नाटयन् ॥

कोकिलः ।

(८४)

पिकः कृष्णो नित्यं परमरुणया पश्यति दृशा
परापत्यद्वेषी स्वसुतमपि नो पालयति यः ।
तथाप्येषोऽमीषां सकलजगतां वल्लभतमो
न दोषा गण्यन्ते मधुरवचसां केनचिदपि ॥

चक्रवाकः ।

(८५)

कथय किमपि दृष्टं स्थानमस्ति श्रुतं वा
व्रजति दिनकरोऽयं यत्र नास्तं कदाचित् ।
इति विहगसमूहान् सादरं वक्ति नित्यं
रजनिविरहभीतश्चक्रवाको वराकः ॥

चक्रवाकी ।

(८६)

रात्रौ विरहिणी चक्रवाकी दिवा चक्रवाकेण सह कृतं कार्य्यं स्मरन्ती विलपति :—

कवलितमिह नालं कन्दलश्चेह दृष्ट-
मिह हि कुमुदकोषे पीतमम्भः सुशीतम् ।
इति विलपति रात्रौ पर्य्यटन्ती तटान्ते
सहचरपरिमुक्ता चक्रवाकी वराकी ॥

चातकः ।

(८७)

वंशगौरवं सर्वथा रक्षणीयमित्याह :—

शक्यते येन केनाऽपि जीवनेनैव जीवितुम् ।
किन्तु कौलव्रतोच्छेदप्रसङ्गः परदुःसहः ॥

छागः ।

(८८)

व्याघ्रं नैव गजं नैव सिंहं नैव च नैव च ।
अजापुत्रं बलिं दद्याद् देवो दुर्बलघातकः ॥

दात्यूहः ।

(८९)

प्रावृट्काले गृहं त्यक्त्वा सुखी को वा भवेत् क्व वा ।
इतीरयति दात्यूहः को वा को वा क्व वा क्व वा ॥

बकः ।

(९०)

तीरेऽस्मिन् शफरीं गिलन्ननुदिनं गाम्भीर्य्यमम्भोनिधे-
र्विज्ञातुं कथमुद्यतोऽसि बक हे निक्षिप्य चञ्चूपुटम् ॥
यो मग्नामिह मेदिनीमुदहरत् कल्पान्तनीरस्थितां
जानीते यदि केवलं स भगवान् कोलावतारो हरिः ॥

भेक: ।

(८१)

दिव्यं चूतरसं पीत्वा गर्वं नाप्नोति कोकिलः ।
पीत्वा कर्दमपानीयं भेको मकमकायते ॥

(८२)

भेक: स्वावासकूपे दैवादागतं राजहंसं विलोक्य कथयति ; राजहंसस्य च प्रत्युक्तिः :—

रे पक्षिन्नागतस्त्वं कुत इह सरसस्तत् कियद् भो विशालं
किं मद्धाम्नोऽपि वाढं नहि न हि सुमहत् पाप मा ब्रूहि मिथ्या ।
इत्थं कूपोदरस्थः शपति तटगतं दर्दुरो राजहंसं
नीचः स्वल्पेन गर्वी भवति सुविषमं नापरो येन दृष्टः ॥

भ्रमर: ।

(८३)

पलाशकुसुमभ्रान्त्या शुकतुण्डे पतत्यलिः ।
सोऽपि जम्बूफलभ्रान्त्या तमलिं धर्त्तुमिच्छति ॥

मत्स्यरङ्कः ।

(८४)

सरटकुररकङ्काः काककादम्बहंसा
अहिनकुलमनुष्याः के न खादन्ति मत्स्यान् ।
अहमतितनुजीवी क्षीणमीनोपभोजी
जगति विदितमेतद् मत्स्यरङ्कः कलङ्की ॥

मयूरः ।

(८५)

अस्मान् विचित्रवपुषश्चिरपृष्ठलग्नान्
कस्माद् विमुञ्चसि विभो नहि मुञ्च मुञ्च ।
हा हन्त केकिवर हानिरियं तवैव
गोपालमौलिमुकुटे भविता स्थितिर्नः ॥
(राममाणिक्यविद्यालङ्कारस्य)

(८६)

केका कर्णामृतं ते कुसुमितकबरीकान्तिहारी कलापः
कण्ठच्छाया पुरारेर्गलरुचिरुचिरा सौहृदं मेघसंघैः ।
विश्वद्वेषिद्विजिह्वस्फुरदुरुपिशितैर्नित्यमाहारवृत्तिः
कैः पुण्यैः प्राप्यते तत् सकलमपि सखे चित्तवृत्तं मयूर ॥
(शार्ङ्गधरस्य)

२

शङ्खः ।

(९७)

पिता रत्नाकरो यस्य कमला यस्य सोदरा ।
शङ्खो रोदिति भिक्षार्थी फलं भाग्यानुसारतः ॥
(भट्टगोविन्दराजस्य)

शशकः ।

(९८)

न कोऽपि दैवमतिवर्त्तते :—

सिंहिकासुतसन्त्रस्तः शशः शीतांशुमाश्रितः ।
जग्रास साश्रयं तत्र तमन्यः सिंहिकासुतः ॥

शृगालः ।

(९९)

प्रत्याशं प्रतिपद्धति प्रतिपलं चञ्चूर्य्यमाणो मुदा
त्वं शार्दूलरवानुकारिनिनदं कत्लाऽध्वगांस्त्रासय ।
यस्तत्त्वं तव वेत्ति फेरव महान् यत्नोऽपि तस्मिन् मुधा
तस्मात् संवृत एव तिष्ठ न यथा पान्थैः स्फुटं ज्ञायसे ॥

सर्पः ।

(१००)

वासः सार्द्धं मलयजगणैः कोमलस्पर्शमङ्गं
वृत्तिर्वायुः प्रयतपवनैः मस्तकं रत्नयुक्तम् ।
तत्राप्याशीविष इति जनैस्त्यज्यते नाममात्रात्
निन्द्यः सर्वो भवति नितरामास्यदोषेण दुष्टः ॥

सिंहः ।

(१०१)

एणः क्रीडति शूकरश्च खनति द्वीपी च गर्वायते
क्रोष्टा क्रन्दति वल्गतीह शशको वेगाद् रुरुर्धावति ।
निःशङ्कैः करिपोतकैर्गिरितटश्चोत्पाट्यते लीलया
हंहो सिंह विना त्वयाऽद्य विपिने कीदृग् दशा वर्त्तते ॥

हंसः ।

(१०२)

"तत्तस्य किमपि द्रव्यं यो हि यस्य प्रियो जनः" इति दृष्टान्तेन द्रढ़यति अस्तीति :—

अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।
रमते न मरालस्य मानसं मानसं विना ॥

(१०३)

पुरा सरसि मानसे विकचपङ्कजालिस्खलत्-
परागधवलीकृते पयसि येन नीतं वयः ।
स पल्वलजलेऽधुना मिलदनेकभेकाकुले
मरालकुलनायको विवदने त्रिधौ वर्त्तते ॥

हरिणः ।

(१०४)

त्यक्तं जन्मवनं तृणाङ्कुरवती मातेव मुक्ता स्थली
विश्रामस्थितिहेतवो न गणिता बन्धूपमाः पादपाः ।
बालापत्यवियोगकातरमुखी त्यक्ताऽर्द्धमार्गे मृगी
पश्यन्तः पदवीं तथाप्यकरुणव्याधा न मुञ्चन्ति माम् ॥

हस्ती ।

(१०५)

कश्चिदर्थी कस्यचित् धनिनो गृहात् हताशः प्रतिनिवर्त्तमानस्तमिदमाह :—

पानार्थिनो मधुकरा यदि कर्णवातैः-
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥

उद्भित्-तरङ्गः ।

सामान्य-वृक्षः ।

(१०६)

नूतनैर्दलसन्दोहैस्तरुर्यैरेव शोभते ।
जहाति जीर्णांस्तानेव किं वा चित्रं कुजन्मनः ॥

(उपाध्यायोदयस्य)

आम्रः ।

(१०७)

येऽमी ते कुसुमोद्गमादनुदिनं त्वामाश्रिताः षट्पदा-
स्ते भ्राम्यन्ति फलाद् वहिर्बहिरिमान् दृष्ट्वा न संभाषसे ।
ये कीटास्तव दृक्पथञ्च न गतास्ते त्वत्फलाभ्यन्तरे
धिक् त्वां चूततरो परापरपरिज्ञानानभिज्ञो भवान् ॥

इक्षुः ।

(१०८)

परार्थे यः पीड़ामनुभवति भङ्गेऽपि मधुरा
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः ।
न संप्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽसौ न पुनरगुणाया मरुभुवः ॥

(इन्द्रराजस्य)

कदली ।

(१०९)

धरित्रि पुष्पाञ्जलिरेष तुभ्यं
सुता मदीयास्तव पालनीयाः ।
इतीव रम्भा नमिताग्रमौलिना
रोरुद्यमाना मकरन्दविन्दुना ॥

(११०)

तालीतरोरनुपकारि फलं फलित्वा
लज्जावशादुचित एव विनाशयोगः ।
एतत्तु चित्रमुपकृत्य फलैः परेभ्यः
प्राणान् निजान् झटिति यत् कदली जहाति ॥

कल्पवृक्षः ।

(१११)

सुरतरुमूलनिवासी
यद्युपवासी भवेदर्थी ।
कमपरभूरुहमवनौ
स्वोदरभरणाय याचतामेषः ॥

केतकी ।

(११२)

व्यालाश्रितापि विफलापि सकण्टकापि
वक्रापि पङ्किलभवापि दुरासदापि ।
गन्धेन बन्धुरसि केतकि सर्वजन्तो-
रेको गुणः खलु निहन्ति समस्तदोषान् ॥

चन्दनः ।

(११३)

सारवान् क्षुद्रोऽपि असारमुन्नतं पराभवतीत्याह :—

सन्त्येव गिलिताकाशा महीयांसो महीरुहाः ।
तथापि जनताचेतोनन्दनश्चन्दनद्रुमः ॥

(हरिगणस्य)

(११४)

विविधगुणसम्पन्नोऽपि धनशून्यश्चेत् स दरिद्राय न रोचते इत्याह :—

छायया कति न तर्पिता जनाः
सौरभैः कति न वासिता दिशः ।
को भवन्तमपहातुमीहते
चुन्न चेत् लगति चन्दनद्रुम ॥

तिन्तिड़ी ।

(११५)

जगत्प्राणो हरेत् प्राणान् जीवनं हन्ति जीवनम् ।
यशोहरे किमाश्चर्यं प्राणदा यमदूतिका ॥

(कविचन्द्रस्य)

धुस्तूरम् ।

(११६)

माधुर्य्यसाराधरितामृतस्य
तत् कण्टकित्वं पनसस्य सह्यम् ।
उन्मादिनो मातुलपुत्रकस्य
सहामहे किं तव कण्टकित्वम् ॥

पद्मम् ।

(११७)

शुष्कं यत् तत्करैर्जातं जलं गुप्तं दलैर्मया ।
तं भानुं मे यथा बन्धुं जानासि कः स्वयं विना ॥

(११८)

खद्योतास्तरलीभवन्ति भगवानस्तं गतो भानुमान्
कोकः शोकमुपैति मत्तमनसः क्रेंकुर्वते कौशिकाः ।
इत्थं चेत् सदसद्विवेकविधुरो धाता तदेतादृशं
न द्रष्टव्यमितीव मुद्रितवती पद्मेक्षणं पद्मिनी ॥

पलाशः ।

(११९)

किंशुके शुक मा तिष्ठ चिरं भाविफलाशया ।
वाह्यरङ्गप्रपञ्चेन के के नानेन वञ्चिताः ॥

शालिः ।

(१२०)

शाखासन्ततिसन्निरुद्धनभसो भूयांस एवावनौ
विद्यन्ते तरवः फलैरविकलैरार्त्तिच्छिदः प्राणिनाम् ।
किन्तु द्वित्रदलैरलङ्कृततनोः शालेः सुमस्तुङ्गतां
दत्त्वा येन निजं शिरः सुकृतिना के नाम न प्रोषिताः ॥

स्वभावोक्ति-तरङ्गः ।

तड़ागः ।

(१२१)

गत्यन्तरविहीन आश्रितो जन आश्रयभूतं दातारं दानविमुखं विदित्वा इदमाह :—

आपेदिरेऽम्बरपथं परितः पतङ्गा
भृङ्गा रसालमुकुलानि समाश्रयन्ति ।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो
मीनो नु हन्त कतमां गतिमभ्युपैति ॥

नदी ।

(१२२)

धनं पदगौरवं वा न चिरं तिष्ठति तस्मात् तन्मदमत्ततया किमपि दुष्कृतं न करणीयमित्युपदिशति :—

कतिपयदिवसस्थायी
पूरो दूरोन्नतोऽपि भविता ते ।
तटिनि तटद्रुमपातन-
पातकमेकं चिरस्थायि ॥

मलयः ।

(१२३)

विद्योतन्ते कति न गिरयस्तेषु किं नोदयन्ते
शाखावन्तः खदिरबदरीशालशाखोटकाद्याः ।
धन्यस्तावन्मलयशिखरी यत्र यातास्त एव
स्वैरामोदैस्त्रितयभुवनं प्रीणयन्तः स्फुरन्ति ॥

मेघः ।

(१२४)

आवद्धां भूमिसम्पत्तिरूपां जीविकामुन्मोचयितुकामः कोऽपि कस्यचिद्भूस्वामिनः शरणापन्न स्तेन प्रीतिवचसा प्रीणितोऽपि स्वार्थसिद्धिमलभमानस्तमिदमाह :—

तवैव शरणागतं भवदधीनवृत्तिं प्रभो
तृषार्त्तमपि चातकं जलद वञ्चितं मा कुरु ।
ददन्तु यदि निश्चितं सलिलमेव देयं न मे
कथं मधुरनिस्वनैर्विधुरमाश्वसिष्यादरात् ॥

(१२५)

कश्चिदर्थी कस्यचिद्धनिनो गृहं गत्वा तन्मुखदत्तचक्षुः सुचिरमवतिष्ठमानस्तस्यालाप-मात्रमपि नोपलभ्य तमिदमाह :—

नभसि निरवलम्बे सीदता दीर्घकालं
त्वदभिमुखनिविष्टोत्तानचञ्चूपुटेन ।
जलधर जलधारा दूरतस्तावदास्तां
ध्वनिरपि मधुरस्ते न श्रुतश्चातकेन ॥

वायुः ।

(१२६)

प्राणास्त्वमेव जगतः पवनस्त्वमेव
विश्वं पुनासि परितः परितो विहृत्य ।
एकं पुनः सकलभूषण दूषणं ते
वह्नेः सखा भवसि यद् भवनं दिधक्षोः ॥

सरोवरः ।

(१२७)

निष्पङ्कं शिशिरेण धीवरगणैर्निर्मीननिष्कूर्मकं
व्याधैर्निर्विहगं निरम्बु रविणा निर्नालकं दन्तिभिः ।
निःशालूकमकारि शूकरगणैर्नामावशेषं सरो
हे पाथोद परोपकारक पयोदानेन मां पूरय ॥

(१२८)

प्रागतिवदान्यं पश्चात् क्षीणसम्पदमपि याचकेभ्यः यथाशक्ति ददं कञ्चिद्द दातारमभिप्रेत्य कस्यचित् कवेरुक्तिरियम् :—

वातैः शीकरवर्षिभिः श्रुतिसुखैर्हंसावलीनिस्वनै-
रुन्निद्रैः कमलैः पयोभिरमलैर्नीत्वा जनान् निर्वृतिम् ।
पश्चात् क्षीणधनां वहन्निजतनुं धन्यो मृणालोच्छला-
दर्थिभ्यः प्रददन् नवेन्दुविशदान्यस्थीनि पद्माकरः ॥

सागरः ।

(१२९)

कृतापकारमपि दुर्ज्जनं प्राप्तकालाः सुजना उपकुर्वन्तीत्याह :—

यद्यपि बद्धः शैले
यद्यपि गिरिमथन मुषितसर्वस्वः ।
तदपि परभीत भूधर
रक्षायां दीक्षितो जलधिः ॥

(१३०)

सत्स्वपि बहुषु धनेषु यदि तैः परोपकारो न स्यात् तदा तानि विफलानीत्याह :—

मा कुरु गुरुतागर्वं
लघुरन्यो नास्ति सागर त्वत्तः ।
जलसंग्रहमन्यस्मात्
त्वयि सति कुर्वन्ति पोतस्थाः ॥

(१३१)

कृतोपकारं जनं कथञ्चिन्नावमनेतेत्याह :—

कल्लोलवेल्लितदृषत्परुषप्रहारै-
रत्नान्यमूनि मकराकर मावमंस्थाः ।
किं कौस्तुभेन विदितं तव नाम नासीत्
प्राप्तुं प्रसारितकरः पुरुषोत्तमो यम् ॥

(१३२)

धनलिप्सया राजान्तिकमुपागतस्य सपदि तं राजानं विषमविपद्व्याकुलं विलोकितवतो याचकस्योक्तिरियम् :—

अयं वारां पूर्णो निलय इति रत्नाकर इति
श्रितोऽस्माभिस्तृष्णा विचलितमनोभिर्जलनिधिः ।
क एवं जानीते निजकरपुटीकोटरगतं
क्षणादेनं ताम्यत्तिमिमकरमापास्यति मुनिः ॥

(मालवरुद्रस्य)

(१३३)

क्वचिंस्थितिहतमी कस्यचित् राज्ञः सकाशात् राजान्तरसन्निधिं गन्तुमुद्यते प्रथमं प्रति कस्यचिदुक्तिरियम् :—

निष्पीतपीनतिमिराणि मनोहराणि
रत्नानि सन्ति न कियन्ति तवान्तिकेषु ।
एतस्य कौस्तुभमणे र्व्रजतः परन्तु
पाथोनिधे स्मरणमान्तरमावहेथाः ॥

सूर्य्यास्तम् ।

(१३४)

दिशि दिशि विलसन्तः सन्ति खद्योतपोता:
प्रतिगृहमपि दीपा दर्शयन्ति प्रतिष्ठाम् ।
अधिगगनमनन्तास्तारका राजमाना:
सवितरि परिभूते किं न लोकैरलोकि ॥

(कृष्णकान्तविद्यावागीशस्य)

(१२५)

ध्वान्तौघः कवलीकरोति जगतीं सूर्य्योपलाः
खद्योताश्च परिस्फुरन्ति सततं सीदन्ति पद्मान्यपि ।
ये तु ध्वाङ्क्षभिया स्वकोटरबहिर्निर्य्यान्ति नो कर्हिचित्
तेऽप्युच्चैर्विहरन्ति हा दिनमणे कुत्र त्वया प्रस्थितम् ॥

निन्दाप्रशंसा-तरङ्गः ।

(क) निन्दा-तरङ्गः ।

असन्तोष-निन्दा ।

(१२६)

विषयतृष्णायाः शक्तिं दर्शयति :—

तृष्णे कृष्णेऽपि ते शक्तिर्दृष्टा मर्त्त्येषु का कथा ।
त्रैलोक्यव्यापि यद् रूपं तत् त्वया वामनीकृतम् ॥

(१२७)

तृष्णया बद्धमुक्तयोर्जगद्विलक्षणं भेदवैचित्र्यं दर्शयति :—

तृष्णैवास्ति मनुष्याणां काचिदाश्चर्य्यशृङ्खला ।
प्रधावति यया बद्धो मुक्तस्तिष्ठति पङ्गुवत् ॥

उदरपूर्त्ति-निन्दा ।

(१३८)

राहोः शिरोऽत्यतिरिक्तं शरीरं नास्तीत्यभिसन्धाय आह :—

एकः स एव जीवति
हृदयविहीनोऽपि सहृदयो राहुः ।
यः सकललघिमकारण-
मुदरं न बिभर्त्ति दुष्पूरम् ॥

ऋण-निन्दा ।

(१३९)

न हि उत्तमर्णः कालं प्रतीक्षते इत्याह :—

अन्तकोऽपि हि जन्तूनामन्तकालमपेक्षते ।
न कालनियमः कश्चिदुत्तमर्णस्य विद्यते ॥

कलिकाल-निन्दा ।

(१४०)

कलिकालेऽव स्वामिभक्तिविहीनानां नारीणां दोषान् दर्शयति :—

भाषन्ते वनिताः कलौ प्रति वचोऽप्रीतिप्रदं स्वामिन-
स्तासां यत् पतिदेवतेति वचनं षष्ठीसमासाश्रितम् ।
लज्जाधर्म्मभयं न तासु कतिचित् कार्य्यं यथेच्छं रता
नासावद्धगवोपमान् निजपतीन् कुर्वन्ति धन्यः कलिः ॥

कापुरुष-निन्दा ।

(१४१)

तेजस्विसकाशात् लब्धतेजसो जनस्य तेजः सोढुं न शक्यते इत्याह :—

सह्यं तेजीयसां तेजस्तेन तेजीयसां न तु ।
मूर्ध्नि सह्यं रवेस्तेजः सिकता न पदे पुनः ॥

कुकवि-निन्दा ।

(१४२)

कुकविः सुकवेर्दोषं धत्ते यत्नैर्जहद् गुणम् ।
यत्नतः शर्करां हित्वा पुरीषमत्ति शूकरः ॥

(१४३)

अवयः केवलकवयः
कीराः स्युः केवलं धीराः ।
वीराः पण्डितकवय-
स्तानवमन्ता तु केवलं गवयः ॥

कुपुत्र-निन्दा ।

(१४४)

शनैः शनैर्विनीयन्ते रोषणैस्तोषणैरपि ।
नवाश्वा इव कुशलैर्बालाश्चपलचेतसः ॥

(हरिहरस्य)

कुवैद्य-निन्दा ।

(१४५)

कुवैद्यो बहून् रोगिणो नाशयतीत्याह :—

वैद्यनाथ नमस्तुभ्यं नाशिताशेषमानव ।
त्वयि विन्यस्तभारोऽयं सुषुप्तः स्वयमन्तकः ॥

कुसंसर्ग-निन्दा ।

(१४६)

अणुरप्यसतां सङ्गो नितरां हन्ति सद्गुणम् ।
गुणरूपान्तरं याति दुग्धं तक्रस्य विन्दुना ॥

कृतघ्न-निन्दा ।

(१४७)

विपत्काले न कोऽपि बन्धुरस्तीति सोदाहरणमाह :—

ब्रह्मा च विष्णुश्च दिवाकरश्च
लक्ष्मीश्च वाणी कमलस्य बन्धुः ।
तथापि तस्यास्ति हिमाद् विपत्तिः
को बन्धुरस्तीह विपत्तिकाले ॥

कृपण-निन्दा ।

(१४८)

बोधयन्ति न याचन्ते भिक्षुकाः पात्रपाणयः ।
दर्शयन्त्येव लोकानामदातुर्गतिरीदृशी ॥

(१४९)

सति द्राक्षाफले क्षीरे सुदामास्वादनं मुदे ।
अहो मातुरियं रीतिः कृपणे गर्भवर्त्तिनि ॥

जामातृ-निन्दा ।

(१५०)

श्वशुरैर्जामातृतृप्तिसाधनं कदाचिदपि न सम्भवेदित्याह :—

सूर्यादयो ग्रहाः सर्वे तुष्यन्त्युचितदानतः ।
सर्वस्वेनापि नो तुष्येत् जामाता दशमो ग्रहः ॥

(१५१)

जामातरि कृष्णसर्पे पावके दुर्ज्जने तथा ।
विश्वासो नैव कर्त्तव्यः पञ्चमे भगिनीसुते ॥

दारिद्र्य-निन्दा ।

(१५२)

न कोऽपि दरिद्रवचसि कर्णं ददातीति सिद्धपुरुषसादृश्येन दर्शयति :—

हे दारिद्र्य नमस्तुभ्यं सिद्धोऽहं त्वत्प्रसादतः ।
पश्याम्यहं जगत् सर्वं न मां पश्यति कश्चन ॥

(१५३)

कश्चित् कविः कस्यचिद् राज्ञः समीपे षट्समासात्मिकया कवितयाऽनया निज-दारिद्र्यं निवेदयति :—

द्विगुरपि सद्वन्द्वोऽहं
गृहे च मे सततमव्ययीभावः ।
तत्पुरुष कर्मधारय
येनाहं स्यां बहुव्रीहिः ॥

(भट्टमुक्तिकलसस्य)

(१५४)

विकटदारिद्र्यं वर्णयति :—

मद्गेहे मुषलीव मूषिकवधूर्मूषीव मार्ज्जारिका
मार्ज्जारीव शुनी शुनीव गृहिणी वाच्यः किमन्यो जनः ।
मूर्च्छापन्नशिशूनसून् विजहतो दृष्ट्वा च भिल्लीरवै-
र्लूतातन्तुवितानसंवृतमुखी चुल्ली चिरं रोदिति ॥

(विक्रमादित्यस्य, केषाञ्चिन्मते दुर्गतस्य)

(१५५)

काचिद् विदुषी रमणी प्रोषितं स्वामिनमुद्दिश्य आह :—

विकसामि रवावुदिते
सङ्कोचमुपैमि चास्तमुपयाते ।
दारिद्र्यसरसि मग्ना
पङ्कजलीलामनुभवामि ॥

(जयन्तीदेव्याः)

(१५६)

सङ्गं कोऽपि न निर्धनस्य कुरुते सम्भाष्यते नादरात्
संप्राप्तो गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विचरत्यल्पच्छदो लज्जया
मन्ये निर्धनता प्रकाममपरं षष्ठं महापातकम् ॥

(रुद्रटस्य)

(१५७)

दग्धं खाण्डवमर्जुनेन बलिना दिव्यैर्द्रुमैः सेवितं
दग्धा वायुसुतेन रावणपुरी लङ्का पुनः स्वर्णभूः ।
दग्धः पञ्चशरः पिनाकपतिना तेनाप्ययुक्तं कृतं
दारिद्र्यं जनतापकारकमिदं केनापि दग्धं नहि ॥

(निशानारायणस्य)

दुर्जन-निन्दा ।

(१५८)

कर्णामृतं सूक्तिरसं विमुच्य
दोषेषु यत्नः सुमहान् खलस्य ।
अवेक्षते केलिवनं प्रविश्य
क्रमेलकः कण्टकजालमेव ॥

(विल्हणस्य)

(१५९)

यस्य यः स्वभावः स कथमपि नापैतीत्याह :—

सुनिष्णातोऽपि वेदान्ते साधुत्वं नैति दुर्जनः ।
चिरं जलनिधौ मग्नो मैनाक इव मार्दवम् ॥

(१६०)

श्लेषमाश्रित्य खलानलयोः साम्यं दर्शयति :—

मित्रोदये ग्लानिमुपैति सम्यग्
दोषागमे द्योतत एव नित्यम् ।
सम्बन्धमात्रेण दहत्यवश्यं
खलेऽनले वा कतरो विशेषः ॥

(१६१)

खलानां परगुणासहिष्णुतामाह :—

आविष्कृतान् परगुणान् कलयन्ति तूष्णीं
दुश्चेतसो ननु विदूषयितुं न रागात् ।
आकर्णयन्ति किल कोकिलकूजितानि
सन्धातुमेव निजसप्तनलीं किराताः ॥

(१६२)

याचकान् प्रति धनिनामाचरणमाह :—

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥

नारी-निन्दा ।

(१६३)

परं प्रचण्डा कटुवाक्यवादिनी
विवादशीला परगेहगामिनी ।
मौर्ख्ययुक्ता च पतीष्टनाशिनी
त्यजेत भार्य्या दशपुत्रपुत्रिणी ॥

निर्गुण-निन्दा ।

(१६४)

पूर्णोऽपि कुम्भो न करोति शब्दं
रिक्तो घटो घोषमुपैति घोरम् ।
विद्वान् विनीतो न करोति गर्वं
बहूनि जल्पन्ति गुणैर्विहीना: ॥

भिक्षा-निन्दा ।

(१६५)

कदाचिदेको धनवान् कवि: दैववशाद् दारिद्र्योपहतोऽपि मानभिया कस्याप्यन्तिकं गन्तुं नोत्सहेत। एवमेव यदा प्रार्थनाप्रयोजनं नितरामेव जातं तदासौ कस्यचित् धनवत: समीपमुपगम्य वक्ष्यमाणपद्येन स्वामवस्थां विज्ञापितवान् :—

(क)

नवीनदीनभावस्य याचमानस्य मानिन: ।
वचोजीवितयोरासीत् पुरोनि:सरणे रण: ॥

साम्प्रतं हीनावस्थोऽसौ धनाढ्यः कवेः श्लोकमाकर्ण्य श्लोकस्यैतत्परिवर्त्तनमाकल्प्य कौशलेनोक्तवान्, महात्मन् भवतः श्लोको नितरामेव चारुतरः किन्तु अस्ति तावदत्र दोषलेशः ; मनेत्र याचमानस्येत्यत्र य-कारः पतितः, एतद्योगेनैव च मम अभिप्रायो भवता ज्ञातव्यो भवेत्, एवमभिधाय वक्ष्यमाणप्रकारेण पठितवान् :—

(ख)

नवीनदीनभावस्य याचमानस्य मानिनः ।
वचोजीवितयोरासीत् पुरोनिःसरणे रणः ॥

(१६६)

मक्षिकासादृश्येन भिक्षुकान् निन्दति :—

अनाहूताः स्वयं यान्ति रसास्वादविलोलुपाः ।
निवारिता न गच्छन्ति मक्षिका इव भिक्षुकाः ॥

(१६७)

याचकमशकयोः सादृश्यं दर्शयति :—

याचके मशके तुल्या वृत्तिः सृष्टिकृता कृता ।
प्रायः प्रहारभागित्वं क्वचिदाहारभागिता ॥

भृत्य-निन्दा ।

(१६८)

यतिभृत्ययोः साम्यं वैषम्यञ्च दर्शयति :—

भूशय्या ब्रह्मचर्य्यञ्च कृशत्वं लघुभोजनम् ।
सेवकस्य यतेः साम्यं पार्थक्यं पापधर्म्मजम् ॥

मद्यपान-निन्दा ।

(१६९)

मद्यपस्य कुतः सत्यं दया मांसाशिनः कुतः ।
कामिनश्च कुतो विद्या निर्धनस्य कुतः सुखम् ॥

मूर्ख-निन्दा ।

(१७०)

हरेः पादाहतिः श्लाघ्या न श्लाघ्यं खररोहणम् ।
स्पर्द्धापि विदुषा युक्ता न युक्ता मूर्खमित्रता ॥

पुत्र-निन्दा ।

(१७१)

जायमानो हरेद् दारान् वर्द्धमानो हरेद् धनम् ।
म्रियमाणो हरेत् प्राणान् कथं पुत्रः सुखावहः ॥

प्रेम-निन्दा ।

(१७२)

अत्यन्तप्रेमसम्बन्धो न सुखाय कदाचन ।
अर्द्धनारीश्वरः शम्भुः प्रियावक्त्रं न वीक्षते ॥

लोकवाद-निन्दा ।

(१७३)

निरङ्कुशं जनाननमिति कथयति :—

याचकमर्थिनं रक्षाकर्त्तारं च जनार्दनम् ।
संहारकं शिवं वक्ति भुवि लोको निरङ्कुशः ॥

लोभ-निन्दा ।

(१७४)

किं दातुरखिलैर्दोषैः किं लुब्धस्याखिलैर्गुणैः ।
न लोभादधिको दोषो न दानादधिको गुणः ॥

(नीलकण्ठदीक्षितस्य)

स्थानच्युति-निन्दा ।

(१७५)

सिंहक्षुण्णकरीन्द्रकुम्भपतितं रक्ताक्तमुक्ताफलं
कान्तारे बदरीभ्रमाद् द्रुतमगाद् भिल्लस्य पत्नी मुदा ।
पाणिभ्यां परिगृह्य शुभ्रकठिनं तद् वीक्ष्य दूरेजहा-
वस्थाने पततामतीवमहतामेतादृशी दुर्गतिः ॥

(ख) प्रशंसा-तरङ्गः ।

उद्भटकविता-प्रशंसा ।

(१७६)

उद्भटकवितोत्कर्षं कथयति :—

उद्भटश्लोकसद्द्रव्यसंग्रहं न करोति यः ।
प्रस्तावयज्ञसंप्राप्तौ कां स दास्यति दक्षिणाम् ॥

(१७७)

उद्भटश्लोकसङ्गीतबाललीलाप्रकाशनैः ।
मनो न भिद्यते यस्य स योगी ह्यथवा पशुः ॥

(१७८)

उद्भटाः कविताः प्राचां रसभावोद्भटाः पराः ।
सर्वदैव नवायन्ते न वा सन्ति पुरातनाः ॥

(१७९)

यशो धर्म्मो नयो दाक्ष्यमुद्भटश्लोकवाग्मिता ।
एतेषां गुणरत्नानां संग्रही नावसीदति ॥

उद्यम-प्रशंसा ।

(१८०)

लभन्ते न विनोद्योगं प्राणिनः सम्पदां पदम् ।
अब्धिमन्थनजं दुःखं लब्ध्वा देवाः सुधां पपुः ॥

गुण-प्रशंसा ।

(१८१)

गुणाः सर्वत्र पूज्यन्ते दूरेऽपि वसतां सताम् ।
केतकीगन्धमाघ्रातुं स्वयं गच्छन्ति षट्पदाः ॥

गृहस्थाश्रम-प्रशंसा ।

(१८२)

यदि रामा यदि च रमा
यदि तनयो विनयधीगुणोपेतः ।
तनये तनयोत्पत्तिः
सुरवरनगरे किमाधिक्यम् ॥

(१८३)

श्लाघ्यं गृहस्थाश्रमं वर्णयति :—

सानन्दं सदनं सुताश्च सुधियः कान्ता मनोहारिणी
सन्मित्रं सुधनं स्वयोषिति मतिराज्ञावहाः सेवकाः ।
आतिथ्यं सुरपूजनं प्रतिदिनं मिष्टान्नपानं गृहे
साधोः सङ्ग उपासना च सततं धन्यो गृहस्थाश्रमः ॥

दान-प्रशंसा ।

(१८४)

वित्तत्यागयोर्योगं स्तौति :—

गुणो वित्तवतां त्यागो वित्तं त्यागवतां गुणः ।
परस्परवियुक्तौ तु वित्तत्यागौ विडम्बना ॥

(भट्टप्रद्युम्नस्य)

(१८५)

तुरगशतसहस्रं गोगणानाञ्च लक्षं
कनकरजतपात्रं मेदिनीं सागरान्ताम् ।
विमलकुलवधूनां कोटिकन्याश्च दद्यात्
नहि नहि सममेतद् भक्तदानैः प्रधानैः ॥

दाम्पत्यप्रेम-प्रशंसा ।

(१८६)

आहृत्य चिनुमः स्वर्गमपवर्गमपि क्रमात् ।
अनुकूले हि दाम्पत्ये प्रतिकूलं न किञ्चन ॥
(नीलकण्ठदीक्षितस्य)

धन-प्रशंसा ।

(१८७)

दुन्दुभिश्च सुतरामचेतन-
स्तन्मुखादपि धनं धनं धनम् ।
इत्थमेव निनदः प्रवर्त्तते
चेतनो यदि जनः किमङ्ग तम् ॥

धर्म्म-प्रशंसा ।

(१८८)

दुःखेनोपार्ज्यते धर्म्मः सुखेन तु विनाश्यते ।
कष्टलब्धमिमं त्रातुं नेच्छन्ति मुनयः सुखम् ॥
(नीलकण्ठदीक्षितस्य)

धीर-प्रशंसा ।

(१८९)

आफलोदयकर्म्माणो हि धीरा इत्याह :—

रत्नैरमूल्यैस्तुतुषुर्न देवा
न भेजिरे भीमविषाद् विभीतिम् ।
सुधां विना न प्रययुर्विरामं
न निश्चितार्थाद् विरमन्ति धीराः ॥

पण्डित-प्रशंसा ।

(१९०)

शून्यमापूर्णतामेति मृतश्चाप्यमृतायते ।
विपत् सम्पदिवाभाति विद्वज्जनसमागमात् ।
(भट्टेन्दुराजस्य)

परिच्छद-प्रशंसा ।

(१९१)

वासः प्रसूतिः खलु योग्यताया
वासोविहीनं विजहाति लक्ष्मीः ।
पीताम्बरं वीक्ष्य ददौ तनूजां
दिगम्बरं वीक्ष्य विषं समुद्रः ॥

परोपकार-प्रशंसा ।

(१९२)

पिबन्ति नद्यः स्वयमेव नाम्भः
स्वयं न खादन्ति फलानि वृक्षाः ।
नादन्ति शस्यं खलु वारिवाहाः
परोपकाराय सतां विभूतिः ॥

पौरुष-प्रशंसा ।

(१९३)

किं जन्मना पैतृगुणेन किं वा
शक्त्यैव याति निजया पुरुषः प्रतिष्ठाम् ।
कुम्भोऽपि कूपमपि शोषयितुं न शक्तः
कुम्भोद्भवेन मुनिनाऽम्बुधिरेव पीतः ॥

प्रार्थनाकौशल-प्रशंसा ।

(१८४)

शब्दशास्त्रविदां चित्रमर्थाहरणकौशलम् ।
अव्ययेभ्योऽपि ये चार्थान् निष्कर्षन्ति सहस्रशः ॥

प्रेम-प्रशंसा ।

(१८५)

न खलु स्वकीयान् जनान् प्रति वैमुख्यमुचितं कदापि स्वामिन इत्याह :—

अन्तरायपरिग्रस्तं स्वीयमित्यनुकम्पया ।
दुर्दिनेऽपि दिनेशोऽयं प्रफुल्लयति पङ्कजम् ॥

(१८६)

आधारभेदादेकस्यापि आधेयस्य भिन्नतां दर्शयति :—

योऽन्यमुखे दुर्वादः
प्रियतमवदने स एव परिहासः ।
इतरेन्धनजो धूमः
स एवागुरुभवो धूपः ॥

(गोवर्द्धनाचार्य्यस्य)

ब्राह्मण-प्रशंसा ।

(१९७)

इयं ब्राह्मणनौ राजन्नपूर्व्वैव भवार्णवे ।
तरन्त्यधःस्थिता लोका मज्जन्त्युपरिवर्त्तिनः ॥

मधुरभाषित्व-प्रशंसा ।

(१९८)

वाङ्माधुर्य्यात् सर्वलोकप्रियत्वं
वाक्पारुष्यात् सर्वलोकाप्रियत्वम् ।
किं वा लोके कोकिलेनोपनीतं
किं वा लोके गर्दभेनापनीतम् ॥

मनस्वि-प्रशंसा ।

(१९९)

अनामा भूषणं धत्ते न कनिष्ठा न मध्यमा ।
निजनामप्रसिद्धानां भूषणैः किं प्रयोजनम् ॥

मानि-प्रशंसा ।

(२००)

रिपव एव मानिनामभ्युदयनिदानमित्याह :—

श्रीरामस्य दशाननो न कृतवान् दारापहारं यदि
क्वाम्भोधिः क्व च सेतुबन्धघटना क्वोत्तीर्य्य लङ्काजयः ।
पार्थस्यापि पराजयं यदि रिपुर्नाधात् क्व तादृक्तपो
नीयन्ते रिपुभिः समुन्नतिपदं प्रायः परं मानिनः ॥

यज्ञोपवीत-प्रशंसा ।

(२०१)

परशुरामं प्रति रामचन्द्रस्योक्तिरियम् :—

भो ब्रह्मन् भवता समं न घटते संग्रामवार्त्ताऽपि नः
सर्वे हीनबला वयं बलवतां यूयं स्थिता मूर्द्धनि ।
यस्मादेकगुणं शरासनमिदं राजन्यकानां बलं
युष्माकं द्विजजन्मनां नवगुणं यज्ञोपवीतं बलम् ॥

विद्या-प्रशंसा ।

(२०२)

न चोरहार्य्यं न च राजहार्य्यं
न भ्रातृभाज्यं न च भारभूतं ।
व्ययेऽपि यद् वृद्धिमुपैति नित्यं
विद्याधनं तत् परमं धनेषु ॥

विनय-प्रशंसा ।

(२०३)

आदावेव विनीतः सन्नुपायं चिन्तयेत् सुधीः ।
पूर्वमेव क्षितौ नत्वा दन्तिनं हन्ति केशरी ॥

(कुसुमदेवस्य)

श्यालक-प्रशंसा ।

(२०४)

भगिनीपतेरन्तिके श्यालकस्य आदरातिशय एव इत्याह :—

गृहिणीसोदरस्येह गृहिण्या आदरः परः ।
वक्षसि कौस्तुभो नित्यं लक्ष्मीः पादतले हरेः ॥

सन्तोष-प्रशंसा ।

(२०५)

सन्तोषामृतवृत्तिर्हि गरीयसीत्याह :—

अकृत्वा परसन्तापमप्राप्य नीचनम्रताम् ।
अनुत्सृज्य सतां मार्गं यत् स्वल्पमपि तद् बहु ॥

सुकवि-प्रशंसा ।

(२०६)

करीन्द्रश्च कवीन्द्रश्च भूभृत्तुष्टिकरावुभौ ।
उभावपीएकधर्म्माणौ भेदस्तु रवयोस्तयोः ॥

---

(२०७)

सुकवेरपि विपदं दर्शयति :—

अग्रे तार्किककेशरी प्रचलति क्रोधेन रक्तेक्षणः
पश्चाद् याति च शब्दचारुचतुरः कालापशार्दूलकः ।
तन्मध्ये कविते कुरङ्गदयिते शक्नोषि चेज्जीवितुं
हारं रत्नमयं गले तव तदा दास्याम्यहं सादरम् ॥

सुकाव्य-प्रशंसा ।

(२०८)

श्लोको हि भवति श्लोको यत्र तिष्ठन्ति साधवः ।
लकारो लुप्यते तत्र यत्र तिष्ठन्त्यसाधवः ॥

(२०९)

सुधाकाव्यरसयोः पार्थक्यं न ज्ञातुं शक्यते इत्याह :—

कान् पृच्छामः सुराः स्वर्गे निवसामो वयं भुवि ।
किं वा काव्यरसः स्वादुः किं वा स्वादीयसी सुधा ॥

सुजन-प्रशंसा ।

(२१०)

गङ्गा पापं शशी तापं दैन्यं कल्पतरुर्हरेत् ।
पापं तापञ्च दैन्यञ्च हरेत् साधुसमागमः ॥

(२११)

नवनीतविलक्षणं सज्जनहृदयमिति दर्शयति :—

सज्जनस्य हृदयं नवनीतं
यद् वदन्ति कवयस्तदलीकम् ।
अन्यदेहविलसत्परितापात्
सज्जनो द्रवति नो नवनीतम् ॥

सुपुत्र-प्रशंसा ।

(२१२)

सत्कुलं भूषणं पुंसः सद्भार्य्या कुलभूषणम् ।
सत्पुत्रभूषणा भार्य्या पुत्राः सन्मतिभूषणाः ॥

(हरिहरस्य)

सुवैद्य-प्रशंसा ।

(२१३)

मस्ते दुःसहवेदनाकवलिते मग्ने स्वरेऽन्तर्गलं
तप्तायां ज्वरपावकेन च तनौ तान्ते हृषीकव्रजे ।
दूने बन्धुजने कृतप्रलपने धैर्य्यं विधातुं पुनः
कः शक्तः कलितामयप्रशमनाद् वैद्यात् परो विद्यते ॥

(वेङ्कटाध्वरिणः)

सुसंसर्ग-प्रशंसा ।

(२१४)

ज्ञानं वर्द्धयति श्रियं वितनुते वैदग्ध्यमासुञ्चति
श्रेयः पल्लवयत्यघानि दलयत्युन्मीलयत्युन्नतिम् ।
बुद्धिं संपरिशोधयत्युपचिनोत्युच्चैः कलाकौशलं
किं किं नारभते हरेरिव कथास्वर्थ्या सतां सङ्गतिः ॥

रस-तरङ्गः ।

अद्भुत-रसः ।

(२१५)

कस्मै किं कथनीयं
कस्य मनःप्रत्ययो भवति ।
रमयति गोपवधूटी-
कुञ्जकुटीरे परं ब्रह्म ॥

करुण-रसः ।

(२१६)

अग्रे व्याधः करधृतशरः पार्श्वतो जालमाला
पृष्ठे वह्निर्दहति नितरां सन्निधौ सारमेयाः ।
एणी गर्भादलसगमना बालके रुद्धपादा
चिन्तविष्टा वदति हरिणं किं करोमि क्व यामि ॥

(सातवस्य)

शान्तरसः ।

अनित्यता ।

(२१७)

संसारिणामविद्याजनितं भ्रमं दर्शयति :—

जातोऽहं जनको ममैष जननी क्षेत्रं कलत्रं कुलं
पुत्रा मित्रमरातयो वसु गृहं भ्राता स्वसा बान्धवाः ।
संसारे शयने निमज्ज्य सुचिरं निद्रामविद्यामयीं
लब्ध्वा चित्त विघूर्णितं बहुविधान् स्वप्नानिमान् पश्यसि ॥

(कृष्णमिश्रस्य)

उपदेश ।

(२१८)

संसार तव निःसार पदवी न दवीयसी ।
अन्तरा दुस्तरा न स्याद् यदि रे मदिरेक्षणा ॥

(भर्तृहरेः)

कर्म्मफलम् ।

(२१९)

महतामाश्रयः कार्य्यः फलं भाग्यानुसारतः ।
शिवस्य कण्ठलग्नोऽपि भुजगो वायुभक्षकः ॥

(भर्तृसारस्वतस्य)

कालचरित्रम् ।

(२२०)

अशनं मे वसनं मे
जाया मे बन्धुवर्गो मे ।
इति मे मे कुर्व्वाणं
कालवृको हन्ति पुरुषाजम् ॥

दैव-बलम् ।

(२२१)

रामेण सीता कथिता त्वरस्व
सूर्य्येण तापैः परितापिताऽभूत् ।
पृथ्व्यापि विद्धा निजकण्टकैश्च
विधौ विरुद्धे स्वजनोऽपि शत्रुः ॥

प्रार्थना ।

(२२२)

शान्तिकन्यालसत्कण्ठो मनःस्थालीमिलत्करः ।
त्रिपुरारिपुरद्वारि कदाहं मोक्षभिक्षुकः ॥

विवेकः ।

(२२३)

पुनः पुनर्भुवि क्षिप्तः पुनरेति स्वसन्निधिम् ।
मन्दकन्दुकवज्जातो मृत्योः क्रीड़नकं नरः ॥ (१)

(लक्ष्मणस्य)

(२२४)

तन्मायां परमां मन्ये यत् सुखं स्वजनादपि ।
निदाघवारणायाऽलं निजच्छाया न कस्यचित् ॥

विषय-निन्दा ।

(२२५)

न्यस्तं यथा मूर्ध्नि मुदाऽत्ति मेषो
दूर्वाञ्चिताद्यं बलिकल्पितः सन् ।
मृत्युं समीपस्थितमप्यजानन्
भुङ्क्ते मनुष्यो विषयांस्तथैव ॥

हास्य-रसः ।

(२२६)

निन्दाच्छलेन रामं स्तौति :—

साधु साधु रघुनाथ यत् त्वया
पर्य्यणायि जनकस्य कन्यका ।
कार्य्यमेतदपरेण दुष्करं
युक्तमेतदजवंशजन्मनः ॥

विविध-तरङ्गः ।

आयव्ययौ ।

(२२७)

इदमेव सुपाण्डित्यं चातुर्य्यमिदमेव च ।
इदमेव सुबुद्धित्वमायादल्पतरो व्ययः ॥

उपनेत्रम् ।

(२२८)

यो हि परमुखेन कस्यचिद् वृत्तान्तमवगम्य प्रशस्यं तं निन्दति निन्द्यं वा स्तौति तं प्रत्युक्तिरियम् :—

दृश्यतेऽणुर्महत्त्वेन महानणुतया त्वया ।
दिव्यदृष्टे नं दोषोऽयं दोषोऽयमुपचक्षुषः ॥

कण्टकः ।

(२२९)

सुमुखोऽपि सुवृत्तोऽपि सन्मार्गपतितोऽपि सन् ।
साधूनां पादलग्नोऽपि व्यथयत्येव कण्टकः ॥

कस्तूरी ।

(२३०)

अयि बत गुरुगर्वं मा स्म कस्तूरि कार्षी-
रखिलपरिमलानां मौलिना सौरभेण ।
गिरिगहनगुहायां लीनमत्यन्तदीनं
स्वजनकमसुनैव प्राणहीनं करोषि ॥
(पण्डितराजजगन्नाथस्य)

कुम्भः ।

(२३१)

दृढतरगलविनिबन्ध
कूपनिपातोऽपि कलस ते धन्यः ।
यज्जीवनदानैस्त्वं
तर्षामर्षं नृणां हरसि ॥

गोपी-यन्त्रम् ।

(२३२)

अलाबुतन्तुकाष्ठानां संयोगे मधुरध्वनिः ।
भिक्षापात्रं कटीसूत्रमिन्धनञ्च पृथग् यदि ॥

घटिका-यन्त्रम् ।

(२३३)

कदाचित् महाराजकृष्णचन्द्रेण कवे कथय तावत् घटिकायन्त्रं रात्रिन्दिवं कथं ध्वनतीति पृष्टो वाणेश्वरविद्यालङ्कारस्तमित्युवाच :—

अलभ्यं यदायुः पलः स्वर्णभारै-
रहो तस्य दण्डो वृथा याति यामः ।
दिनञ्च त्रियामा प्रमादान्नराणा-
मितीवानिशं घोषयन्ती घटीयम् ॥

(वाणेश्वरविद्यालङ्कारस्य)

जिह्वा ।

(२३४)

अद्भुतमेतद् यद् दन्तैर्न जिह्वा दश्यते इत्याह :—

द्वात्रिंशद्दशनद्वेषिमध्ये भ्रमसि नित्यशः ।
तदिदं शिक्षितं केन जिह्वे सञ्चारकौशलम् ॥

तमाखुः ।

(२३५)

भ्रातः कस्त्वं तमाखुर्गमनमिह कुतो वारिधेः पूर्वपारात्
कस्य त्वं दण्डधारी नहि तव विदितं श्रीकलेरेव राज्ञः ।
चातुर्वर्ण्यं विधात्रा विबुधविरचितं धर्म्मकर्म्मप्रभेद-
मेकीकर्त्तुं बलात् तन्निखिलजगति रे शासनादागतोऽस्मि ॥

तुलादण्डः ।

(२३६)

गुरुषु मिलितेषु शिरसा
प्रणमसि लघुषून्नता समेषु समा ।
उचितज्ञासि तुले किं
तुलयसि गुञ्जाफलैः कनकम् ॥

दुग्धम् ।

(२३७)

सहजमाधुर्य्यं न कथमपि विचलतीत्याह :—

को हि तुलामधिरोहति
शुचिना दुग्धेन सहजमधुरेण ।
तप्तं विकृतं मथितं
तथापि यत् स्नेहमुद्गिरति ॥

धनुर्वाणौ ।

(२३८)

कोटिद्वयस्य लाभेऽपि नतं सद्वंशजं धनुः ।
असद्वंश्यः शरः स्तब्धो लक्ष्यलाभाभिकाङ्क्षया ॥

धूमः ।

(२३९)

धूमस्य स्वजनकनाशित्वं दर्शयति :—

धूमः पयोधरपदं कथमप्यवाप्य
वर्षाम्बुभिः शमयति ज्वलनस्य तेजः ।
दैवादवाप्य ननु नीचजनः प्रतिष्ठां
प्रायः स्वबन्धुजनमेव तिरस्करोति ॥

नखरञ्जनी ।

(२४०)

शब्दश्लेषलोलुपः कविरुत्तमाधमयोरभेदं दर्शयति :—

अनन्तचरणोपान्तचारिणी मलहारिणी ।
पुनर्भवच्छेदकरी गङ्गेव नखरञ्जनी ॥

(वाणेश्वरविद्यालङ्कारस्य)

नस्यम् ।

(२४१)

नस्यं भूसुरसूरिसेवितमलं नस्यं सुसेवे स्वयं
नस्येनैव विकाशते कविकुलं नस्याय तस्मै नमः ।
नस्यात् शस्यतमं न चास्ति भुवने नस्यस्य वश्योऽस्म्यहं
नस्ये मे नियतं विराजतु मनो हे नस्य मामुद्धर ॥

(उद्भटसागरस्य)

नौका ।

(२४२)

नौका च खलजिह्वा च प्रतिकूलप्रवर्त्तिनी ।
प्रतारणाय लोकानां दारुणा केन निर्मिता ॥

प्रदीपः ।

(२४३)

प्रदीपं लक्ष्यीकृत्य उपदिशति :—

रक्ष पात्रगतं स्नेहं दीप स्वश्रीविवर्द्धनम् ।
प्रयास्यन्ति विना तेन भस्मत्वं भवतो गुणाः ॥

(महादेवस्य)

(२४४)

आश्रितवात्सल्यं शत्रोरपि हृदयमधिकरोतीत्याह :—

परिपन्थिनमपि हन्यात् किन्तु न हन्यादनुगतशत्रुम्।
दीपस्तिमिरविनाशी दलयति नाधोगतं तिमिरम् ॥

बड़िशदण्डः ।

(२४५)

यत् सद्‌गुणोऽपि सरलोऽपि तटस्थितोऽपि
वंशोद्भवोऽपि विदधासि नृशंसकर्म्म ।
वक्रात्मनो बड़िशदण्ड तदेव तस्य
जानामि सङ्गतिफलं तव कण्टकस्य ॥

मध्यस्थः ।

(२४६)

जलस्य वह्निना वैरं विधात्रा परिकल्पितम् ।
सुपात्रं यदि मध्यस्थं नृणां भोगाय कल्पते ॥

सुजन-दुर्जन-पार्थक्यम् ।

(२४७)

आकोपितोऽपि सुजनो मधुरं हि रौति
निष्पीड़ितो मधुरमुद्‌गिरतीक्षुरेव ।

नीचो जनो गुणशतैरपि पूज्यमानो
हास्येन यद् वदति तत् कलहेऽप्यवाच्यम् ॥

(२४८)

सरलयोः खलु सख्यमनारतं
कुटिलयोर्घटनैव न जायते ।
यदि भवेत् सरले कुटिले तदा
न चिरमस्ति धनुःशरयोरिव ॥

(२४९)

एषोऽञ्जलिः सममसज्जनसज्जनौ तौ
वन्दे नितान्तकुटिलप्रगुणस्वभावौ ।
एकं भिया निरभिसंहितवैरभावं
प्रीत्याऽपरं परमनिर्वृतिपात्रभूतम् ॥

स्वभावाख्यानम् ।

(२५०)

साधुरेव न जहाति साधुतां
दुर्जनेन सह सम्मिलन्नपि ।
जन्मतः प्रभृति काकसङ्गतः
पश्य रौति मधुरं हि कोकिलः ॥

परिशिष्टम् ।

उद्भट-सागरः ।

द्वितीय-प्रवाहः ।

टिप्पनी ।

(१) ब्रह्माभिधेयं—परब्रह्मस्वरूपम् । महः—ज्योतिः । एते व्याधिग्रस्तादयो यथा दुःखनिवृत्तये वैद्यादीन् स्मरन्ति तथाऽहमपि आत्यन्तिकदुःखान्धकारदूरीकरणाय एकं शरणं तत्तेजः स्मरामीत्यर्थः ।

(२) कुलशैलदलं—कुलशैलाः सप्तकुलपर्व्वता एव दलानि पत्राणि यस्य तत् । सुवर्णगिरिकर्णिकं—सुवर्णगिरिः सुमेरुरेव कर्णिका बीजकोषो यस्य तत् । अनन्तनालं—अनन्त विष्णुः एव नालं यस्य तत् । कमलविष्टरम्—पद्मासनम् ।

(३) स्फाटिकीं—स्फटिकमयीम् । अक्षमालां—जपमालाम् । नखकिरणविभिन्नां—नखरश्मिविमिश्राम् । प्रतिपलं—प्रतिक्षणम् । कीरः—शुकपक्षी । भूत्यै—मङ्गलाय ।

(४) वृत्तिः—वर्त्तनं व्यवहारादिकमित्यर्थं । स्वतन्त्रा—स्वाधीना । स्नुषाणाम्—पुत्रवधूनाम् । सरस्वती ब्रह्मणः पत्नी ; विष्णोर्नाभिकमलात् जात इति विष्णुर्ब्रह्मणः पिता लक्ष्मीश्च माता । अतएव लक्ष्मीः सरस्वत्याः श्वश्रूरिति सङ्गच्छते । पण्डितोऽपि निर्धनो नाद्रियते इति श्लोकार्थः ।

(५) लक्ष्मीः न चपलायते चञ्चला भवति । अलक्ष्मीश्च पलायते अपगता भवति ।

(८) नाथे—स्वामिनि नारायणे इत्यर्थः । क्षतपदघातः भृगुमुनिना इति शेषः । चुलुकिततातः—चुलुकितः गण्डूषेण पीतः तातः पिता समुद्र इत्यर्थः । सपत्निकासेवी—सरस्वतीसेवकः ब्राह्मण इत्यर्थः । श्लोकेऽत्र आर्य्याच्छन्दः ।

(९) लक्ष्मीर्यावत् सदया तावत् भवनं, वधूः, सुखं, पौरुषान्विततनुः, जनादरः, एतानि सुलभानि भवन्ति । चेत् सा न तथा कृपावती, तदा एतेषां पदानां प्रथमवर्ण-परित्यागे यत् भवति तदेव स्यात् । वनं अरण्यं, धूः भारः सकलमेव कष्टकरम्, खं आकाशं सर्व्वं शून्यम्, रुषान्विततनुः क्रोधपूर्णदेहः, नादरः सर्व्वत्र सम्मानाभावः ।

(१०) द्रविणं—धनम्। मत्सरः—विद्वेषः। मत्सरिणी—विद्वेषकारिणी। शार्दूलविक्रीड़ितवृत्तमेतत्।

(११) शौरेरुरसि—नारायणस्य वक्षःस्थली। कुम्भसम्भवमुनिः—अगस्त्यः। तातं पितरं समुद्रमित्यर्थः। विच्छिन्नच्छदनं—छिन्नपक्षम्।

(१२) कन्धरां—ग्रीवां। शेष—हे अनन्त। श्लोकेऽत्र आर्याच्छन्दः।

(१४) खरतरवरशरहतदशवदन—सुशाणितवाणनिहतरावण। खगचर—गरुड़यान। नगधर—गोवर्द्धनगिरिधारी। फणधरशयन—शेषशय्य। परपदलयकर—मोक्षपददायक। भवभयशमन—भवभयनाशक। जगदघमपहर—पृथिवीस्थं समस्तं पापं दूरीकुरु त्वमिति शेषः। कमलजनयन—पद्मनेत्र।

(१५) राजमणिः—राजश्रेष्ठः। रमेशं—रमायाः ईशं पतिं नारायण-मित्यर्थः। निशाचरचमूः—राक्षससैन्यानि। शुभायनं—शुभं मङ्गलदायकं अयनं आश्रयः।

(१६) दारुदृषदस्य—"जातिरप्राणिनाम्"इति द्वन्द्वैकवद्भावः, "द्वन्द्वाच्चुदषहान्तात् समाहारे" इति समासान्तष्टच् तेनैव अदन्तत्वम्।

(१७) स्वरोचिषा—निजकिरणेन। अलङ्करोति—प्रकाशयति। तदन्वये—तद्वंशे सूर्यकुले इत्यर्थः। दिशरथताङ्गः—दिशः दशसंख्यकः शताङ्गः रथो यस्य स दशरथ इत्यर्थः। एकराट्—एकाधिपतिः।

(१९) तातान्नया—पितादेशेन। तात—वत्स। व्याजेन—छलेन।

(२२) सिता—शर्करा। अपविद्या—अविद्या, अज्ञानता इत्यर्थः। "देहोऽह-मिति या बुद्धिरविद्या सा प्रकीर्त्तिता"। रोचिका—रुचिकरी।

(२५) भूमिकाः—कीटपतङ्गादिरूपान्तरपरिग्रहरूपाः। व्योमाकाशखखाम्बराब्धि-वसवः—अङ्कस्य वामगत्या चतुरशीतिलक्षसंख्यका (८४०००००) भूमिका इत्यर्थः। मानय मा आनय।

(३२) तनूरुहकुहरे—लोमकूपे। नटनं—नर्त्तनम्। तमिमं—श्रीकृष्णमिति शेषः।

(३३) गुणवत् गुणविशिष्टं चेतः। अगुणं—सौन्दर्यादिगुणरहितं अङ्गम्।

(३४) औत्पातिकम्—अमङ्गलम्। कादम्बरी—मद्यविशेषः। लाङ्गलभृतः—हलिनः बलरामस्य इत्यर्थः।

(३६) कौ पृथिव्यां कोऽपि अपूर्व्वः कापालिकः कपालपाणिः कश्चित् देवः शिव इत्यर्थः कुशलं कलयतु। कल्पान्ते प्रलये क्रूरः संहारकारकः केलिः क्रीड़ा यस्य सः। क्रतुकदनकरः—यज्ञविनाशकः। कलितः स्वीकृतः कुमुदिनीकामुकः चन्द्रः येन सः। कङ्कालक्रीड़नोत्कः कङ्कालैः अस्थिभिः क्रीड़ने खेलायां उत्कः उत्सुकः। कलितकलकलः कलिता अवलम्बिता: कलेन मधुरास्फुटध्वनिना: कला: नृत्यगीतवाद्यादिरूपा: येन सः, अथवा कलितः गृहीतः कलकलः कोलाहलो येन। काली कृष्णवर्णा काली कलत्रं यस्य तादृशः। कालिन्दीव कालः कृष्णः कण्ठो यस्य सः।

(३७) दोषाकरः—चन्द्र ; (पक्षे) दोषाणामाकरः। द्विजिह्वः—सर्पः ; (पक्षे) द्विभाषी। पाषाणजा—पार्व्वती ; (पक्षे) कठिनहृदया। पशुः—वृषः। अन्तरङ्गः—आत्मीयः प्रियः इत्यर्थः।

(४०) धूर्ज्जटिमूर्द्धनि—शिवमस्तके। मध्यस्था—मध्यदेशवर्त्तिनी, (पक्षे) विवादनाशिनी। वैधवी—विधुसम्बन्धिनी, (पक्षे) विधाहृतता। मिलनात्—कुलचन्द्रमते मिलधातोः पाक्षिककुटादित्वं, अतएव मिलनं मेलनमिति रूपद्वयसिद्धिः। तथाच— "महापातकिनः पञ्च मिलितव्यं न तैः सह"—इति शिष्टप्रयोगः।

(४१) कपिवरमुखः—नन्दी ; तस्य वानरवन्मुखमिति प्रसिद्धिः।

(४३) उज्झित्वा—त्यक्त्वा। वासः—वस्त्रम्। पितृवने—श्मशाने। वासरसं—वसतिसुखम्। श्रीखण्डसारद्रवैः—चन्दनरसैः।

(४४) सीमन्तिनी—सीमन्तः केशविन्यासः, सोऽस्या अस्तीति सीमन्तिनी रमणी। त्रिलोकरक्षां—त्रयवयवो लोकस्त्रिलोक इति शाकपार्थिवादित्वात् समासः, द्विगुसमासे तु त्रिलोकीति स्यात्। तस्य रक्षा ताम्। कपालपाणिः—कपालः भिक्षाभाजनं पाणौ यस्य तादृशः सन्। अत्र पुनःशब्दोऽवधारणे, न प्रयात्येवेत्यर्थः।

(४७) दण्डी—महाकालः। एते सदैव तं रक्षन्ति।

(४८) ह्रीरूपा—लज्जारूपा। दिगम्बरा—नग्ना। क्रमते—पादविक्षेपं करोति। "अनुपसर्गाद्वा" इति पाक्षिकमात्मनेपदम्।

(४९) अखिलेषु गलेषु—पञ्चवक्त्रत्वात् पञ्चसु कण्ठेषु। हिमशैलजां—दुर्गां। लीलया—विलासेन।

(५०) कालकूटकवलज्वालानां अपनुत्त्यै अपनोदनाय। तत्—अक्षि,फुल्ल-कमलम्।

(५१) स्वर्गौकसां—देवानाम्। स्तुतिगिरा—स्तोत्रवाक्येन। संग्राममुक्तवसना—संग्रामे मुक्तं वसनं यया तादृशी।

(५२) विधेः कुण्ड्यां—ब्रह्मणः कमण्डलुमध्ये। गर्भार्त्तिविध्वंसिनी—मुक्तिदायिनी।

(५६) गन्धः—लेशः। एषा व्याघ्री यं ग्रसति तस्य जन्मान्तरपरिग्रहेण देहसम्बन्धो न भवति, तदस्याश्चित्ररूपत्वमिति।

(५७) जीवनं—जलं ; (पक्षे) प्राणान् ।

(६०) विहगपुङ्गवपुङ्गववाहनं—विहगेषु पुङ्गवः श्रेष्ठः गरुड़ः, पुङ्गवः पुमान् गौः वृषश्च तौ वाहने यस्य तत्। मकरकुण्डलि—मकराकृतिकुण्डलधारि। कुण्डलि-कुण्डलि—कुण्डली सर्पः स एव कुण्डलं, तद्विशिष्टम्। चन्द्रकिचन्द्रकि—चन्द्रकिनः मयूरस्य चन्द्रकः पुच्छमिति यावत्, तद्विशिष्टम्। चन्द्रकि—चन्द्रकश्चन्द्रः सोऽस्यास्तीति, चन्द्रशोभितमित्यर्थः। तृतीयचरणे भ्रमरचार्थं "वपुरिदं कमलेशगिरीशयोः" इत्येव पाठः समीचीनः।

(६१) अम्ब—मातः। रन्तुं—क्रीड़ितुम्। मुषली—बलरामः। व्यादेहि—विस्तृतं कुरु आननमिति शेषः।

(६२) विधुरा—कातरा। जनयित्रि—जननि। प्रोन्मीलेत्यादि—प्रकर्षेण उन्मीलत् स्मितं यत्र तादृशं मुग्धं मनोहरं नम्रं वदनं यस्याः सा तथोक्ता।

(६५) वारिदसम्भ्रमात्—मेघभ्रान्त्या। शुक्लमित्यादि राधाया उक्तिः। तक्रैः—तक्रं घोल इति भाषा।

(६६) कुम्भीशः—करीन्द्रः। हरिमध्यकम्—सिंहकटिदेशः। विधिकृतम्—मम एतत् सर्व्वं विधात्रा निर्म्मितं तत्र मे को दोष इति भावः।

(६७) पण्यवीथिकां—विपणिम्। आलि—सखि। उज्ज्वलगुणं—गुणः सूत्रम् ; (पक्षे) दयादाक्षिण्यादिगुणः। केशबन्धनं—केशबन्धनवस्तुविशेषं, (पक्षे) केशवं कृष्णरूपं धनम्।

(६८) भिक्षुः—शिवः भिक्षुकश्च। मखे—यज्ञे। पशुपतिः—शिवः ; सिंहश्च।

पन्नगभूषण:—शिव: ; (पक्षे) विष्णु:। शेते स शेषोपरि—विष्णोरनन्तशय्या प्रसिद्धैव। विषादं—विषपायिनं शिवम्।

(६९) गङ्गाधरपत्नि—सपत्नीविशिष्टे। सापि स्वामिनस्तव शिरसि वर्त्तते इति अभिप्राय:। चक्रिवधु—चक्रिण: विष्णो: छलनाप्रियस्येति अभिसन्धानम्। नर्त्तक:—शिवस्य ताण्डवं प्रसिद्धम्। सर्पकुतुकी शिवस्य सर्पभूषणत्वात्। विषादी—विषं गरलं अत्तीति गरलपायी विषस्य।

(७१) मौलौ—मस्तके। नीलेत्यादि—अलकाघूर्णकुन्तला:, वेणिका—विन्यस्त-केशपाश: ; अलकसहिता वेणिका, पश्चान्नीला अलकवेणिका नीलालकवेणिका। वीचिका—तरङ्ग:। शफरी—मत्स्यविशेषौ। रथाङ्गद्वयं—चक्रवाकयुगलम्।

(७२) पार्वती प्राह हे अन्धकारे अन्धकस्य तन्नामकासुरस्य अरि: शिव: तत्-सम्बुद्धि:। मूर्ध्नि इयं का। मूर्ध्नि अन्धकारे तमसि इयं का इत्येवं पार्व्वती-प्रश्नार्थं घटयित्वा शिवेनोक्तं हे सुभ्रु कान्त: सुन्दर: इन्दु: तेन युक्ते इह मूर्ध्नि तिमिरं कुत: नास्त्येव तिमिरमित्यर्थ:। पार्वती तु कान्तेन्दुयुक्ते इत्यस्य कान्ता च इन्दुश्च ताभ्यां युक्तं तस्मिन् मूर्ध्नि इत्यर्थमाकलय्याह कान्तेत्यादि ; अपि प्रश्ने अत्र शिरसि अपि काचित् कान्ताऽस्ति। ननु भवतु—एवमितिशेष:, ननुशब्दोऽत्र आक्षेपे। एतावदेव—कैयं कान्ता इत्येव। द्वन्द्वं—कलहं। अपनय—दूरीकुरु। प्रतिवचनजित:—प्रत्युत्तरदाने पराभूत:।

(७३) पशुपति:—शिव:, पक्षे पशूनां राजा। हरि:—सिंह:। देवोमापति:—देव: उमापति: शिव:, अहमिति शेष:, एवं परत्र ; (पक्षे) देव: मापति: मा लक्ष्मीस्तस्या: पति: विष्णु:। शूली—शिव:, पक्षे शूलरोगी च। भीम:—संहारकर्त्ता शिव:, पक्षे द्वितीयपाण्डवश्च। तत्परिहासेत्यादि—तस्या: पार्वत्या: परिहासक्रीडाच्छलेन। मुग्ध: हतबुद्धि: प्रतिवक्तुमक्षम इत्यर्थ:।

(७४) रूक्षं—निष्ठुरत्वम्। नि:स्नेहा—प्रेमशून्या। भस्मपरुष:—करीषकर्कश:। स्नेहं—तैलादिद्रववस्तु। विन्दति—लभते। निष्फल:—अकारण:। स्थाणो:—शिवस्य ; (पक्षे) शाखादिरहितद्रुमस्य।

(७५) शूली—शिव: शूलरोगी च। मृगयेति अदन्तचुरादिमृगधातो: परस्मैपदित्वा-भावात् अन्वेषणार्थमृगशब्दात् करोत्यर्थे णिचि मृगीति नामधातो र्लोटिरूपम्। नीलकण्ठ:

—शिवः मयूरस्य । पशुपतिः—शिवः सिंहस्य । स्थाणुः—शिवः निःशाखवृक्षस्य । शिवायाः—पार्वत्याः शृगाल्याश्च । जीवितेशः—पतिः । हतवचाः—निर्वाक् ।

(७६) ज्वलनात्—अग्नेः । वैश्रवणात्—कुवेरात् । रामजनार्दनाभ्यां—परशुरामनारायणाभ्याम् ।

(८१) खड्गिभिः—खड्गधारिभिः रचकैः ; (पचे) गण्डकैः । गजैः—हस्तिभिः ; (पचे) वानरविशेषैः । कञ्चुकिभिः—अन्तःपुरचारिभिः कार्य्यकुशलवृद्धविप्रैः द्वारपालैर्वा ; (पचे) सर्पैः । महिषीभिः—कृताभिषेकाभिः रमणीभिः ; (पचे) महिषस्त्रीभिः ।

(८२) तिमिरारि :—सूर्य्यः । शङ्कितमानसाः—अस्माकञ्च तिमिरवर्णतया यदास्मानपि हन्यादिति भीतचित्ताः । रटन्ति—शब्दायन्ते । प्रगे—प्रत्यूषे, प्रगे इत्यव्ययम् । द्विकाः—काकाः ।

(८३) पचग्रहः—उड्डयनपचावलम्बनम् । गिरं—वाचं । ध्वाङ्क्ष—काक । उन्नाटयन्—अभिनयन् अनुकुर्व्वन्नित्यर्थः ।

(८६) कवलितं—भुक्तम् । कन्दलं—नवाङ्कुरः । कुमुदकोषे—कुमुदकुसुमाभ्यन्तरे । सहचरपरिमुक्ता—चक्रवाकविरहिता ।

(८७) जीवनेन—जीविकया । कौलव्रतोच्छेदप्रसङ्गः—वंशपरम्परागतनियमभङ्गप्रसक्तिः । परदुःसहः—अतिक्लेशकरः । अतएव चातकः प्राणान्तेऽपि वृष्टिजलं विना नान्यज्जलं पिबतीति भावः ।

(९०) कोलावतारः—वराहावतारः ।

(९१) कर्दमपानीयं—कर्दममिश्रं पानीयमिति मध्यपदलोपी कर्म्मधारयसमासः । मकमकेति शब्दं करोति सगर्व्वमिति शेषः ।

(९२) मद्वासः—ममावासस्थानात् । वाढ़ं—स्वीकारे । दर्दुरः—भेकः ।

(९५) केकिवर—मयूरराज । गोपालमौलिमुकुटे—श्रीकृष्णस्य मस्तकस्थे मुकुटे ।

(९६) केका—मयूरस्य कण्ठरवः । कवरी—रमणीनां केशविन्यासः । कलापाः—मयूरपुच्छानि । द्विजिह्वः—सर्पः । पिशितैः—मांसैः ।

(९८) सिंहिका—सिंही; (पक्षे) राहुमाता। साश्रयं—आश्रयचन्द्रेण सहितम्।

(१००) मलयजजर्चैः—चन्दनचर्चैः। क्षुन्निर्वाहः—क्षुधाशान्तिः। आशीविषः—सर्पः।

(१०१) एणः—हरिणः। द्वीपी—व्याघ्रः। क्रोष्टा—शृगालः। वज्रति—गच्छति। रुरुः—मृगविशेषः। करिपोतकैः—हस्तिशावकैः।

(१०२) नीरजराजितं—पद्मसुशोभितम्। मानसं—चित्तं; (पक्षे) मानस-नामकः सरोवरः।

(१०३) विकचपङ्कजालिखञ्जत्परागधवलीकृते—विकशितपद्मसमूहेभ्यः पतत्-पुष्पपरागैः शुभ्रीकृते। विवदने—विमुखे। विधौ—विधातरि।

(१०५) पानार्थिनः—मत्तहस्तिनो गण्डनिःसृतं मदजलं पिपासवः। मदान्ध-बुद्ध्या—मदेन अन्धा सदसद्विवेकहीना या बुद्धिस्तया। अनेन भृङ्गदूरीकरणेन करिवर-स्यैव क्षतिर्न पुनर्भृङ्गानां, यतस्ते हस्तिमदवत् कमलमकरन्दमपि पिबन्ति। एकस्मिन् द्वारे रुद्धे शतं द्वाराण्युद्घाटितानि सन्ति याचकानामिति भावः।

(१०६) दलसन्दोहैः—पत्रसमूहैः। कुजन्मनः—कुत्सितं जन्म यस्य स तस्य; (पक्षे) कौ पृथिव्यां जन्म यस्य तस्य। कुपुरुषस्य यथा नैतच्चित्रं तथा कुजन्मनस्तरोरपीति श्लेषः।

(१०८) अस्थानपतितः—अस्थानपतितः। मरुभुवः—मरुप्रान्तरस्य।

(१११) कश्चित् धनिनमुद्दिश्य उक्तिरियम्।

(११३) गिलिताकाशाः—गिलिनः स्पृष्ट इत्यर्थः आकाशो यैस्ते, गगनस्पर्शिनः। जनताचेतोनन्दनः—जनसमूहस्य चित्तानन्ददायकः।

(११४) तर्पिताः—प्रीणिताः। वासिताः—सुरभीकृताः। अपहातुं—परिहर्तुम्। ईहते—चेष्टते। क्षुत्—क्षुधा। न लगति—न पीड़यति। फलाभावात् क्षुधां निवारयितु-मक्षमस्त्वं क्षुधार्त्तैरगत्या परित्यज्यसे न तु स्वेच्छयेति भावः।

(११५) जगत्प्राणः—वायुः। जीवनं—जलं; (पक्षे) प्राणान्। यमदूतिका—यमालयप्रापिका; (पक्षे) तिन्तिड़ी।

(११६) अतिमाधुर्य्येण जितपीयूषस्य पनसस्य कण्टकिफलस्य। मातुलपुत्रकस्य—धुस्तूरपुष्पस्य।

(११७) करैः—सूर्य्यकिरणैः। गुप्तं—रचितम्। दलैः—पत्रैः।

(११८) तरलीभवन्ति—आलोकाय समन्तात् सञ्चरन्ति। कोकः—चक्रवाकः। शोकं—चक्रवाकीविच्छेददुःखम्। मत्तमनसः—हृष्टचित्ताः। क्रों—तदाकारमव्यक्त-शब्दम्। कौशिकाः—पेचकाः। सदसद्विवेकविधुरः—भद्राभद्रविवेचनाविरहितः। इतीव—इति मत्वेव। मुद्रितवती—निमिमील। पद्मेक्षणं—पद्ममिव ईक्षणं चक्षुः। दिवा-वसाने प्रकृत्या मुद्रितस्य पद्मस्य इत्थं भावान्तरं कविरुत्प्रैक्षत।

(११९) किंशुके—पलाशतरौ। बाह्यरङ्गप्रपञ्चेन—बहिःप्रकटितसुन्दरवर्ण-विस्तारेण।

(१२०) शाखेत्यादि—शाखानां सन्तत्या विस्तारेण सन्निरुद्धं समाच्छादितं नभः गगनं यै स्ते। अविकलैः—अविकृतैः शोभनैरित्यर्थः। आर्त्तिच्छिदः—पीड़ापनोदकाः। द्विवदलैः—द्वे वीथि वा परिमाणं येषां तानि द्विवाणि, तानि दलानि तैः, द्विवदलैः। शालेः—हैमन्तिकधान्यस्य। स्तुमः—प्रशंसामः। तुङ्गतां—औन्नत्यम्। सुकृतिना—पुण्य-कर्म्मणा।

(१२१) सङ्कोचं—क्षुद्रत्वम्। अञ्चति—प्राप्नुवति। दीनदीनः—दीनेभ्योऽपि दीनः।

(१२२) पूरः—जलोच्छ्वासः। तटिनि—हे नदि। तटेत्यादि—तटद्रुमाणां तीरस्थ-वृक्षाणां पातनेन यत् पातकं पापं तत्।

(१२४) मधुरनिस्वनैः—मधुरैः श्रोत्रसुखैः निस्वनैः शब्दैः विधुरं—जलार्थं कातरं मामिति शेषः। आश्वसिषि—आश्वस्तं करोषि। आदरात्—आदरं प्रदर्श्येत्यर्थः।

(१२५) नभसि—आकाशे। निरवलम्बे—निराधारे। सीदता—अवतिष्ठ-मानेन। त्वदभिमुखेत्यादि—तव अभिमुखं त्वां लक्ष्यीकृत्येत्यर्थः निविष्टं स्थापितं उत्तान-मुद्गतं चञ्चूपुटं येन तथोक्तेन।

(१२६) विहृत्य—विचरणं कृत्वा। दिधक्षोः—दग्धुमिच्छोः।

(१२८) शीकरवर्षिभिः—सजलकणैः। निस्वनैः—कण्ठध्वनिभिः। उन्निद्रैः—विकसितैः। अमलैः—स्वच्छैः। नीत्वा—प्रापय्य। निर्वृतिं—सुखम्। चीणधनां—

शीकरवर्षिं वातादिसम्पद्विहीनां। वहन्—धारयन्। धन्यः—श्लाघ्यः। मृणालीच्छलात्—बिसवितरणव्याजेन। नवेन्दुविशदानि,नवेन्दुर्द्वितीयाचन्द्रः तद्वत् विशदानि शुभ्राणि नवेन्दोरुपमानत्वात् सूक्ष्माणीत्यपि प्रतीयते। अस्थीनि-मृणालरूपकीकसानि। पद्माकरः—पद्मोत्पादकः सरोवरः। यदा शीकरवर्षिं वातादिसम्पदो न सन्ति तदा पद्माकरः सरोवरः स्वस्य मृणालरूपाण्यस्थीन्यपि याचकेभ्यो ददातीति स धन्य इति विशदार्थः।

(१२९) बद्धः—सेतुबन्धनसमये वानरैरिति शेषः। गिरीत्यादि—गिरिणा मन्दराख्येण यत् मथनं विलोड़नं तेन मूषितमपहृतं सर्व्वस्वं यस्य स देवासुरैरिति शेषः। परभीतेत्यादि—परस्मात् शत्रोः पचच्छेत्तुरिन्द्रादित्यर्थः, भीतस्य भूधरस्य मैनाकस्य रक्षायाम्। दीक्षितः—धृतव्रतः कृतनिश्चय इत्यर्थः।

(१३०) गुरुतागर्व्वं—अतिगभीरजलत्वेन यद् गुरुत्वं तस्य गर्व्वस्तं। अन्यस्मात्—अपरजलाशयात्। पोतस्थाः—अर्णवयानारोहिणः।

(१३१) कल्लोलेन—महातरङ्गेण वेल्लिताः चालिता ये दृषदः प्रस्तरखण्डाः तेषां परुषाः कठोरा ये प्रहारास्तैः। मकराकर—हे हिंस्रजलचरनिलय। प्रस्तराघातेन रत्नान्यवमन्यमानस्य सागरस्य तदानीं रत्नाकरेति विहाय मकराकरशब्देन सम्बोधनं समुचितमेव। मावमंस्थाः—अवमाननां मा कार्षीः। कौस्तुभेन—तन्नाम्ना विष्णुवचःस्थस्थितमणिविशेषेण। तव नाम—रत्नाकर इत्यर्थः।

(१३२) वारां—जलानां, अत्र "दयार्थानां वा" इति करणे षष्ठी। तृष्णा—अत्र अनलिप्सा। ताम्यत्तिमिमकरं—ताम्यन्तः खिद्यमानाः तिमिमकरा यत्र तम्। मुनिः—अगस्त्यः।

(१३३) व्रजतः—विष्णुसमीपं गच्छतः। पाथोनिधे—हे समुद्र। आन्तरं—अन्तर्गतं तवेति शेषः। आवहेथाः—कुर्य्याः। न कदाचिदेनं विस्मरेरित्यर्थः।

(१३५) ध्वान्तौघः—अन्धकारसमूहः। निर्व्वान्ति सूर्य्योपलाः—सूर्य्यकान्तादयो मणयः निर्व्वाणतां लभन्ते। ध्याङ्क्षभिया—काकभयात्।

(१३७) इयं हि लौकिकी रीतिर्यद् बद्धस्तिष्ठति मुक्तश्च धावतीति। अत्र तु तद्वैपरीत्यमिति।

(१३८) यस्य हृदयं नास्ति स कथं सहृदयो भवतीति विरोधाभासः। तत्-परीहारस्तु उदरचिन्तापरास्तु खलादुन्नतमना इत्यर्थकरणात्।

(१३९) अन्तकः—यमः। अन्तकालं—मृत्युसमयम्। उत्तमर्णस्य—ऋणदातुः।

(१४१) तेन—तेजसा। तेजीयसां—तेज इति शेषः। न—न सह्यमिति शेषः। सिकता—वालुका; रवितेजसा तापिता इत्यर्थः।

(१४३) अवयः—मेषान्छागका वा। केवलकवयः—विद्यारहिताः कविता-लेखकाः। केवलं धीराः—विद्यासम्पन्नाः कवितारचनानभिज्ञाः। कीराः—शुकपक्षिणः। वीराः पण्डितकवयः—ये जनाः पण्डिताः कवितारचनाशक्तिसम्पन्नाश्च त एव वीराः सर्वेषां जेतार इत्यर्थः। अवमन्ता—अवमाननाकारी। गवयः—गोवत् पशुविशेषः वानरविशेषो वा। श्लोकोऽयं उद्गीतिच्छन्दः।

(१४४) कुशलैः—दक्षैः अश्वचालननिपुणैरित्यर्थः।

(१४६) अणुः—क्षुद्रः अल्प इति यावत्। नितरां—सम्यक्। तक्रस्य—"घोल" इति यस्य प्रसिद्धिः तस्य।

(१४८) बोधयन्ति विज्ञापयन्ति। लोकानां—मध्ये इति शेषः। अदातुः—कृपणस्य।

(१४९) मृदां—मृत्तिकानाम्, कर्म्मणि षष्ठी। मुदे—आनन्दाय।

(१५०) दशमो ग्रहः—नवभ्यो ग्रहेभ्यो विलक्षण इत्यर्थः।

(१५२) सिद्धपुरुषो हि स्वमहिम्ना सर्व्वं पश्यति, तन्तु न कोऽपि द्रष्टुं शक्नोतीति साम्यम्।

(१५३) विह्लणकवेः प्रपितामहो भट्टमुक्तिकलस इति विक्रमाङ्कदेवचरितेऽष्टादश-सर्गे निर्णीतम्। "द्वन्द्वो द्विगुरपि चाहं मद्गेहे नित्यमव्ययीभाव" इति वङ्गदेशीयः पाठः। द्विगुः—द्वौ गावौ यस्य सः। सद्वन्द्वः—स्त्रीपुरुषरूपव्यक्तिद्वयात्मकः। अव्ययीभावः—व्ययाभावसम्पन्नः। तत्पुरुष······बहुव्रीहिः—हे पुरुष तत् कर्म्म धारय कुरु येन अहं बहुव्रीहिः बहुधान्यसम्पन्नः स्याम्।

(१५४) मुषली—गृहगोधिका, टिकटिकी इति भाषा। असून्—प्राणान्। लतातन्तुः—ऊर्णनाभजालम्।

(१५८) कर्णामृतं—श्रुतिसुखदम्। सूक्तिरसं—कविवचनमाधुर्य्यम्। केलिवनं—क्रीड़ाकाननम्। क्रमेलक:—उष्ट्र:।

(१५९) सुनिष्णात:—सुनिपुण:, वेदान्तशास्त्राणां निखिलनिगूढतत्त्वविदपि। मैनाक:—तदाख्यो गिरि:। स च पर्व्वतपक्षच्छेदनप्रवृत्तपुरन्दरभयात् समुद्रं प्रविवेशेति पौराणिकी वार्त्ता। मार्द्दवं—समुद्रे चिरमज्जनेनाप्यवयवशैथिल्यात् कोमलत्वम्।

(१६०) मित्रोदये—मित्रस्य सुहृद:; (पक्षे) सूर्य्यस्य। उदये—अभ्युन्नतौ; (पक्षे) प्रकाशे। म्लानिं—मालिन्यम्। दोषागमे—दोषस्य अनिष्टस्य आगमे उपस्थितौ; (पक्षे) दोषा रात्रि: तस्या आगमे। सम्बन्धमात्रेण—सम्पर्कमात्रेण। दहति—अनिष्टमाचरति; (पक्षे) सुगमम्।

(१६१) आविष्कृतान्—अगोपितान्। कलयन्ति—साभिनिवेशं शृण्वन्ति। तूष्णीं—मौनमवलम्ब्येत्यर्थ:। दुर्य्यतस:—खला:। ननु—अवधारणे। रागात्—अनुरागात्। नली व्याधानां पक्षिवेधनशरविशेष:। सप्तानां नलानां समाहार: सप्तनली; निजा सप्तनली ताम्।

(१६२) आशायहग्रस्तै:—आशाकुम्भीरै: कवलीकृतै:।

(१६३) दशपुत्रपुत्रिणी—दशपुत्रजननी।

(१६७) स्पष्टिकृता—विधवा। वृत्ति:—जीविका। प्राय:—बाहुल्येन।

(१६८) यते: व्रतानुरोधात्, सेवकस्य तु द्रव्याभावात्। पापधर्म्मजं पार्थक्यं—सेवकस्य पापजनित: यतेस्तु धर्म्मजनित: प्रभेद:।

(१७०) हरे:—घोटकस्य। "हरिरिन्द्रो हरिर्भानुर्हरिर्विष्णुर्हरिर्मरुत्। हरि: सिंहो हरिर्भेको हरिर्वाजी हरि: कपि:। हरिरंशुर्हरिर्भीरुर्हरि: सोमो हरिर्यम:। हरि: शुक्रो हरि: सर्प: स्वर्णवर्णो हरि: स्मृत:"—अनेकार्थध्वनिमञ्जरी। स्पर्द्धा—विवाद:। विदुषा—पण्डितेन सहेत्यर्थ:। तथाच—"समुन्नयन् भूतिमनार्य्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभि:।"—इति किराते।

(१७१) दारान्—अत्र दारशब्देन लक्षणया दारगतरूपलावण्यादिकं बोध्यम्। तच्च अपत्यजननान्तरमेव नश्यतीति।

(१७२) याचकं प्रार्थनां कुर्व्वाणं जनं लोक: अर्थिनं धनवन्तं वदति। रत्ना-

कर्त्तारं जगत्पालकं विष्णुं जनार्द्दनं लोकपीड़कं कथयति। संहारकं संहारकर्त्तारं देवञ्च शिवं मङ्गलनिदानं वक्ति। लोकः भुवि जगति निरङ्कुशः निरर्गलः।

(१७८) रसभावोत्कटाः—रसभावोत्कृष्टाः। नवायन्ते—नवा इव आचरन्ति।

(१७९) नयः—नीतिः। दाक्ष्यं—बहुषु कार्य्येषु पटुत्वम्। नावसीदति—न दुःखमनुभवति।

(१८५) एतत् पूर्व्वोक्तं विविधं दानं। "नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्" इति क्लीवत्वं पाक्षिकमेकत्वञ्च।

(१८६) यथा काचिद्बालिका प्रांशुद्रुमात् पुष्पाणि चेतुमशक्नुवती दण्डेनाहत्य बलाद् गृह्णाति तद्वदिति व्यज्यते।

(१९०) मृतं—मरणं, नपुंसके भावे क्तः। अमृतायते—अमृतमिव आचरति।

(१९३) कुम्भोद्भवेन मुनिना—कुम्भजातेन ऋषिणा अगस्त्येन इत्यर्थः।

(१९४) अव्ययेभ्यः—न विद्यते व्ययो येषां तेभ्यः कृपणेभ्य इत्यर्थः; (पक्षे) अव्ययशब्देभ्यश्च।

(१९५) अन्तरायो विघ्नः तेन परियस्तः। दुर्द्दिनं—मेघाच्छन्नदिनं "मेघाच्छन्नेऽह्नि दुर्द्दिनम्" इत्यमरः।

(१९७) अपूर्व्वेव—अपूर्व्वा अभिनवस्वरूपा एव तिष्ठतीति शेषः। अपूर्व्वत्वं विवृणोति तरन्तीत्यादिना। अधःस्थिताः—निम्नदेशवर्त्तिनः अवनता इत्यर्थः। तरन्ति—ज्ञानोपदेशेन संसारक्लेशं नानुभवन्ति। उपरिवर्त्तिनः—मर्य्यादां लङ्घयितुकामाः मज्जन्ति—ज्ञानोपदेशं विना अधोगच्छन्ति; (पक्षे) सुगमम्।

(१९९) अनामा—अनामिका, अङ्गुरीयधारणोपयोगिनी अङ्गुली।

(२०१) ब्रह्मन्—भगवन्। द्विजजन्मनां—द्विजे द्विजवंशे जन्म येषां तेषाम्।

(२०४) गृहिण्याः—भार्य्यापेक्षया, "पञ्चमी विभक्ते" इति विभक्तनिर्द्धारे पञ्चमी। कौस्तुभः—समुद्रमन्थनजातत्वात् लक्ष्म्याः सोदरत्वं कौस्तुभस्य।

(२०५) यत् स्वल्पमपि धनं लभ्यते तदेव बहु मन्यते इत्यर्थः।

(२०६) भूभृतां नृपाणां पर्वतानाञ्च तुष्टिकरी। एकधर्माणौ एक: अभिन्न: धर्म: भूभृत्तुष्टिकरत्वरूपो ययोस्तौ। "धर्मादनिच् केवलात्" इति बहुव्रीहौ समासान्त: अनिच्प्रत्ययस्तेनैव नान्तत्वं। तयो: करीन्द्रस्य रेफस्य कवीन्द्रस्य वकारस्य भेद: पार्थक्यं ; (पक्षे) रवश्च रवश्च तौ तयो: इति एकशेषे रवौ कण्ठस्वरौ तयोर्भेद:।

(२०७) यथा कस्याश्चित् कुरङ्गदयिताया अतिलोलं जीवितं सिंहयाईं लयोरन्तरमासाद्य नातिचिरमुत्सहते स्थातुं तद्वत् सुकवितापि नैयायिकवैयाकरणयो: स्थूलहस्तावलेपान् परिहरन्ती नास्पदं लब्धुं शक्नोति सुधीसमाजेषु।

(२०८) साधुसमीपे श्लोक: असाधुसमीपे च शोक इति भाव:।

(२१६) सारमेया:—कुक्कुरा:। एणी—हरिणी। बालकै:—शावकै:।

(२१७) संसारे शयने—संसाररूपशय्यायां अविद्यामयीं मायामयीं निद्रां लब्ध्वा हे चित्त त्वं विघूर्णितं सत् इमान् पूर्वोक्तान् बहुविधान् स्वप्नान् पश्यसि।

(२१८) पदवी—मार्ग:। दवीयसी—अतीव दूरवर्त्तिनी। अन्तरा—मध्ये।

(२२०) अशनं खाद्यद्रव्यम्। वसनं वस्त्रम्। मी मी कुर्वाणम्—मम मम इति कुर्वाणम् ; (पक्षे) मी-मी-नामकं छागध्वनिं कुर्वाणम्। कालवृक:—काल एव वृक: व्याघ्र:। पुरुषाजम्—पुरुष एव अज: छाग: तम्।

(२२१) रामेण त्वरस्वेति सीता कथिताभूदित्यन्वय:।

(२२२) भ्रान्तिरूपया कन्थया लसन् विराजमान: कण्ठो यस्य। मन एव स्थाली पात्रं तत्र मिलन्तौ करौ यस्य। त्रिपुरारिपुरद्वारि—शिवगृहद्वारे।

(२२३) पुन:पुन: वारंवारं। स्वसन्निधिं स्वनिकटं। मन्दकन्दुकवत्—नीचकन्दुकवत् नर: मृत्यो: यमस्य क्रीड़नकं क्रीड़ार्थवस्तु।

(२२४) निदाघ:—ग्रीष्मकाल: उत्ताप इत्यर्थ:। अलं—समर्था।

(२२५) बलिकल्पित: बल्यर्थं कल्पित: उपस्थापित: मेष: यथा मूर्ध्नि शिरसि न्यस्तं उत्सर्जनार्थं प्रदत्तं दूर्वाचताद्यं मुदा आनन्देन अत्ति खादति। अन्यत् सुगमम्।

(२२६) पर्यणायि—परिणीता। परिपूर्व्वकात् नीधातो: कर्म्मणि लुङ्। जनकस्य—मिथिलाधिपते: ; (पक्षे) पितु:। अजवंशजन्मन: अजस्य दशरथपितुर्वंशाद् जन्म यस्य तस्य ; (पक्षे) छागवंशजातस्य।

(२३०) स्वजनकं—निजपितरं मृगम्। कस्तूर्या: मृगनाभिजातत्वात्।

(२३१) जीवनदानैः—जलदानेन जीवनरक्षणैः। तर्षामर्षं—तर्षस्तृष्णा तज्जनितः अमर्षः असहिष्णुता तम्।

(२३४) द्वाविंशदिति—द्वाविंशती दशना दन्ता त एव द्वेषिणः शत्रवः तेषां मध्ये। शिक्षितमिति णिजन्तप्रयोगः। सञ्चारकौशलम्—शत्रुमध्ये विचरणनैपुण्यम्।

(२३६) सर्व्वं ते न्याय्यं किन्तु गुञ्जया कनकतुलना न ते न्याय्या इति।

(२३८) कोटिरग्रभागः तस्या इयं तस्य। सद्वंशजं—उत्तमवेणुजातं। नतं अवनतं। असद्वंश्यः निकृष्टवेणूत्पन्नः। लक्षः शरव्यं तस्य लाभाभिशङ्कया तत्-प्राप्त्याशया लब्धः।

(२३९) पयोधरपदं—मेघस्थानं। ज्वलनस्य—स्वोत्पादकस्य वह्नेः। स्वबन्धु-जनम्—अनलादेव धूमोत्पत्तेरितिभावः।

(२४०) अनन्तः—विष्णुः ; (पक्षे) असंख्या जनाः। पुनर्भवः—पुनर्जन्म ; (पक्षे) नखः। नखरञ्जनी—नरुन् इति भाषा।

(२४१ भूसुराः ब्राह्मणाः सूरयः पण्डिताः तैः सेवितं। महद्भिः सेवितत्वात् महत्त्वं नखस्य प्रकटितं। प्रशंसार्थे सु इत्यस्य उपसर्गनिषेधात् षत्वाभावः।

(२४२) दारुणा—काष्ठेन करणेन ; पक्षे निष्ठुरा (जिह्वाविशेषणम्)।

(२४३) स्नेहः—तैलं ; (पक्षे) आसक्तिः। पात्रं—सत्पात्रं ; (पक्षे) आधारः।

(२४४) परिपन्थिनम्—साधारणशत्रुम्। अनुगतशत्रुम्—शरणागतशत्रुम्। श्लोकेऽत्र उपगीतिच्छन्दः।

(२४५) सद्गुणः—उत्तमगुणविशिष्टः ; (पक्षे) सूत्रवद्धः। वंशोद्भवः—वेणूत्पन्नः ; (पक्षे) सत्कुलजातः।

(२४७) आकोपितः—सम्यक् क्रोधितः। मधुरं हि—मिष्टवचनमेव। रौति—ब्रवीति। हास्येन—परिहासच्छलेन। कलहे—विवादव्यापारे।

(२५०) साधुरेव—प्रकृत्या साधुरित्यर्थः। मधुरं हि—मधुरमेव। "अतीत्य हि गुणान सर्व्वान् स्वभावो मूर्ध्नि वर्त्तते" इति भावः।

उद्भट-सागरः ।

द्वितीय-प्रवाहः ।

शुद्धि-पत्रम् ।

अशुद्धिः	पृष्ठम्	पङ्क्तिः	शुद्धिः
सर्व्वं सहाया	७	७	सर्व्वंसहायाः
वह्निर्मू य	७	१५	वह्निर्मूंय
स्तोति	१३	१३	स्तौति
केलि	१३	१४	केलिः
भूषाभुजङ्गव्रजः	१५	१८	भूषा भुजङ्गव्रजः
दशनाग्रदष्टा	१८	१८	दशनाग्रदष्टा-
लाङ्गूलं	२६	१६	लाङ्गुलं
तरुर्जीवतेश:	२६	१७	तरुर्जीवितेशः
रावो	३०	१०	रावौ
कर्षघातैः	३६	१६	कर्षघातै-
मधुरा	३७	१५	मधुरौ
यातास्त	४३	६	जातास्त
तन्मुखदत्ते घणो	४३	१७	तन्मुखदत्ते घणः
गिरिमथन मुषितसर्व्वस्वः	४५	६	गिरिमथनमुषितसर्व्वस्वः
परभीत भूधर	४५	७	परभीतभूधर-
जगती सूर्य्योपलाः	४७	३	जगतीं निर्वान्ति सूर्य्योपलाः
विंहरन्ति	४७	६	विंहरन्ति
प्रति वचो	४८	१७	प्रतिवचो
सूर्य्योदयो	५२	५	सूर्य्यादयो
तनये	६२	६	तनयात्
मतिरम्रावहाः	६२	११	मतिः सैवारताः

अशुद्धिः	पृष्ठम्	पङ्क्तिः	शुद्धिः
भ्रातभाजां	६९	६	भ्रातभाजां
भूषणां	७२	५	भूषणा
गोपवधूटी-	७३	६	गोपवधूटी
बालकै	७३	१२	श्रावकै
(१)	७६	५	परिहर्त्तव्यमिदम्
विबुधविरंचितं	८०	६	विविधविरचितं
रे शासना	८०	७	तच्छासना
वर्षाम्बूभिः	८१	१०	वर्षाम्बुभिः
अनन्त	८५	१०	अनन्तः
मधुरास्फुटध्वनिनाः	८७	६	मधुरास्फुटध्वनिना
अखिलेषु	८७	२६	अखिलेषु
क्रोष्ठा	९१	६	क्रोष्टा
: विकचपङ्कजालि	९१	१०	विकचपङ्कजालि
पुनर्भ्र ङ्गानां	९१	१४	पुनर्भृङ्गाणां
प्रकठित	९२	१०	प्रकटित
नमः	९२	१२	नभः
सुखम्	९२	२७	सुखम्
विषवितरण	९३	६	विसवितरण
मृणालरूपाण्यं	९३	६	मृणालरूपाग्र
मूषितम	९३	९	मुषितम
पचच्छत्तु	९३	१०	पचच्छे त्तु
जेतारड	९४	१०	जेतार
वोटकस्य	९५	२०	घोटकस्य
द्वारगतरूप	९५	२५	द्वारगतरूप
येषाः	९६	१४	येषां
करत्वरूपी	९७	३	करत्वरूपी
कथिंता	९७	१७	कथिता
प्रशंसार्थे···पत्नाभावः	९८	१५	अंशोऽयं परिहर्त्तव्यः

उद्भट-सागरः ।

तृतीय-प्रवाहः ।

विषय-सूची ।

विषयः **पत्राङ्कः**

उद्भट-सागरः ।

तृतीय-प्रवाहः ।

श्लोक-सूची ।

(स)

(ह)

उद्भट-सागरः ।

तृतीय-प्रवाहः ।

देवता-तरङ्गः ।

परब्रह्म ।

(१)

ब्रह्मा विष्णुः पिनाकी शिखियमपवनाः पाशिचन्द्रार्कशक्रा
नागा गन्धर्वदैत्या ग्रहवसुमुनयः शैलपाथोधिनद्यः ।
देशा द्वीपाश्च मर्त्याः पशुपतगगणाः स्वर्गपातालपृथ्व्यः
संलीना यस्य देहे वसतु मनसि मे विश्वरूपः स नित्यम् ॥

(उद्भटसागरस्य)

(२)

विष्णुर्वा त्रिपुरान्तको भवतु वा ब्रह्मा सुरेन्द्रोऽथवा
भानुर्वा शशलक्षणोऽथ भगवान् बुद्धोऽथ सिद्धोऽथवा ।
रागद्वेषविषार्त्तिमोहरहितः सत्त्वानुकम्पोद्यतो
यः सर्वैः सह संस्कृतो गुणगणैस्तस्मै नमो ब्रह्मणे ॥

(स्वामिदत्तस्य)

(३)

कविरयं मुग्धबोधव्याकरणस्योपसर्गसूत्रमुद्धरन् विंशत्युपसर्गात्मकेन श्लोकेनानेन परब्रह्मोपासनामुपदिशति :—

यदिह कर्णधारो भवोदन्वति निष्परोपाधि सुदुष्प्रापम् ।
अन्तर्निपर्य्यभिव्यापि संप्रति गिरो मनसोऽपि विषयीकुरु तत् ॥

(सरस्वत्युपाधिककृष्णानन्दस्य)

ब्रह्मा ।

(४)

मृणालसूत्रधिक्कारिप्रेमसूत्रसुसंयतम् ।
करोति मिथुनैक्यं यस्तं नमामि प्रजापतिम् ॥

(उद्भटसागरस्य)

सरस्वती ।

(५)

श्रुत्वाऽपि माधवः स्वामी सपत्नीति हरिप्रिया ।
तस्मिन्नेव स्थिरा या स्यात् तां नमामि सरस्वतीम् ॥

(उद्भटसागरस्य)

वीणा ।

(६)

वीणारवच्छलेन सरस्वत्याः खेदोक्तिरियम् :—

आपाणिग्रहणादतिप्रणयिनी कण्ठे स्थिताहं प्रभोः
सर्वैरेव हरिप्रियेति कमला सोऽप्युच्यते माधवः ।
दूनाऽप्यस्मि न तेन मत्सुतगणाः पद्मासुतस्यानुगा
वाण्येत्याधिनिवारणाय सततं संगीयते वीणया ॥

संस्कृत-भाषा ।

(७)

याऽव्यय्यं बीजमेकं जगदखिलगिरां सर्वसाफल्यमूलं
या रम्यस्निग्धवर्णा मृदुमधुरपदालङ्कृतिश्लिष्टसाणा ।
या च्छन्दःसूत्रबद्धा विविधरसगुणा भूरिभावान्विता या
सा भाषा संस्कृताख्या प्रतिजनि कुरुतां सेवकं मां स्वकीयम् ॥

(उद्भटसागरस्य)

विष्णुः ।

(८)

शङ्खोऽन्तः कुटिलो बहिश्च धवलश्चक्रञ्च वक्रं तथा
बद्धास्या च गदाऽम्बुजं मलभवं शेषः सहस्राननः ।
वृद्धात्मा तुलसी चला च कमला हृत्कौस्तुभः प्रस्तरो
भक्तं दर्शयती ह्यतोऽपि कुटिलैरेतैर्युं ईडे हि तम् ॥

(उद्भटसागरस्य)

(९)

भक्तिप्रह्वविलोकनप्रणयिनी नीलोत्पलस्पर्द्धिनी
ध्यानालम्बनतां समाधिनिरतैर्नीतेहितप्राप्तये ।
लावण्यैकमहानिधी रसिकतां लक्ष्मीदृशोस्तन्वती
युष्माकं कुरुतां भवार्त्तिशमनं नेत्रे तनुर्वा हरेः ॥

(भागवतामृतदत्तस्य)

(१०)

किं पाद्यं पदपङ्कजे समुचितं यत्रोद्भवा जाह्नवी
किं वाऽर्घ्यं मुनिपूजिते शिरसि ते भक्त्याहृतं साम्प्रतम् ।
किं पुष्पं त्वयि शोभते व्रजपते सत्पारिजातार्चिते
किं स्तोत्रं गुणसागरे त्वयि हरे केनार्चयेत् त्वां नरः ॥

(११)

भगवन्तं प्रति कस्यचिद् दरिद्रस्योक्तिरियम् :—

दीनं मामपहाय विश्वभरणव्यापारभारं दधत्
सामानाधिकरण्यमन्वयमुरीकृत्याऽसि विश्वम्भरः ।
आस्तां तच्छरणागतं प्रतिदिनं मामेवमापीड़यन्
यद् गोविन्द जनार्दनो भवसि किं तेनापि नो लज्जसे ॥

———

विष्णु-लीला ।

(१२)

श्रीचैव जगन्नाथमूर्त्तिः कथं दारुमयीत्याह :—

एका भार्य्या प्रकृतिमुखरा चञ्चला च द्वितीया
पुत्रोऽप्येको भुवनविजयी मन्मथो दुर्निवारः ।
शेषः शय्या सदनमुदधिर्वाहनं पन्नगारिः
स्मारं स्मारं स्वगृहचरितं दारुभूतो मुरारिः ॥

(जगन्नाथतर्कपञ्चाननस्य)

लक्ष्मीः ।

(१३)

मातः कस्य गुरुमपि कमले संत्यज त्वं विषादं
मा याहि त्वं बलभिदमयि संजृम्भमत्रैव तिष्ठ ।
मा गास्त्वं वा श्वसनमुरुरयं मन्थमुग्धः समुद्र
इत्युक्त्वा यां प्रशमनमनयत् पातु सा लोकमाता ॥

(उद्भटसागरस्य)

लक्ष्मी-चरित्रम् ।

(१४)

आगच्छति यथा लक्ष्मीर्नारिकेलफलाम्बुवत् ।
निर्गच्छति तथा लक्ष्मीर्गजभुक्तकपित्थवत् ॥

(१५)

(क)

लक्ष्मीं प्रति सरस्वत्या दुरुक्तिरियम् :—

हे लक्ष्मि क्षणिके स्वभावचपले मूढ़े च पापेऽधमे
न त्वं चोत्तमपात्रमिच्छसि खले प्रायेण दुश्चारिणी ।
ये देवार्चनसत्यशौचनिरता ये चापि धर्म्मे रता-
स्तेभ्यः क्रुप्यसि निर्दये गतमतिर्नीचोऽपि ते वल्लभः ॥

(विज्जकायाः)

(ख)

सरस्वतीं प्रति लक्ष्म्याः प्रत्युक्तिरियम् :—

नाहं दुश्चरिता न चापि चपला क्षुद्रो न मे रोचते
नो शूरो न च पण्डितो न च शठो हीनाचरो नैव च ।
पूर्वस्मिन् कृतपुण्ययोगविभवः प्राप्नोति मे सत्फलं
लोकानां किमसह्यता सखि पुनर्दृष्ट्वा तदीयं सुखम् ॥

(विज्जकायाः)

(१६)

ब्राह्मणाश्चिरदरिद्राः यतस्ते लक्ष्मीकृपारहिताः । एकदा सर्वे ब्राह्मणा मिलिता नारायणसमीपमुपेत्य ऊचुः देव अस्मदालये पदमर्पयितुं लक्ष्मीदेवीमनुरुध्यस्व येन चास्माकं चिरदारिद्र्यमपगमिष्यति । एतदाकर्ण्य लक्ष्मीः सरोषमाह नाहं कदापि ब्राह्मणालये पदं करिष्यामि यतः :—

पीतोऽगस्त्येन तातश्चरणतलहतो वल्लभोऽन्येन रोषा-
दाबाल्याद् विप्रवर्गैः स्ववदनविवरे धारिता वैरिणी मे ।
गेहं मे च्छेदयन्ति प्रतिदिवसमुमाकान्तपूजानिमित्तं
तस्मात् खिन्ना सदाऽहं द्विजगणसदनं नाथ नित्यं त्यजामि ॥

रामचन्द्रः ।

(१७)

रामनाममहिमानं वर्णयति :—

माहात्म्यं परमं तवैव महतो हे राम नाम्नो भुवि
राकारं वदतो जनस्य सकलं निर्याति पापं हृदः ।
भूयस्तद् विशतीति रोधनविधावास्ते मकारस्ततो
जिह्वाग्रे तव राम नाम वसतु श्रीपूर्णचन्द्रस्य मे ॥

(उद्भटसागरस्य)

(१८)

उत्फुल्लेन्दीवराक्षी शशधरवदना बिभ्रती शुभ्रकान्तिं
गत्वाऽसौ राजधानीं दशरथमवदत् कैकयी कोपयुक्ता ।
राजा रामाभिषेकाद् विरमतु सहसा निष्कलङ्के कुलेऽस्मिन्
भूपुत्री यस्य पत्नी स च भवति कथं भूपती रामचन्द्रः ॥

सीता ।

(१९)

भूतिर्भूमितले पणः परिणये रामेण युद्धं पथि
कान्तारे गमनं दशास्यहरणं लङ्कापुरे रोधनम् ।
वह्नौ शुद्धिरथ प्रजापयशसाऽरण्ये च निर्वासनं
येवं जन्मत एव दुःखदलिता तां नौमि रामप्रियाम् ॥

(उद्भटसागरस्य)

(२०)

हरशरासनभङ्गं कुर्वती रामस्य करकाठिन्यं शङ्कमानां सीतां प्रति तत्सख्याः उक्तिरियम् :—

सीते मा कुरु सम्भ्रमं यदधुना काठिन्यमङ्गीकृतं
तद् रामस्य करद्वयेन धनुषो भङ्गाय नाङ्गाय ते ।
क्षोणी दीर्य्यति जीर्य्यति क्षितिरुहः शुष्यन्ति नीराशयाः
किन्त्वेका नलिनी दिवाकरकरैरानन्दमाविन्दति ॥

(२१)

रामेण सह वनं गच्छन्ती सीता स्वक्लेशं वर्णयति :—

करैरेवात्युग्रैः प्रतपति रघूणां कुलपतिः
कृपालेशं माता मयि न कुरुते कण्टकमयी ।
मम प्राणाधीशः क्षणमपि विलम्बं न सहते
विधौ वामे वामः सुहृदपि च कामं प्रसरति ॥

(हनुमतः)

(२२)

श्रीरामचन्द्रप्रेषितं चन्द्रकान्तमणिघटितमङ्गुरीयकं दृष्ट्वा सीतायाः खेदोक्तिरियम् :—

रामप्रेरितचन्द्रकान्तघटितस्वर्णाङ्गुरीयं निशि
शीतांशोः करयोगतः स्रवदपः संवीक्ष्य सीताऽब्रवीत् ।
किं त्वं रोदिषि रामचन्द्रविरहात् तस्यैव पाणिग्रहे
विच्छेद स्फुट एव किं न विदितं मां वीक्ष्य सुखं भव ॥

दशरथः ।

(२३)

दशरथस्य मृत्युकारणमाह :—

प्राणाधिके वनं रामे सुमन्त्रे च गृहं गते ।
त्यक्तो राजा सुतत्यागादविश्वस्तैरिवासुभिः ॥

हनूमान् ।

(२४)

हनूमतः शौर्यं वर्णयति —

चतुर्थजः पञ्चमगो दृष्ट्वा प्रथमसम्भवाम् ।
तृतीयं तत्र निक्षिप्य द्वितीयमतरत् तदा ॥

रावणः ।

(२५)

सीताहरणकार्थी कपटिनं रावणं वर्णयति :—

ड़िम् डिम् ड़िम् डिम् डिडिम् डिम्
डिमिमिति डमरुं वादयन् सूक्ष्मनादं
वम् वम् वम् वम् ववम् वम्
प्रवलगलबलैस्तालमालम्बय तुल्यम् ।

कर्पूराकल्पभस्माञ्चित-
सकलतनू रुद्रमुद्रासमुद्रो
मायायोगी दशास्यो
रघुरमणपुरप्राङ्गणे प्रादुरासीत् ॥

अहल्या ।

(२६)

मानवीं मूर्त्तिं गृहीत्वा अहल्या श्रीरामचन्द्रं प्रार्थयते :—

भूमौ दत्त्वा पदमिह समाधेहि चेलाञ्चलेऽस्मिन्
नाथाऽप्राप्यं त्रिजगति रजः पादपद्मद्वयस्य ।
योषा दोषास्पदमनुदिनं नित्यरोषस्तपस्वी
यस्य स्पर्शाद् रघुवर पुनर्नेदृशी स्यां कदापि ॥

अगस्त्यः ।

(२७)

निःशेषपीतोज्झितसिन्धुराजस्य अगस्त्यस्य पत्न्याः समीपे मत्कर्त्तृकसमुद्रबन्धनवार्त्ता-
कथनं निरर्थकमिति सीतां प्रति रामस्योक्तिः :—

वैदेहि पश्य कलसोद्भवधर्मपत्नीं
तत्र स्थिता च कथयस्व कथाः समस्ताः ।
स्वप्नेऽपि मा वद पयोनिधिबन्धवार्त्तां
सैषा मुनेश्चुलुकिताम्बुनिधेः कलत्रम् ॥

कृष्णः ।

(२८)

चूडायां शिखिपिच्छिनो तिलकिनो भालेऽधरे वंशिनो
पीनांसे वनमालिनो कटितटे पीताम्बरालम्बिनो ।
पादे नूपुरिणो तथा नयनयोः प्रेमामृतापाङ्गिनो
लीला काचन वर्त्ततां मनसि मे राधामनोमोहिनो ॥

(उद्भटसागरस्य)

(२९)

वासांसि व्रजवालिवारिजदृशां हृत्वा हठादुच्चकै-
र्यः प्राग् भूरुहमारुरोह स पुनर्वस्त्राणि विस्तारयन् ।
व्रीड़ाभारमपाचकार सहसा पाञ्चालजायाः स्वयं
को जानाति जनो जनार्दनमनोवृत्तिः कदा कीदृशी ॥

बालगोपालः ।

(३०)

मातः श्राम्यसि तिष्ठ गोरसमहं मथ्नामि मन्थानकं
प्रालम्ब्य स्थितमीश्वरः सरभसं दीनाननं वासुकिः ।
सासूयं कमलालया सुरगणः सानन्दमुद्यद्भयं
राहुः प्रैक्षत यं स वोऽस्तु शिवदो गोपालबालो हरिः ॥

कृष्णलीला ।

(३१)

कदाचिद् गोपबालकैः सह क्रीडन्तं कृष्णं क्रीड़ोपदेशव्याजेन सुदामा स्वाभीष्टं प्रार्थयते :—

(क)

यतस्त्वं श्रीकृष्ण स्वदिशि पतितानां धृतिविधौ
त्वमङ्ग क्रीड़ायां विगुणदिशि यानं परिहर ।
गलग्राही त्याज्यस्तव च परिहार्य्यः करधरो
बली वा चीणो वा न परिहरणीयो धृतपदः ॥

सुदामानं प्रति कृष्णस्योक्तिः :—

(ख)

शङ्का चेयं भवति विफला बाधकात् ते सुदामन्
धार्य्यः पादः कथमपि न मे केनचिद् वा कदापि ।
धर्त्तुं कश्चित् स्वभिलषति चेत् पादयुग्मं मदीयं
स्वीयक्रोड़े तमिह कुरुते मुक्तिमाता तदानीम् ॥

कृष्णं प्रति पुनः सुदाम्नः स्वमतनिवेदनम् :—

(ग)

सत्यं सत्यं भवतु भवतो भाषितं भक्तिलभ्य
सा नास्माकं भवति जननी मुक्तिमाता विमाता ।
भक्त्या मातुर्हरिचरणदाद् गर्जनाद् भीतभीता
वृन्दारण्ये विचरणविधौ साऽसमर्था सदैव ॥

मुरली ।

(३२)

कृष्णस्य वंशीरवोऽचेतनमपि वस्तु रसवत् करोतीत्याह :—

मुरहर रन्धनसमये
मा कुरु मुरलीरवं मधुरम् ।
नीरसमेधो रसतां
कृशतनुतां कृशानुरप्येति ॥

(३३)

श्रीकृष्णस्य वेणुमुद्दिश्य कस्याश्चिद् गोपिकायाः खेदोक्तिरियम् :—

कौशल्यासुतसव्यपाणिनिहितं सद्वंशजं सद्गुणं
सीतां पूर्णमनोरथाञ्च विदधे भङ्क्त्वा स्वदेहं धनुः ।
श्रीकृष्णाननपाणिपल्लवसखः क्लिश्नासि मां निर्गुणः
सच्छिद्रश्च कुवंशजोऽसि सुतरां वेणो न ते दूषणम् ।

नूपुरम् ।

(३४)

एकदा नूपुरं परिहर्त्तुमुद्यतं कृष्णं प्रति कस्यचिदुक्तिरियम् :—

अमी पुरस्थाः सकलाः सुनिद्रिता
न नूपुरं मुञ्च सुखेन यास्यसि ।
यदि त्यजेः श्रीपदपङ्कजाश्रितं
हरे तवाख्यातिरियं भविष्यति ॥

हरिनामकीर्त्तनस्थ-मृदङ्गः ।

(२५)

हरिनामसङ्कीर्त्तनकाले मृदङ्गोत्थितानां "धिक् तान् धिक् तान्" इति शब्दानां हेतुमाह :—

येषां श्रीमद्यशोदासुतपदकमले नास्ति भक्तिर्नराणां
येषामाभीरकन्याप्रियगुणकथने नानुरक्ता रसज्ञा ।
येषां श्रीकृष्णलीलाललितनिशमने सादरौ नैव कर्णौ
धिक् तान् धिक् तान् धिगेतान् कथयति नियतं कीर्त्तनस्थो मृदङ्गः॥

(बाणेश्वरविद्यालङ्कारस्य)

(२६)

श्रीकृष्णविरहे गोकुलावस्थां वर्णयति उद्धवः :—

शीर्णा गोकुलमण्डली पशुकुलं शस्पाय न स्पन्दते
मूका कोकिलसंहतिः शिखिकुलं न व्याकुलं नृत्यति ।
सर्वे त्वद्विरहेण हन्त नितरां गोविन्द दैन्यं गताः
किन्त्वेका यमुना कुरङ्गनयनानेत्राम्बुभिर्वर्द्धते ॥

(२७)

यदवधि मथुरागतस्त्वं
तदवधि गोकुलवृत्तमेतत् ।
दिशि दिशि सुलभा प्रसून-
मालाऽमला तु नलिनदलं दुरापम् ॥

राधिका ।

(३८)

दोर्भ्यां पल्लविनी नखैः कुसुमिनी भ्रूविभ्रमैः पत्रिणी
दन्तैः कोरकिणी स्मितैः सुषमिणी लीलाभिरावालिनी ।
पीनोत्तुङ्गकुचद्वयेन फलिनी वृन्दावनस्थायिनी
काचित् कल्पलता सदास्तु हृदि मे कृष्णद्रुमालम्बिनी ॥

(उद्भटसागरस्य)

(३९)

निगमतरोः प्रतिशाखं
मृगितं मिलितं नैव परं ब्रह्म ।
मिलितं मिलितमिदानीं
गोपवधूटीपटाञ्चले नद्धम् ॥

(४०)

उद्धवो यदा कृष्णमादाय मथुरां प्रस्थातुमुद्यतस्तदा स तूर्णमेव कृष्णं प्रत्यानेष्यामीति राधिकामुवाच। अथ कृष्णो न पुनरागमिष्यतीति निवेदयन्तमुद्धवं प्रति राधिकाया उक्तिरियम् :—

या पूर्वं भवता प्रयाणसमये संरोपिताऽशालता
साऽभूत् पल्लविता चिरात् कुसुमिता नेत्राम्बुसेकैः सदा ।
विज्ञातं फलितेति हन्त भवता तन्मूलमुन्मूलितं
रे रे माधवदूत जीवविहगः क्षीणः कमालम्बते ॥

(४१)

वृन्दावनात् प्रत्याहृत्य उद्धवः श्रीकृष्णं राधिकावस्थां कथयति :—

यस्यां यस्यां भवति हि तिथौ मांसलांशः सुधांशु-
स्तस्यां तस्यां रतिरसमयी चीयते सा मृगाक्षी ।
मन्ये धाता घटयति विधुं सारमाकृष्य तस्या-
स्तस्माद् यावन्न भवति तिथिः पूर्णिमा तावदेहि ॥

(४२)

कूजति किल कोकिलकुल उज्ज्वलकलनादं
जैमिनिरिति जैमिनिरिति जल्पति सविषादम् ।
नीलनलिनमाल्यमहह वीक्ष्य पुलकवीता
गरुड़ गरुड़ गरुड़ेत्यपि रौति परमभीता ॥

गोपी ।

(४३)

धन्या गोकुलकन्या
वयमिह मन्यामहे जगति ।
यासां नयनसरोजे
सुरञ्जनभूतो निरञ्जनः साक्षात् ।

नन्दः ।

(४४)

श्रुतिमपरे स्मृतिमपरे
　　भारतमपरे भजन्तु भवभीताः ।
अहमिह नन्दं वन्दे
　　यस्यालिन्दे परं ब्रह्म ॥

यशोदा ।

(४५)

किं ब्रूमस्त्वां यशोदे कति कति सुकृतक्षेत्रवृन्दानि पूर्वं
गत्वा कीदृग्विधानैः कति कति सुकृतान्यर्जितानि त्वयैव ।
नो शक्रो न स्वयम्भूर्न च मदनरिपुर्यस्य लेभे प्रसादं
तत् पूर्णब्रह्म भूमौ विलुठति विलपन् क्रोड़मारोढुकामः ॥

द्रौपदी ।

(४६)

दुर्योधनं प्रति द्रौपद्या उक्तिरियम् :—

पतिश्वशुरता ज्येष्ठे पतिदेवरताऽनुजे ।
इतरेषु च पाञ्चाल्यास्त्रितयं त्रितयं त्रिषु ॥

दशावताराः ।

(४७)

यस्याऽलीयत शल्कसीम्नि जलधिः पृष्ठे जगन्मण्डलं
दंष्ट्रायां धरणी नखे दितिसुताधीशः पदे रोदसी ।
क्रोधे क्षत्रगणः शरे दशमुखः पाणौ प्रलम्बासुरो
ध्याने विश्वमसावधार्म्मिककुलं कस्मैचिदस्मै नमः ॥

शिवः ।

(४८)

यः स्थाणुः स्वयमेव पर्वतगतो मूलेन हीनश्च यः
साऽपर्णा स्वयमेव यस्य लतिका पुत्रो विशाखस्तथा ।
यो नित्यञ्च परोपनीतकुसुमोऽभीष्टं प्रसूते फलं
स स्थित्वा मम भूरिपङ्किलहृदि प्राप्नोतु पुष्टिं पराम् ।

(उद्भटसागरस्य)

(४९)

शृङ्गारी यः शिवायां करुण इह रतौ मन्मथे वीर आस्ते
बीभत्सः कीकसौघैः फणिगणभयकृत् तुङ्गदेहाङ्गतश्च ।
रौद्रो दक्षे च नग्नो दिशि दिशि हसकृत् भक्तिभाजि प्रशान्तो
वन्देऽहं तं महेशं नवरसरसिकं नीरसः पूर्णचन्द्रः ॥

(उद्भटसागरस्य)

शिवलीला ।

(५०)

शिवस्य मृन्मयमूर्त्तिधारणस्य हेतुमाह :—

अत्तुं वाञ्छति वाहनं गणपतेराखुं क्षुधार्त्तः फणी
तं च क्रौञ्चपतेः शिखी गिरिसुतासिंहोऽपि नागाननम् ।
गौरी जह्नुसुतां हिनस्ति च कलानाथं कपालानलो
निर्विण्णः स शिवः कुटुम्बकलहाद् मूर्त्तिं दधौ मृन्मयीम् ॥

(५१)

शिवस्य दिगम्बरत्वकारणं कथयति :—

सहस्रास्यो नागः स्वयमपि भवान् पञ्चवदनः
षडास्यो हन्तैकस्तनय इतरो वारणमुखः ।
चिरं भिक्षावृत्तिर्भवति च कथं वर्त्तनमहो
वदन्त्यां पार्वत्यां गिरिश इति नग्नः समभवत् ॥

(५२)

शिवस्य श्मशानवासित्वहेतुमाह :—

किं गोत्रं किमु जीवनं किमु धनं का जन्मभूः किं वयः
का विद्या किमु सद्म के सहचराः के वंशजाः प्राक्तनाः ।
का माता च पिता तवेति गुरुणा पृष्टो विवाहे शिवो
मालिन्येन हृदः स्वकीयभवनं त्यक्त्वा श्मशाने स्थितः ॥

(५३)

शिवस्य "भोलानाथ"इति नामग्रहणकारणं कथयति :—

धत्ते कालीपदाब्जं शव इव जगतां वञ्चनार्थं महेशो
धूर्त्तो मत्तस्थिमालाभुजगचयचिताभस्मदेहोऽग्निभालः ।
भोलानाथप्रसिद्धिः कथय कथमभूल्लोकतः शास्त्रतोऽसौ
वित्ते स्वत्वं स्वतः स्यात् पितरि मृत इदं न स्मृतं यत् सुतानाम् ॥

(५४)

शिवस्य शवरूपग्रहणकारणं वक्ति :—

तव चरणसरोजं दुर्लभं देवताभि-
र्निजहृदि जगदम्ब त्र्यम्बकः सन्निधाय ।
यदभवदतिभावानन्दनिस्पन्दमूर्त्तिः
शवमिति शिवमाहुर्गूढ़तत्त्वानभिज्ञाः ॥

(५५)

शिवस्य स्ववक्षसि कालीपदधारणकारणमाह :—

देवैर्मन्थितदुग्धसागरतलादुत्थापितं भीषणं
पीत्वा भूरि विषं पुनः पशुपतिस्तज्ज्वालया विह्वलः ।
विन्यस्योरसि कालिकापदयुगं कैवल्यदं शीतलं
संप्राप्याऽतुलनिर्वृतिञ्च बहुलामद्यापि तन्नोज्झति ॥

(५६)

शिवस्य विषपानकारणं कथयति :—

हरता मम सुरतटिनी-
व्यतिकरमरणेऽपि तुल्यैव ।
गङ्गाधर इति गरलं
करतलतरलं निजग्रास ॥

(५७)

शिवस्य मृत्युञ्जयत्वहेतुमाह :—

पार्वतीमोषधीमेकामपर्णां रोगनाशिनीम् ।
लब्ध्वा पीत्वाऽपि गरलं शूली मृत्युञ्जयः स्थितः ॥

पार्वती ।

(५८)

नानाशस्त्रास्त्रभीमा दनुजदलदमा कालमेघाभिरामा
प्रेमोच्छ्वासेन वामा पशुपतिनयनाकेकरालोककामा ।
कैवल्योल्लाससीमा भवगहनगतक्लेशनाशिप्रणामा
काचित् कैलासधामा कलयतु कुशलं कामिनी कान्तकामा ॥
(उद्भटसागरस्य)

(५८)

कष्टं दृष्टं त्वया नो जननि सुविषमं वाक्यमाकर्णितं मे
नास्ते ते नेत्रकर्णं श्रुतिरिति वदति भ्रान्तिशून्या सदैव ।
इत्थं चेद् वेदवाक्यं कलयसि सफलं कालि मय्येव सर्वं
निस्तार्य्योऽहं त्वयैव श्रुतिरिति वदति त्वं हि निस्तारिणी यत् ॥

(६०)

तले धातू रूपं त्रिगुणमयि पृष्ठे मुररिपो-
नंखे शम्भो रूपं जननि तव पादाम्बुजमतः ।
भजन्ते ते सर्वे भजनगुणलेशं पुनरपि
पिनाकी जानीते यदुरसि स धत्ते तव पदम् ॥

(६१)

दुर्गां प्रति भक्तस्योक्तिरियम् :—

दुर्गे दुर्गभवाब्धिभङ्गभवभीभ्रान्तोक्तभाषां शृणु
दृष्ट्वा देवि ददाति देयदयितं दीनं दयालुर्नटम् ।
किं वा वक्ति विरक्तचित्तकतया त्वं गच्छ मा गाः पुन-
रित्थं वारमनेकमागतवति त्वं केन मूका मयि ॥

(वाणीश्वरविद्यालङ्कारस्य)

शक्तिलीला ।

(६२)

काली न कथं केशकलापं बध्नातीति पृष्टवन्तं राजानं कृष्णचन्द्रं प्रति वाणेश्वरविद्यालङ्कारस्य प्रत्युक्तिरियम् :—

देव्याः केशचयो निरीक्ष्य पतितान् देवान् मुनीन् पादयोः
सर्वाराध्यतया च तत्र परमोत्कर्षं विदित्वाऽपतत् ।
सा काली चरणं गतस्य शरणं नो बन्धनं सम्भवे-
दित्यावेदयितुं बबन्ध नहि तं तन्मुक्तकेशी बभौ ॥

(वाणेश्वरविद्यालङ्कारस्य)

(६३)

कालिकाया नग्नत्वमुपपादयति कविः :—

गिरीशे प्रत्यूषे निशि च दिवसान्ते च दिवसे
प्रसूतौ जन्तूनां जगति जनयित्रि प्रतिदिनम् ।
परिव्याप्ता वस्त्रावरणसमयं नैव लभसे
भवत्या नग्नत्वं भगवति भवत्येव तदिदम् ॥

(वाणेश्वरविद्यालङ्कारस्य)

(६४)

कदाचित् कश्चित् कुलालो दक्षिणामूर्त्तिं विरचय्य विलोकनाय राज्ञे न्यवेदयत् । स राजा कृष्णचन्द्रः स्वयमागत्य प्रतिमाञ्च तां विलोक्य नितरां सन्तुष्यन् किमद्भुतमित्यब्रवीत् । सहचरो वाणेश्वरविद्यालङ्कारस्य तं वाक्यार्थं छन्दसा पूरयामास :—

(क)

शिवस्य निन्दया हि याऽत्यजद् वपुः स्वमेकदा ।
तदङ्घ्रिपङ्कजद्वयं शवे शिवे किमद्भुतम् ॥

(वाणेश्वरविद्यालङ्कारस्य)

एतदाकर्ण्यैव पार्श्ववर्त्ती शाक्तशिरोमणिः रामप्रसादश्चेतसि दुःखमनुभवन् वक्ष्यमाणश्लोकमुवाच :—

(ख)

महायुद्धमध्ये सदानन्दरूपा-
पदस्पर्शमात्राच्छवोऽभून्महेशः ।
शिवे पादपद्मं न दत्तं कदाचि-
न्न वाच्यं न वाच्यं कदापि त्वयापि ॥
(रामप्रसादसेनस्य)

(६५)

देव्या दशभुजात्वकारणं जिज्ञासमानं प्रति भक्तस्योक्तिरियम् :—

आविष्कृतैर्दशभुजैर्दशदिग्भवेभ्यो
दुःखेभ्य आशु परिमोचयितुं स्वभक्तान् ।
कैलासनाम निजधाम विहाय भूमौ
दुर्गागता दशभुजा तनुते शुभं नः ॥

(६६)

काली कटितटे करश्रेणीं गले शिरोमालाञ्च कथं धारयतीत्याह कवि :—

वदन्तं त्वन्नाम क्षणमपि भजन्तं तव पदं
जपन्तं वा जन्तुं जननि जनुरन्तं तव मनुम् ।
चतुर्बाहुं कर्त्तुं कमपि चतुरास्यं क्वमपि किं
करश्रेणीकाञ्चीं वहसि बहुमुण्डस्रजमपि ॥

गङ्गाः ।

(६७)

यद्गर्भे सुखदे स्थितस्य न पुनर्गर्भागतिर्दुःखदा
गर्भक्लेशनिवेदनाय मुनिना गर्भे धृता यैकदा ।
या सेव्याऽपि च सेवकोपपदगा पुत्रस्य या क्रोड़दा
सा वृन्दारकवृन्दवन्दितपदा माताऽस्तु मे सर्वदा ॥

(उद्भटसागरस्य)

(६८)

पायं पायमपायसञ्चयहरं गङ्गे त्वदीयं पयो
नायं नायमनायकोऽहमसकृद् मूर्त्तिञ्च नेत्रे तव ।
स्मारं स्मारमसारसंसृतिहरं गङ्गेति वर्णद्वयं
चारं चारमितस्ततस्तव तटे मुक्तो भवेयं कदा ॥

(उद्भटसागरस्य)

(६९)

किंवदन्तीयं श्रूयते यत् त्रिवेणीनिवासिनो द्वादशाधिकशतवर्षस्य गङ्गातीरस्थस्य स्मार्त्तनैयायिकशिरोमणेर्जगन्नाथतर्कपञ्चाननस्य समीपे तस्य प्रधाननैयायिकच्छात्रः कश्चित् पृष्टवान् गुरुदेव ईश्वरतत्त्वविषये बहुशः शिक्षा प्रदत्ता भवतैव, किन्तु एकया एव कथया ईश्वरस्य स्वरूपनिर्णयो न कृतः। तदाप्युपाध्यायः प्रकृष्टज्ञानबलेन वक्ष्यमाण-श्लोकेन उत्तरमिदं कृतवान्। इयमपि किंवदन्ती श्रूयते यत् श्लोकपाठान्त एव तस्य प्राणवायुर्निर्जगाम :—

नराकारं वदन्त्येके निराकारञ्च केचन ।
वयन्तु दीर्घसम्बन्धाद् नाराकाराम् (नीराकाराम्) उपास्महे ॥

(जगन्नाथतर्कपञ्चाननस्य)

(७०)

कश्चिद् गङ्गाभक्तः कविर्भङ्ग्यन्तरेण गङ्गामाहात्म्यं कथयति :—

गङ्गे त्रिदोषनाशाय त्वयि मज्जति यो जनः ।
तं करोषि चतुर्दोषं कथं मातर्विकत्थसे ॥

(७१)

प्रयागे गङ्गायमुनासरस्वतीसमागमस्थानं युक्तवेणी, त्रिवेण्यां तु गङ्गातः यमुनासरस्वत्योर्विश्लेषात् तत्स्थानं मुक्तवेणीति कथ्यते। अतस्तत्र जाह्नवी मन्दवेगेति लक्ष्यते। अस्यैव जाह्नवीवेगमान्द्यस्य कारणं जिज्ञासुना वर्द्धमानाधिपेन पृष्टो वाणेश्वरविद्यालङ्कार आह :—

सगरसन्ततिसन्तरणेच्छया
प्रचलिताऽतिजवेन हिमाचलात् ।
इह हि मान्द्यमुपैति सरस्वती-
यमुनयोर्विरहादिव जाह्नवी ॥
(वाणेश्वरविद्यालङ्कारस्य)

(७२)

श्रीकृष्णं प्रति राधिकाया उक्तिरियम् :—

अम्बुजमम्बुनि जातं
क्वचिदपि न तु जातमम्बुजादम्बु ।
त्वयि सुरहर विपरीतं,
पदाम्बुजान्महानदी जाता ॥

गङ्गालीला ।

(७३)

शिवगिरौ विहाय गङ्गा कथं धरणीतलमागतेत्याह :—

शिवां रुष्टां दृष्ट्वा प्रमथपतिना मूर्द्धलालिता
परित्यक्ता गङ्गा बहुतरतरङ्गा किमु रुषा ।
जनेभ्यः पापिभ्यः प्रमथपतितां दातुमधुना
समायाति क्षौणीं त्रिभुवनजनत्राणसलिला ॥

गणेशः ।

(७४)

विघ्नव्यालावलिखगवरो विघ्ननागैकसिंहो
विघ्नध्वान्तप्रखरमिहिरो विघ्नशैलैकवज्रः ।
विघ्नाम्भोदप्रबलपवनो विघ्नवार्द्धैरगस्त्यो
विघ्नारण्यप्रबलदहनो नोऽवताद् विघ्नराजः ॥

(उद्भटसागरस्य)

कार्त्तिकेयः ।

(७५)

माता यस्य धराधरेन्द्रदुहिता तातो महेशस्तथा
भ्राता विघ्नकुलान्तकः पितृसखो देवो धनानां पतिः ।
ख्यातः क्रौञ्चविदारणे सुरपतेः सेनाग्रणीः षण्मुख-
स्तद्दैवबलेन किन्न घटते कुत्रापि पाणिग्रहः ॥

(भानुसेनस्य)

भृङ्गी ।

(७६)

सेवां नो कुरुते करोति न कृषिं वाणिज्यमस्यास्ति नो
पैत्रं नास्ति धनं न बान्धवबलं नैवास्ति कश्चिद् गुणः ।
द्यूतस्त्रीव्यसनं न मुञ्चति तथापीशस्तदेतत् फलं
किं मे स्यादिति चिन्तयन्निव कृशो भृङ्गी चिरं पातु वः ॥

तीर्थ-महिमा ।

गङ्गावाराणस्यौ ।

(७७)

गङ्गावाराणस्योर्भेदं दर्शयति :—

यस्यां शम्भुर्या च शम्भूत्तमाङ्गे
शम्भोरन्यः कोऽनयोरन्तरज्ञः ।
एतज्ज्ञाने मोक्षदा किन्तु काशी
पञ्चक्रोशी लक्षयामा च गङ्गा ॥

वृन्दावन-वाराणस्यौ ।

(७८)

वृन्दावनवाराणस्योरुत्कर्षापकर्षौ दर्शयति :—

(क)

काशीधाम्नि शिवमाहात्म्यं वर्णयति :—

यत्रास्ते मणिकर्णिकाऽमलसरः स्वर्दीर्घिका दीर्घिका
रत्नं तारकमक्षरं तनुभृते शम्भुः स्वयं यच्छति ।
तस्मिन्नद्भुतधामनि स्मररिपोर्निर्वाणमार्गे स्थिते
मूढोऽन्यत्र मरीचिकासु पशुवत् प्रत्याशया धावति ॥

(ख)

वृन्दावनधाम्नि कृष्णमाहात्म्यं प्रतिपादयति—

स्वर्म्भाम्भो मणिकर्णिका भगवतः पादाम्बु भागीरथी
काशीनां पतिरंशमस्य भजते श्रीविश्वनाथः स्वयम् ।
एतस्यैव हि नाम शम्भुनगरे निस्तारकं तारकं
तस्मात् कृष्णपदाम्बुजं भज सखे श्रीपाद निर्वाणदम् ॥

मूर्त्तित्रयम् ।

(७९)

श्यामश्वेतारुणाङ्गा जलधरशिखरोत्फुल्लपङ्केरुहस्था
सोमासावित्र्युपेता रथचरणपिनाकोग्रहुङ्कारशस्त्राः ।
देवा हित्र्यष्टनेत्रा जगदवनसमुच्छेदनोत्पत्तिदक्षाः
प्रीताः वः पान्तु नित्यं हरिहरविधयस्तार्क्ष्यगोहंसपत्राः ॥

रामकृष्ण-मूर्त्तिः ।

(८०)

यः पूतनामारणलब्धकीर्त्तिः
काकोदरो येन कृतो विदर्पः ।
यशोदयालङ्कृतमूर्त्तिरव्याद्
नाथो यदूनामथवा रघूणाम् ॥

हरिहर-मूर्त्तिः ।

(८१)

हरिहरयोः प्रकृतिरेका
प्रत्ययभेदाद् विभिन्नवद् भाति ।
कलयति कश्चिद् मूढो
हरिहरभेदं विनाशास्त्रम् ॥

(८२)

यौ तौ शङ्खकपालभूषितकरौ पुष्पास्थिमालाधरौ
देवौ द्वारवतीश्मशाननिलयौ नागारिगोवाहनौ ।
द्विचक्षौ बलिदक्षयज्ञमथनौ श्रीशैलजावल्लभौ
पापं वो हरतां सदा हरिहरौ श्रीवत्सगङ्गाधरौ ॥

---

(८३)

(क)

(उमाधवपक्षे श्लोकस्यास्य आकृतिरियम्)

येन ध्वस्तमनोभवेन बलिजित्कायः पुरास्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयो गङ्गां च योऽधारयत् ।
यस्याहुः शशिमच्छिरो हर इति स्तुत्यं च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदोमाधवः ॥

(ख)

(माधवपक्षे श्लोकस्यास्य आकृतिरियम्)

येन ध्वस्तमनोऽभवेन बलिजित्कायः पुरा स्त्रीकृतो
यश्चोद्वृत्तभुजङ्गहारवलयोऽगं गां च योधारयत् ।
यस्याहुः शशिमच्छिरोहर इति स्तुत्यं च नामामराः
पायात् स स्वयमन्धकक्षयकरस्त्वां सर्वदो माधवः ॥

(भारवेः, केषाचिन्मते चन्द्रकस्य वा चन्दकस्य)

(८४)

(क)

कविः श्लोकेऽस्मिन् एवं कौशलं दर्शितवान् येन वसन्ततिलकच्छन्दसा निबद्धे नानेन श्लोकेन दुर्गामाहात्म्यं वर्णितं, किन्त्वस्य प्रतिपादतः षष्ठसप्तमाष्टमवर्णेषु वियुक्तेषु पद्यमिदं इन्द्रवज्राछन्दसि परिणतं भवति, तथा सति शिवमाहात्म्यं वर्ण्यते :—

(वसन्ततिलकछन्दसा गौरीस्तुतिः)

विश्वस्य हेतुरमरैर्बहु गीयसे त्वं
विश्वंभरे भवशिवे त्रिगुणात्ममूर्त्ते ।
चिद्व्योमतोऽपि परमां प्रथमं वदन्ति
त्वां योगिनस्तुतिपरा प्रणिधानदृष्ट्या ॥

(ख)

(इन्द्रवज्राच्छन्दसा शिवस्तुतिः)

विश्वस्य हेतुर्बहु गीयसे त्वं
विश्वम्भरेश त्रिगुणात्ममूर्त्ते ।
चिद्व्योमतोऽपि प्रथमं वदन्ति
त्वां योगिनस्तु प्रणिधानदृष्ट्या ॥

(शार्ङ्गधरस्य)

प्रश्नोत्तराणि ।

कृष्णचन्द्रावली-प्रश्नोत्तराणि ।

(८५)

राधामोहनमन्दिरं जिगमिषोश्चन्द्रावलीमन्दिराद्
राधे क्षेममिति प्रियस्य वचनं श्रुत्वाह चन्द्रावली ।
क्षेमं कंस ततः प्रियः प्रकुपितः कंसः स दृष्टस्त्वया
राधा क्वेति तयोः प्रसन्नमनसोर्हासोद्गमः पातु वः ॥

कृष्णनन्द-प्रश्नोत्तराणि ।

(८६)

कृष्ण त्वं नवयौवनोऽसि चपलाः प्रायेण गोपाङ्गनाः
कंसो भूपतिरब्जनालमृदुलग्रीवा वयं गोदुहः ।
तद् याचेऽञ्जलिना भवन्तमधुना वृन्दावनं मां विना
मा यासीरिति नन्दगोपवचसा क्षीणो हरिः पातु वः ॥

कृष्णयशोदा-प्रश्नोत्तराणि ।

(८७)

कृष्ण त्वं पठ किं पठामि ननु मे शास्त्रं किमु ज्ञायते
तत्त्वं कस्य विभोः स कस्त्रिभुवनाधीशश्च तेनापि किम् ।
ज्ञानैर्भक्तिरथो विरक्तिरनया किं मुक्तिरेवास्तु ते
दध्यादीनि भजामि मातुरुदितं वाक्यं हरिः पातु वः ॥

(८८)

मातः किं यदुनाथ देहि चषकं किं तेन पातुं पय-
स्तन्नास्त्यद्य कदास्ति तन्निशि निशा का वान्धकारोदये ।
वद्धे नेत्रयुगे निशाऽप्युपगता देहीति मातुस्तदा
वक्षोजाम्बरकर्षणोद्यतकरः कृष्णः स पुष्णातु नः ॥

कृष्णसत्यभामा-प्रश्नोत्तराणि ।

(८९)

अङ्गुल्या कः कपाटे प्रहरति कुटिलो माधवः किं वसन्तो
नो चक्री किं कुलालो नहि धरणिधरः किं फणीन्द्रो द्विजिह्वः ।
मुग्धे घोराहिमर्दी किमुत खगपतिर्नो हरिः किं कपीन्द्र-
इत्येवं सत्यभामाप्रतिवचनजितः पातु वश्चक्रपाणिः ।

दुर्गाकार्त्तिकेय-प्रश्नोत्तराणि ।

(८०)

मातर्जीव किमेतदञ्जलिपुटे तातेन गोपायितं
वत्स स्वादु फलं प्रयच्छति न मे गत्वा गृहाण स्वयम् ।
मात्रैवं प्रहिते गुहे विघटयत्याकृष्य सन्ध्याञ्जलिं
शम्भोर्भिन्नसमाधिरुद्धमनसो हास्योद्गमः पातु वः ॥

(योगेश्वरस्य)

दुर्गागणेशकार्त्तिकेय-प्रश्नोत्तराणि ।

(८१)

हे हेरम्ब किमम्ब रोदिषि कथं कर्णौ लुठत्यग्निभूः
किं ते स्कन्द विचेष्टितं मम पुरा संख्या कृता चक्षुषाम् ।
नैतत् तेऽप्युचितं गजास्य चरितं नासां मिमीतेऽम्ब मे
तावेवं सहसा विलोक्य हसितव्यग्रा शिवा पातु वः ॥

बलिवामन-प्रश्नोत्तराणि ।

(८२)

कस्त्वं ब्रह्मन्नपूर्वः क्व च तव वसतिर्याऽखिला ब्रह्मसृष्टिः
कस्ते नाथो ह्यनाथः क्व च तव जनको नैव तातं स्मरामि ।
किं तेऽभीष्टं ददामि त्रिपदपरिमिता भूमिरल्पा किमेषा
त्रैलोक्यं भावजं यो बलिमिदमवदद् वामनो वः स पातात् ॥

राधाकृष्ण-प्रश्नोत्तराणि ।

(८३)

केयं भाग्यवती तवोरसि मणौ ब्रूषेऽग्रवर्णं विना
कृत्वाऽस्याः प्रथमं विना क्व सहजो वर्णौ मणिस्ताद्दृशः ।
स्त्रीरूपं कथमस्य लिङ्गनियमात् पृच्छामि वध्वाकृतिं
मुग्धे त्वत्प्रतिबिम्बमित्यपलपन् राधां हरिः पातु वः ॥

(८४)

कस्त्वं भो निशि केशवः शिरसिजैः किं नाम गर्वस्तव
भद्रे शौरिरहं गुणैः पितृगतैः पुत्रस्य किं स्यादिह ।
चक्री चन्द्रमुखि प्रयच्छसि न मे कुण्डीं घटीं दोहिनी-
मित्थं राधिकया जितोत्तरतया दुःस्थो हरिः पातु वः ॥

(८५)

कोऽयं द्वारि हरिः प्रयाह्युपवनं शाखामृगेणात्र किं
कृष्णोऽहं दयिते बिभेमि नितरां कृष्णः कथं वानरः ।
मुग्धेऽहं मधुसूदनो व्रज लतां तामेव पुष्पान्विता-
मित्थं निर्वचनीकृतो दयितया ह्रीणो हरिः पातु वः ॥

(शुभाङ्कस्य)

राधागोपाङ्गना-प्रश्नोत्तराणि ।

(९६)

कृष्णविरहविधुरां राधिकां प्रति तत्सख्या उक्तिरियम् :—

कुन्दकुञ्जममुं पश्य पुष्पितं सखि शोभनम् ।
अमुना कुन्दकुञ्जेन सखि मे किं प्रयोजनम् ॥

रामलक्ष्मण-प्रश्नोत्तराणि ।

(९७)

भ्रातः प्रापय मामनातपभुवं प्राप्तोदयोऽयं रवि-
र्नाथासौ हिमचन्द्रमा इतरथा चास्मिन् कलङ्कः कथम् ।
वंशेऽस्मिन् सदकीर्त्तितः कुमुदिनी कस्मादियं काश्यते
नह्येवं नलिनीप्रियाङ्कजननाद्धास्यं करोति स्फुटम् ॥

(९८)

कोऽहं वत्स स आर्य्य एव भगवानार्य्यः स को राघवः
के यूयं वत नाथ नाथ किमिदं भृत्योऽस्मि ते लक्ष्मणः ।
कान्तारे किमिहास्महे वत वृथा देव्या गतिर्मृग्यते
का देवी जनकाधिराजतनया हा जानकि क्वासि मे ॥

लक्ष्मीनारायण-प्रश्नोत्तराणि ।

(९९)

धन्या देवकुले गिरीन्द्रतनया गौरी महासुन्दरी
यस्माद् वृद्धपतिं विहाय जटिलं नान्यं जनं सेवते ।
लोले त्वञ्च विहाय मां धनवतां गेहेषु तिष्ठेः सदा
कः प्राणेश्वर वक्ति तद् बुधगणास्ते मे सपत्नीसुताः ॥

(१००)

देवि त्वं कुपिता त्वमेव कुपिता कोऽन्यः पृथिव्या गुरु-
र्माता त्वं जगतां त्वमेव जगतां माता न विष्णोऽपरः ।
देवि त्वं परिहासकेलिकलहेऽनन्ता त्वमेवेत्यथ
ज्ञातानन्दपदो नमज्जलधिजां शौरिश्चिरं पातु वः ।
(वाक्पतिराजस्य)

लक्ष्मीपार्वती-प्रश्नोत्तराणि ।

(१०१)

हरिहरमूर्त्तेः पार्श्ववर्त्तिन्योः कमलापार्वत्योः परिहाससंलापः—

लोले ब्रूहि कपालकामिनि पिता कस्ते पतिः पाथसां
कः प्रत्येति जलादपत्यजननं प्रत्येति यः प्रस्तरात् ।
इत्थं पर्वतराज सिन्धुसुतयोराकर्ण्य वाक्चातुरीं
सस्मेरस्य हरेर्हरस्य च मुदो निघ्नन्तु विघ्नान् तव ॥

(१०२)

भिक्षार्थी स क्व यातः सुतनु बलिमखे ताण्डवं क्वाद्य भद्रे
मन्ये वृन्दावनान्ते क्व नु स मृगशिशुर्नैव जाने वराहम् ।
बाले कच्चिन्न दृष्टो जरठवृषपतिर्गोप एवास्य वेत्ता
लीलासंलाप इत्थं जलनिधिहिमवत्कन्ययोस्त्रायतां वः ॥

विष्णु सागर-प्रश्नोत्तराणि ।

(१०३)

हंहो मीनतनो हरे किमुदधे किं वेपसे शैत्यतः
खिन्नः किं वड़वानलात् पुलकितः कस्मात् स्वभावादहम् ।
इत्थं सागरकन्यकासुखशशिव्यालोकनेनाधिक-
प्रोद्यत्मारजचिह्ननिह्नुतिपरः शौरिः शिवायास्तु वः ॥

सीतारावण-प्रश्नोत्तराणि ।

(१०४)

श्लोकस्यास्य पूर्वचरणत्रये रावणस्य सीतां प्रति उक्तिः चतुर्थचरणे तु तस्याः प्रत्युत्तरम् :—

भवित्री रम्भोरु त्रिदशवदनग्लानिरधुना
स रामो मे स्थाता न युधि पुरतो लक्ष्मणसखः ।
इयं यास्यत्युच्चैर्विपदमधुना वानरचमू-
र्लघिष्ठेदं षष्ठाक्षरपरविलोपात् पठ पुनः ॥

हरगौरी-प्रश्नोत्तराणि ।

(१०५)

पार्वत्या मानभङ्गाय शिवस्य सानुनयवचांसि पार्वती श्लेषेणान्यथा प्रतिपादयति :—

किं गौरि मां प्रति रुषा ननु गौरहं किं
कुप्यामि कां प्रति मयीत्यनुमानतोऽहम् ।
जानामि सत्यमनुमानत एव स त्व-
मित्थं गिरो गिरिभुवः कुटिला जयन्ति ॥

(रुद्रस्य)

(१०६)

न क्रोधः क्रियतां प्रिये स तु भवन्मौलिस्थगङ्गोदरे
मुग्धे मानसपूजितं त्यज कृतं युष्मन्नियोगद्वयम् ।
वक्रे श्लेषममुं निराकुरु कदाश्लिष्टोऽसि वक्रो मया
वामाङ्गेऽति हृतोत्तरः स्मरहरः स्मेराननः पातु वः ॥

(१०७)

स्वेदस्ते कुत ईदृशः प्रियतमे त्वन्नेत्रवह्नेर्विभो
कस्मात् कम्पनमेतदिन्दुवदने भोगीन्द्रभीतेस्तव ।
रोमाञ्चः कथमेष देवि भगवन् गङ्गाम्भसां शीकरै-
रित्थं भर्त्तरि भावगोपनपरा गौरी चिरं पातु वः ॥

(लक्ष्मीधरस्य)

(१०८)

एषा ते हर का सुगात्रि कतमा शीर्षे स्थितेयं जटा
हंसः किं भजते जटां नहि शशी चन्द्रो जलं सेवते ।
मुग्धे भूतिरियं कुतोऽत्र सलिलं भूतिस्तरङ्गायत-
इत्थं यो विनिगूहते त्रिपथगां पायात् स वः शङ्करः ॥

———

जीव-तरङ्गः ।

राजा ।

(१०९)

भूपः कूप इवाभाति नमज्जनसुखावहः ।
ददाति गुणसम्बन्धान्नित्यं पात्रानुसारतः ॥

राजसभा ।

(११०)

पयसा कमलं कमलेन पयः
पयसा कमलेन विभाति सरः
मणिना वलयं वलयेन मणि-
र्मणिना वलयेन विभाति करः ।
शशिना च निशा निशया च शशी
शशिना निशया च विभाति नभः
कविना च विभुर्विभुना च कविः
कविना विभुना च विभाति सदः ॥

मन्त्री ।

(१११)

मन्त्रिगुणावलीमाह :—

शास्त्रज्ञः कपटानुसारकुशलो वाग्मी तु नो कोपन-
स्तुल्यो मित्रपरस्वकेषु चरितं दृष्ट्वैव दत्तोत्तरः ।
शिष्टान् पालयिता शठान् व्यथयिता धर्म्मोऽतिलोभान्वितो
कार्य्यार्थी परतत्त्वबद्धहृदयो राज्ञश्च कोपापहः ॥

साधारणराज-स्तुतिः ।

(११२)

कश्चिद् कविः कश्चिद् राजानं स्तौति :—

सर्वदा सर्वदोऽसीति स्तूयसे नृपते वृथा ।
नारयो लेभिरे पृष्ठं न नेत्रं परयोषितः ॥

(११३)

लक्ष्मीर्यत्र न गौस्तत्र यत्र गौस्तत्र नो रमा ।
ते यत्र विनयो नास्ति सा च सा च स च त्वयि ॥

(११४)

कल्पवृक्षो न जानाति न ददाति वृहस्पतिः ।
भवांस्तु जगतीजानिर्जानाति च ददाति च ॥

(११५)

ते कौपीनधनास्त एव हि परं धात्रीफलं भुञ्जते
तेषां द्वारि न दन्तिवाजिनिवहास्तैरेव लब्धा क्षितिः ।
तैरेवं समलङ्कृतं निजकुलं किं वा बहु ब्रूमहे
ये दृष्टाः परमेश्वरेण भवता रुष्टेन तुष्टेन वा ॥

(११६)

धनुरिव गुणयोगात् सन्नतो नासि वक्रो
विधुरिव रुचिमत्त्वात् सुन्दरो नो कलङ्की ।
जलधिरिव गभीरो नाप्रतीतो महत्त्वात्
सकलगुणनिदानं त्वन्तु दोषेण शून्यः ॥

(रामतारणशिरोमणिः)

(११७)

त्वामुर्वीधर रम्यकाव्यकरणे सेनावनी भाषणे
त्राणे व्याकरणे रणे वितरणे विश्वम्भराभूषणे ।
सत्यं सत्यवतीभये शरभये वागीशये विष्णये
दाक्षीकुक्षिभये पृथोदरभये देवद्वये मेरये ॥

विशिष्टराज-स्तुतिः ।

(क) हिन्दुराजगणः ।

अनङ्गभीमः ।

(११८)

पृथ्वी श्रीमदनङ्गभीम महती तद्वेष्टनं वारिधिः
पीतोऽसौ कलसोद्भवेन मुनिना स व्योम्नि खद्योतवत् ।
तद् विष्णोर्दनुजाधिनाथजयिनः पूर्णं पदं नाभवत्
चित्ते ते रमया सदास्ति स हरिस्त्वत्तो महान् नापरः ॥

(सार्वभौमस्य)

कृष्णचन्द्रः ।

(११९)

अथैकदा महाराजकृष्णचन्द्रेण स्थापितायाः कालीमूर्त्तेर्मणिमुकुटरत्नं चोरितं । पुरोधसा हरनाथेन कृतमेतदिति सञ्जातसंशयानां जनानां मतमनुसृत्य नृपस्तं कठोरं दण्डयितुमादिदेश । पुरोहितश्च शासनभिया राजकर्मचारिणाम् मन्त्रणामनुसरन् नितरां नृपप्रियं सभापण्डितं वाणेश्वरविद्यालङ्कारमुपेत्य सकलमेव व्यजिज्ञपत् । स च वक्ष्यमाण-श्लोकं हरनाथहस्तेन राजान्तिके प्रेषयामास :—

जले लवणवल्लीनं मानसं तन्मनोहरं ।
मनोजिहीर्षया देव्याः किरीटं हरते हरः ॥

(वाणेश्वरविद्यालङ्कारस्य)

(१२०)

कथं बालगोपालस्य एकचरणः पश्चाद्भागे करश्चैकः सम्मुखे प्रसारित इति कृष्णचन्द्रेण पृष्टस्य वाणेश्वरस्योक्तिरियम् :—

पाणौ मे नवनीतपुञ्जमधुना हारस्य वक्षःस्थले
चूडायामपि चारुचन्द्रकशिखा क्वास्ति चित्तं हृतम् ।
पादाब्जे वचसेति जानु धरणौ संपात्य संगोपयन्
गोपालो हरिरेष तस्करतया खिन्नः स्वयं पातु वः ॥

(वाणेश्वरविद्यालङ्कारस्य)

(१२१)

एकदा शीतकाले स्वजनन्याः श्राद्धवासरे दानसागरं कर्तुकामस्य कृष्णनगराधिपतेः कृष्णचन्द्रस्य स्नातं शीतकम्पितं गजयूथमवलोक्य तत्कारणं जिज्ञासुना नरपतिना पृष्टस्य विद्यालङ्कारोपाधिकस्य वाणेश्वरस्योक्तिरियम् :—

हस्तन्यस्तकुशोदके त्वयि न भूः सर्वंसहा कम्पते
देवागारतयैव काञ्चनगिरिश्चित्ते न धत्ते भयम् ।
अज्ञातद्विपभक्ष्यभिक्षुभवनप्रस्थानदुःस्थाशया
वेपन्ते मददन्तिनो नरपतेः श्रीकृष्णचन्द्रस्य ते ॥

(वाणेश्वरविद्यालङ्कारस्य)

गङ्गागोविन्दः ।

(१२२)

वङ्गदेशीयेन प्रथितयशसा भूस्वामिना गङ्गागोविन्देन प्रेषितानां गोलालूनां लाभेन नितरां परितुष्टस्य जगन्नाथतर्कपञ्चाननस्योक्तिरियम् :—

निरञ्जनं सुदुष्प्रापं सर्वव्यञ्जनरञ्जनम् ।
प्राप्तं श्रीगङ्गागोविन्दाद् गोलालु ब्रह्मवन्मया ॥

(जगन्नाथतर्कपञ्चाननस्य)

नन्दकुमारः ।

(१२३)

परमसत्त्वस्यापि महाराजस्य नन्दकुमारस्य भवने उत्सवनिवन्धनं निमन्त्रणमनाप्नुवता जगन्नाथतर्कपञ्चाननेन तमुद्दिश्य लिखितेयं लिपिः :—

त्वञ्चेच्चारयसे मुदा बहुगवान् दिग्दन्तिनां का क्षतिः
पत्रैर्मस्तकभूषणानि कुरुषे स्वर्गस्य किं लाघवम् ।
गोपीपादतले सदा पतसि चेत् किं निन्द्यते स्वर्वधूः
किं ब्रूमो वत कुब्जषट्कनृपते श्रीनन्दबालाऽधुना ॥

(जगन्नाथतर्कपञ्चाननस्य)

नवकृष्णः ।

(१२४)

एकदा जगन्नाथतर्कपञ्चाननः द्वह्निरोगदुष्टस्य कस्यचित् छात्रस्योपकारार्थं महाराज नवकृष्णं प्रति अनुरोधपत्रमिदं प्रदत्तवान् :—

द्वितीयभूतभूयिष्ठा मूर्त्तिरस्यादरसम्भवा ।
अस्याः पार्थिवसम्बन्धे यतनीयं क्षितीश्वरैः ॥
(जगन्नाथतर्कपञ्चाननस्य)

(१२५)

कलिकातास्थ-शोभाबाजार-निवासिना महाराजेन नवकृष्णेन प्रेषितानां कमला-निम्बुनां लाभेन नितरां परितुष्टस्य जगन्नाथतर्कपञ्चाननस्योक्तिरियम् :—

अगस्त्यवंशसम्भूता वयं वातापिभक्षकाः ।
नवकृष्णप्रसादात्तु कमलारसपायिनः ॥
(जगन्नाथतर्कपञ्चाननस्य)

प्रतापादित्यः ।

(१२६)

महाराजप्रतापादित्यस्य दानयशःप्रतापान् वर्णयति :—

दानाम्बुसेकशीतार्त्ता यशोवसनवेष्टिता ॥
त्रिलोकी ते प्रतापार्कं प्रतापादित्य सेवते ॥
(अविलम्बसरस्वत्याः)

राजसिंहः ।

(१२७)

कदाचित् इदिलपुरनिवासिना निमन्त्रितेन चन्द्रमणिन्यायभूषणेन सुसङ्गाधिपालयमागत्य कथितं राजन् पथि चक्रवाकमिथुनस्य कथोपकथनादेव सर्वैव भवतः क्रियाकलापवार्त्ता मया ज्ञातेतिः—

इत्यूचे चक्रवाकं वचनमनुदिनं दुःखभाक् चक्रवाकी
क्वापि स्यादेष देशो न भवति रजनी यत्र हे प्राणनाथ ।
कान्ते चिन्तां त्यज त्वं दिनकरकिरणच्छादकस्याद्य मेरो-
र्मूले दत्त्वाऽस्ति हस्तं विविधकृतिमुदे राजसिंहः प्रदाता ॥

(चन्द्रमणिन्यायभूषणस्य)

वर्द्धमान-राजः ।

(१२८)

एकदा वाणेश्वरोऽर्थं भिक्षितुं वर्द्धमानराजसदनमुपगम्य शिवपूजानिरतो नरपतिर्नाथमवसरः साक्षात्कारस्येति निशम्य दौवारिकमुवाच—ब्रूहि मद्वचनाद् राजानं "त्वं यस्य पूजायां व्याप्टतः स शिवः पञ्चत्वं गतः। तस्य विभवादयोऽपि सर्वैरेव विभज्य गृहीताः। मयापि तस्य एकं द्रव्यं लब्धम्। तदेव भवन्तं दर्शयितुमिहागतः।" तदाकर्ण्य राजा वाणेश्वर मानाय्य पप्रच्छ किं त्वया लब्धमिति। स आह :—

अर्द्धं दानववैरिणा गिरिजयाऽप्यर्द्धं हरस्याहृतं
देवत्वं धरणीतले स्मरहराभावे समुन्मीलति ।
गङ्गा वारिधिमम्बरं शशिकला नागाधिपः क्ष्मातलं
सर्वज्ञत्वमधीश्वरत्वमगमत् त्वां माञ्च भिक्षाश्रयः ॥

(शङ्करकवेः, केषाञ्चिन्मते वाणेश्वरविद्यालङ्कारस्य)

(१२९)

चन्द्रे या कृष्णरेखा सा तस्य न दोषचिह्नमित्याह :—

त्वत्कीर्त्ति शीतकिरणेऽभ्युदितेऽतिसाध्वी
रोहिण्यपि स्वपतिसंशयजातशङ्का ।
श्रीवर्द्धमाननृप कज्जललाञ्छलेन
प्रेयांसमाङ्कयदसौ न विधौ कलङ्कः ॥
(जयगोपालतर्कालङ्कारस्य)

वीरवलः ।

(१३०)

जम्बुद्वीपपुरप्रकाशनकरी स्नेहत्वमाधायिनो
नोत्युद्गीर्णमसीततिः खलजनश्रेणीपतङ्गान्तकृत् ।
गाजीन्द्राकवरक्षितीश्वरवरस्वान्तान्धकारापहा
धन्या वीरवलस्य भारतगृहे दीपोपमा लेखनी ॥

(ख) मुसलमान-नवावगणः ।

आलीवर्द्दिः ।

(१३१)

गुप्तपल्लीवास्तव्यः कविकुलतिलको वाणीश्वरविद्यालङ्कारसदानी' कविर्न समयवङ्गा-
धिपतिं नवावालिवर्द्दिं, नवद्वीपाधिपतिं महाराजं कृष्णचन्द्रं, कलिकाता-शोभाबाजार-

निवासिनं भूपतिं नवकृष्णञ्च परं परितोषयामास। अथैकदा स्वस्य चित्तं सम्बोध्य इदमुवाच :—

आलीवर्द्दिनवावमप्यथ नवद्वीपेश्वरञ्चाश्रितं
तत्पश्चान्नवकृष्णभूपतिममुं रे चित्त वित्ताशया।
सर्वत्रैव नवेतिशब्दघटितं लब्धेत् कमालम्बसे
तद् देवं परमार्थदं नवघनश्यामं कथं मुञ्चसि॥
(वाणेश्वरविद्यालङ्कारस्य)

सिराजद्दौला।

(१३२)

उपरते आलीवर्द्दिनवावे तद्दौहित्रः मनसुर्-उल-मुल्क-सिराजद्दौला-नवावो ब्राह्मण-पण्डितान् निमन्त्रयितुमिच्छन् श्लोकरचनार्थं महाराजं कृष्णचन्द्रमनुरुरोध। स च श्लोकमिमं तदन्तिके प्रेषयामास :—

खोदापादारविन्दद्वयभजनपरो मातृतातो मदीय
आलीवर्दीनवावो विविधगुणयुतोऽल्लामुखः पश्चिमास्यः।
मर्त्यं देहं जहौ स्वं मुनसरमुलुकः सीरजद्दौलनामा
याचेऽहं मां भवन्तो गलधृतवसनः शुद्धतां संनयन्ताम्॥
(वाणेश्वरविद्यालङ्कारस्य)

(ग) मोगलसम्राड्गणः ।

वावरः ।

(१३३)

वैकुण्ठाभिप्रणीतः कमलयुतशिराः कुञ्जराकृष्टदृष्टिः
कोदण्डोदारनामाप्यमितपरिजनो विश्वविख्यातकीर्त्तिः ।
सुन्दर्य्यासक्तचित्तः समरणविजयी कङ्कणाहारयुक्तो
वीर श्रीवावराख्य त्वमिव तव रिपुर्हन्त मुक्तादिवर्णः ॥

(शालिकनाथस्य)

आकबरः ।

(१३४)

कर्णाटं देहि कर्णाधिकविधिविहितत्याग लाटं ललाट-
प्रोत्तुङ्ग द्राविड़ं वा प्रवलभुजबलप्रौढ़मागाढ़राढ़म् ।
प्रस्फुर्ज्जद्गुर्ज्जरं वा दलितरिपुवधूगर्भ वैदर्भकं वा
गाजी राजीवदृष्टे कुशशतमथवा साहजल्लालुदीन ॥

(नायकगोपालस्य)

सेरसाहः ।

(१३५)

कस्याञ्चित् वाचि कैश्चिन्ननु यदि निहितं दूषणं दुष्टचित्तैः
किं मालिन्यं तदा स्यात् प्रथितगुणवतां काव्यकोटीश्वराणाम् ।
वाहाश्चेद् गन्धवाहाधिकविहितजवाः पञ्चषश्चान्धखञ्जाः
का हानिः सेरसाहक्षितिपतितिलकस्याश्वकोटीश्वरस्य ॥

(भट्टमल्लस्य)

जाहाङ्गीरः ।

(१३६)

श्यामं यज्ञोपवीतं तव किमिति मसीसङ्गमात् कुत्र जातः
सोऽयं तिग्मांशुकन्यापयसि कथमभूत् तज्जलं कज्जलाभम् ।
व्याकुप्यन्नूरदीनक्षितिरमणरिपुक्षौणिभृत्पक्ष्मलाक्षी-
लक्षाक्षीणाश्रुधारासमुदितसरितां सर्वतः सङ्गमेन ॥

(पण्डितराजजगन्नाथस्य)

साजाहानः ।

(१३७)

शास्त्राण्याकलितानि नित्यविधयः सर्वेऽपि सम्भाविता
दिल्लीवल्लभपाणिपल्लवतले नीतं नवीनं वयः ।
सम्प्रत्युज्झितमासनं मधुपुरीमध्ये हरिः सेव्यते
सर्वं पण्डितराजराजितिलकेनाकारि लोकाधिकम् ॥

(पण्डितराजजगन्नाथस्य)

दारा ।

(१३८)

अनुकूलभावमथवा
पराङ्मुखत्वं सहैव नरलोके ।
अन्योन्यविहितमन्त्रौ
विधिदाराभूपती वहतः ॥
(पण्डितराजजगन्नाथस्य)

(१३९)

माहात्म्यस्य परोऽवधिर्निजगृहं गम्भीरतायाः पिता
रत्नानामहमेक एव भुवने को वापरो मादृशः ।
इत्येवं परिचिन्त्य मा स्म सहसा गर्वान्धकारं गमो
दुग्धाब्धे भवता समो विजयते दाराधरावल्लभः ॥
(पण्डितराजजगन्नाथस्य)

कवि-समष्टिः ।

(१४०)

माघश्चोरो मयूरो मुररिपुरपरो भारविः सारविद्यः
श्रीहर्षः कालिदासः कविरथ भवभूत्याह्वयो भोजराजः ।
श्रीदण्डी डिण्डिमाख्यः श्रुतिमुकुटगुरुर्भल्लटो भट्टबाणः
ख्यातास्चान्ये सुबन्ध्वादय इह कृतिभिर्विश्वमाह्लादयन्ति ॥

(१४१)

यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो
भासो हासः कविकुलगुरुः कालिदासो विलासः।
हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः
केषां नैषा कथय कविताकामिनी कौतुकाय ॥

(प्रसन्नराघवकारजयदेवस्य)

(१४२)

शीलाविज्जामारुलामोरिकाद्याः
काव्यं कर्तुं सन्ति विज्ञाः स्त्रियोऽपि।
विद्यां वेत्तुं वादिनो निर्विजेतुं
विश्वं वक्तुं यः प्रवीणः स वन्द्यः॥

(धनदेवस्य)

(१४३)

वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां
जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते।
शृङ्गारोत्तरसत्प्रमेयरचनैराचार्य्यगोवर्द्धन-
स्पर्द्धी कोऽपि न विश्रुतः श्रुतधरो धोयी कविक्ष्मापतिः॥

(गीतगोविन्दकारजयदेवस्य)

(१४४)

गोवर्द्धनश्च शरणो जयदेव उमापतिः ।
कविराजश्च रत्नानि समितौ लक्ष्मणस्य च ॥

(गीतगोविन्दकारजयदेवस्य)

(१४५)

भासो रामिलसौमिलौ वररुचिः श्रीसाहसाङ्कः कवि-
र्मेण्ठो भारविकालिदासतरलाः स्कन्धः सुबन्धुश्च यः ।
दण्डी बाणदिवाकरौ गणपतिः कान्तश्च रत्नाकरः
सिद्धा यस्य सरस्वती भगवती के तस्य सर्वेऽपि ते ॥

(राजशेखरस्य)

विशिष्ट-कविः ।

कालिदासः ।

(१४६)

कवयः कालिदासाद्याः कवयो वयमप्यमी ।
पर्वते परमाणौ च पदार्थत्वं प्रतिष्ठितम् ॥

(कृष्णभट्टस्य)

(१४७)

अहो मे सौभाग्यं मम च भवभूतेश्च भणितं
तुलायामारोप्य प्रतिफलति तस्मिन् लघिमनि ।
गिरां देवी साक्षात् श्रुतिकलितकह्लारकलिका-
मधूलीमाधुर्य्यं क्षिपति परिपूर्त्त्यै भगवती ॥

(कालिदासस्य)

दण्डी ।

(१४८)

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् ।
कवी इति ततो व्यासे कवयस्त्वयि दण्डिनि ॥

(१४९)

त्रयोऽग्नयस्त्रयो देवास्त्रयो वेदास्त्रयो गुणाः ।
त्रयो दण्डिप्रबन्धाश्च त्रिषु लोकेषु विश्रुताः ॥

(राजशेखरस्य)

पण्डितराज-जगन्नाथः ।

(१५०)

कवयंति पण्डितराजे
कवयन्त्यन्येऽपि विद्वांसः ।
नृत्यति पिनाकपाणौ
नृत्यन्त्यन्येऽपि भूतवेतालाः ॥

(पण्डितराजजगन्नाथस्य)

पाणिनिः ।

(१५१)

स्वस्ति पाणिनये तस्मै यस्य रुद्रप्रसादतः ।
आदौ व्याकरणं काव्यमनु जाम्बवतीजयम् ॥

(राजशेखरस्य)

बाणभट्टः ।

(१५२)

श्लेषे केचन शब्दगुम्फविषये केचिद् रसे चापरेऽ-
लङ्कारे कतिचित् सदर्थविषये चान्ये कथावर्णने ।
आः सर्वत्र गभीरधीरकविताविन्ध्याटवीचातुरी-
सञ्चारी कविकुम्भिकुम्भभिदुरो बाणस्तु पञ्चाननः ॥

(चन्द्रदेवस्य)

(१५३)

हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनां
श्रीहर्षेण समर्पितानि गुणिने बाणाय कुत्राद्य तत् ।
या बाणेन तु तस्य सूक्तिविसरैरुट्टङ्किताः कीर्त्तय-
स्ताः कल्पप्रलयेऽपि यान्ति न मनाङ् मन्ये परिम्लानताम् ।

भवभूतिः ।

(१५४)

सुबन्धौ भक्तिर्नः क इह रघुकारे न रमते
धृतिर्दाक्षीपुत्रे हरति हरचन्द्रोऽपि हृदयम् ।
विशुद्धोक्तिः शूरः प्रकृतिमधुरा भारविगिर-
स्तथाप्यन्तर्मोदं कमपि भवभूतिर्वितनुते ॥

(सदुक्तिकर्णामृते)

भारविः ।

(१५५)

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते तु पुनर्माघे भारवेर्भा रवेरिव ॥

माघः ।

(१५६)

उपमा कालिदासस्य भारवेरर्थगौरवम् ।
नैषधे पदलालित्यं माघे सन्ति त्रयो गुणाः ॥

(१५७)

माघेन विघ्नितोत्साहा नोत्सहन्ते पदक्रमे ।
स्मरन्तो भारवेरेव कवयः कपयो यथा ।

(धनपालस्य)

मातङ्गदिवाकरः ।

(१५८)

अहो प्रसादो वाग्देव्या यन्मातङ्गदिवाकरः ।
श्रीहर्षस्याभवत् सभ्यः समो बाणमयूरयोः ॥

(राजशेखरस्य)

मुरारिः ।

(१५९)

देवीं वाचमुपासते हि बहवः सारं तु सारस्वतं
जानीते नितरामसौ गुरुकुलक्लिष्टो मुरारिः कविः ।
अब्धिर्लङ्घित एव वानरभटैः किन्त्वस्य गम्भीरता-
मापातालनिमग्नपीवरवपुर्जानाति मन्थाचलः ॥

यशोवर्मा ।

(१६०)

कविर्वाक्पतिराजश्रीभवभूत्यादिसेवितः ॥
जितो ययौ यशोवर्मा तद्गुणस्तुतिवन्दिताम् ॥

(राजतरङ्गिण्याम्)

वाल्मीकिः ।

(१६१)

कूजन्तं राम रामेति मधुरं मधुराक्षरम् ।
आरुह्य कविताशाखां वन्दे वाल्मीकिकोकिलम् ॥

(रामानुजस्य)

(१६२)

कवीन्दुं नौमि वाल्मीकिं यस्य रामायणीं कथाम् ।
चन्द्रिकामिव चिन्वन्तु चकोरा इव कोविदाः ॥
(शार्ङ्गधरस्य)

विकटनितम्बा ।

(१६३)

के वैकटनितम्बेन गिरां गुम्फेन रञ्जिताः ।
निन्दन्ति निजकान्तानां न मौग्ध्यमधुरं वचः ॥
(राजशेखरस्य)

व्यासः ।

(१६४)

अचतुर्वदनो ब्रह्मा द्विबाहुरपरो हरिः ।
अभाललोचनः शम्भुर्भगवान् बादरायणः ॥

श्रीहर्षः ।

(१६५)

तावद् भा भारवेर्भाति यावन्माघस्य नोदयः ।
उदिते नैषधे काव्ये क्व माघः क्व च भारविः ॥

जन्तुवर्गः ।

अश्वः ।

(१६६)

जवेन धावितो वाजी विभिद्य वायुमण्डलम् ।
तस्य संश्लेषतः पूर्वमेव प्रत्यागतः पुनः ॥

(१६७)

आकर्षन्निव गां वमन्निव खुरौ पश्चार्द्धमुज्झन्निव
स्वीकुर्वन्निव खं पिबन्निव दिशो वायूंश्च मुष्णन्निव ।
साङ्गारप्रकरां स्पृशन्निव भुवं छायाममर्षन्निव
प्रेङ्खच्चामरवीज्यमानवदनः श्रीमान् हयो धावति ॥

(सिंहदत्तस्य, केषाञ्चिन्मते नकुलस्य)

ङ्क्लिशः ।

(१६८)

कश्चित् ङ्क्लिशभक्तः कविरिङ्क्लिशं स्तौति :—

विश्वाधारो हि वायुस्तदुपरि कमठस्तत्र शेषस्ततो भू-
स्तस्यां कैलासशैलस्तदुपरि भगवान् मस्तके तस्य गङ्गा ।
स्निग्धः पीयूषतुल्यस्तदुदरकुहरे श्रीङ्क्लिशोऽकिल्विषोऽस्ति
माहात्म्यं तस्य को वा प्रकथयितुमलं भच्चणाद् यस्य मुक्तिः ॥

(कविचन्द्रस्य)

उष्ट्रः ।

(१६९)

रूक्षं वपुर्न च विलोचनहारि रूपं

न श्रोत्रयोः सुखदमारटितं कदापि ।

इत्थं न साधु तव किञ्चिदिदञ्च साधु

तुच्छे रतिः करभ कण्टकिनि द्रुमे यत् ॥

(धर्मकीर्त्तेः)

काकः ।

(१७०)

स्थानमहिम्ना अशोभनान्यपि वस्तूनि शोभनानि भवन्तीत्याह :—

माकन्दं मकरन्दतुन्दिलममुं गाहस्व काकः स्वयं

कर्णारुन्तुदमन्तरेण रचितं त्वां मन्महे कोकिलम् ।

रम्याणि स्थलसौष्ठवेन कतिचिद् वस्तूनि कस्तूरिकां

नेपालक्षितिपालभालमिलिते पङ्के न शङ्केत कः ॥

(प्रेमचन्द्रतर्कवागीशस्य)

(१७१)

किं केकीव शिखण्डमण्डिततनुः किं कीरवत् पाठकः

किं वा हंस इवातिमन्दसुगतिः सारीव किं सुस्वरः ।

किं वा हन्त शकुन्तराजपिकवत् कर्णामृतं भाषते

काकः केन गुणेन काञ्चनमये संरक्षितः पिञ्जरे ॥

कोकिलः ।

(१७२)

अपसर परभृत दूरं
गोष्ठीयं काकरवरसिका ।
दूर्वाचर्वणपटवो
गावो न जानन्तीक्षुरसं मधुरम् ॥

(१७३)

भ्रातः कोकिल भीतभीत इव किं पत्नाहृतो वर्त्तसे
नीचैः पश्य सखे शरासनकरा धावन्ति भिल्लार्भकाः ।
का भीतिस्तव यत् कुहूरिति परा विद्या सुधास्यन्दिनी
किं क्रूरे गुणगौरवं किमसतीचित्ते पतिप्रेम वा ॥

चक्रवाकः ।

(१७४)

अस्तं गतोऽयमरविन्दवनैकबन्धुः
सूर्य्यो न लङ्घयति कोऽपि विधेरनुज्ञाम् ।
हे चक्र धैर्य्यमवलम्ब्य विमुञ्च शोकं
धीरास्तरन्ति विपदं न कदाप्यधीराः ॥

चक्रवाकी ।

(१७५)

श्लाघ्या बन्धनवेदना चरणयोः श्लाघ्या निराहारता
श्लाघ्यस्त्वाप्युपकारकारणतया मृत्युर्द्वयोरावयोः ।
सर्वंथ्यां प्रियसङ्गमो मम कुले स्वप्नेऽपि नैव श्रुतो
व्याधः साधुरसौ विधातृकलिपिर्व्यर्थीकृता येन हि ॥

चातकः ।

(१७६)

वापी स्वल्पजलाशया विषमयो नीचावगाह्यो ह्रदः
क्षुद्रात् क्षुद्रतरो महाजलनिधिर्गण्डूष एको मुनेः ।
गङ्गाद्याः सरितः पयोनिधिगताः संत्यज्य तस्मादिदं
सम्मानी खलु चातको जलमुचामुच्चैर्जलं वाञ्छति ॥

(१७७)

गङ्गाजले प्लवमानं म्रियमाणस्य कस्यचित् चातकं प्रति कस्यचिद् उक्तिरियं, पुनश्च तं प्रति चातकस्य प्रत्युक्तिः :—

रे रे चातक पातितोऽसि मरुता गङ्गाजले चेत् तदा
पेयं नीरमशेषपातकहरं काशा पुनर्जीवने ।
मैवं ब्रूहि लघीयसो यमभयादुद्ग्रीवतामुज्झता
गङ्गाम्भः पिबता मया निजकुले किं स्थाप्यते दुर्यशः ॥

धेनुः ।

(१७८)

स्तन्यं पाययन्तीं धेनुं पिबन्तं वत्सञ्च स्वभावोक्त्या वर्णयति :—

आहत्याहत्य मूर्द्ध्ना द्रुतमनु पिबतः प्रस्नुतं मातुरूधः
किञ्चित् कुब्जैकजानोरनवरतचलच्चारुपुच्छस्य धेनुः ।
उत्कर्णं तर्णकस्य प्रियतनयतया दत्तहुङ्कारमुद्रा
विच्योतत्क्षीरधारालवशबलमुखस्याङ्गमाद्रम्रि लेढ़ि ॥

(मयूरस्य)

बकः ।

(१७९)

न भ्रूणां स्फुरणं न चञ्चुचलनं नो चूलिकाकम्पनं
न ग्रीवाचलनं मनागपि न यत् पक्षद्वयोत्क्षेपणम् ।
नासाग्रेक्षणमेकपाददमनं कष्टैकनिष्ठं परं
यावत् तिष्ठति मीनहीनवदनस्तावद् बकस्तापसः ॥

भेकः ।

(१८०)

गङ्गादीनां सकलसरितां प्राप्य तोयं समुद्रः
किञ्चिद् गर्वी न भवति वपुर्दिव्यरत्नाकरोऽपि ।
एको भेकः परममुदितः प्राप्य गोष्पादनीरं
को मे को मे रटति बहुशः स्पर्द्धया विश्वमुच्चैः ॥

भ्रमरः ।

(१८१)

अपसर मधुकर दूरं
परिमलबहुलेऽपि केतकीकुसुमे ।
इह नहि मधुलवलाभो
भवति परं धूलिधूसरं वदनम् ॥

(१८२)

अनुसरति करिकपोलं
भ्रमरः श्रवणेन ताड्यमानोऽपि ।
गणयति न तिरस्कारं
दानान्धितलोचनो नीचः ॥

(१८३)

केचिदर्थिनः कस्यचित् धनिनो गृहात् हताशाः प्रतिनिवर्त्तमानास्तमिदमाहुः :—

दानार्थिनो मधुकरा यदि कर्णघातै-
दूरीकृताः करिवरेण मदान्धबुद्ध्या ।
तस्यैव गण्डयुगमण्डनहानिरेषा
भृङ्गाः पुनर्विकचपद्मवने चरन्ति ॥

मत्स्यरङ्कः ।

(१८४)

कविर्मत्स्यरङ्कमुपजीव्य किञ्चित् सुखाशया बहुविघ्नसङ्कुले कर्म्मणि न प्रवर्त्तेत इत्युपदिशति :—

क्षारं वारि न चिन्तितं न गणिता नक्रादयो भीषणा-
स्वच्चत्तुङ्गतरङ्गडम्बरपरिलासोऽपि नालोचितः ।
मध्येऽम्भोनिधि मत्स्यरङ्क भवता झम्पः प्रदत्तो मुदा
सम्पच्चेत् शफरार्जनं विपदिह प्राणप्रयाणावधिः ॥

मशकः ।

(१८५)

काचिद् विदुषी रमणी रात्रौ मशकपीड़नमसहमाना प्रोषितं भर्त्तारमुद्दिश्य श्लोकमिमं लिखित्वा प्रेषयामास :—

जितधूमसमूहाय जितव्यजनवायवे ।
मशकाय मया कायः सायमारभ्य दीयते ॥

(जयन्तीदेव्याः)

महिषः ।

(१८६)

बहुलाभप्रत्याशया दूरदेशवर्त्तिनमविदितदातृत्वं कञ्चित् धनिनमुपगम्य स्वाभीष्टमप्राप्तवतां भिक्षुकाणामियमुक्तिः :—

स्थूलतया नीलतया दूरतया दानलोलुपैर्मधुपैः ।
धावितमिभराजधिया हन्तासीदन्ततो महिषः ॥

राघवः ।

(१८७)

यस्मिन् वेल्लति सर्वतः परिचलत्कल्लोलकोलाहलै-
र्मन्याद्रिभ्रमणभ्रमं हृदि हरिद्दन्तावलाः पेदिरे ।
सोऽयं तुङ्गतिमिङ्गिलाङ्गकवलीकारक्रियाकोविदः
क्रोडे क्रीडतु कस्य केलिकलहत्यक्तार्णवो राघवः ॥

शङ्खः ।

(१८८)

कीटगृहं कुटिलोऽन्तः
कठिनः क्षाराम्बुसम्भवः शून्यः ।
शङ्खः श्रीपतिनिकटे
केन गुणेन स्थितिं लेभे ॥

(शार्ङ्गधरस्य)

शफरी ।

(१८८)

बहुविद्वदधिष्ठिते सदसि अकृतविद्यस्य कस्यचित् वाचालतामाकर्ण्य कविराह :—

शफर संहर चञ्चलतामिमां
द्रुतमगाधसलिलप्रणयी भव ।
इह हि कूजितमञ्जुलजालके
वसति दुष्टबकः सकुटुम्बकः ॥

शुकः ।

(१९०)

उच्चैरेष तरुः फलञ्च विपुलं दृष्ट्वैव हृष्टः शुकः
पक्वं शालिवनं विहाय जड़धीस्तन्नारिकेलं गतः ।
तत्रारुह्य बुभुक्षितेन मनसा यत्नः कृतो भेदने
चाशा तस्य न केवलं विदलिता चञ्चुर्गता चूर्णताम् ॥

सर्पः ।

(१९१)

यस्य कतिचिद् गुणाः कतिचिच्च दोषाः सन्ति तादृशं जनं सर्पवर्णनमुखेनाक्षिपति :—

मौलौ सन्मणयो गृहं गिरिगुहा त्यागः किलात्मत्वचो
निर्मोको[illegible]वृत्तिरनिलैरेकैव चर्येदृशी ।

अन्यत्रानृजुवर्त्मता द्विरसना वक्त्रे विषं वीक्षणं
सर्वामङ्गलसूचकं कथय भो भोगिन् सखे किं न्विदम् ॥
(जीवनागस्य)

सिंहः ।

(१८२)

नास्योच्छ्रायवती तनुर्न दशनौ दीर्घौं न दीर्घः करः
सत्यं वारण येन केशरिशिशुस्त्वां स्पर्द्धते नित्यशः ।
तेजोबीजमजेयमस्य हृदये न्यस्तं पुन र्वेधसा
तादृक् त्वादृशमेव येन सुतरां भोज्यं पशुं मन्यते ।
(आनन्दवर्द्धनस्य)

हंसः ।

(१८३)

कोऽपि सर्वत्र समदर्शिनस्तत्त्वविदो विकारहेतु र्न भवतीत्याह :—

गाङ्गमम्बु सितमम्बु यामुनं
कज्जलाभमुभयत्र मज्जतः ।
राजहंस तव सैव शुभ्रता
चीयते न च न चापचीयते ॥

(१८४)

गतं तद् गाम्भीर्य्यं तटमपि चितं जालिकशतैः

सखे हंसोत्तिष्ठ त्वरितममुतो गच्छ सरसः ।

न यावत् पङ्कान्तःकलुषिततनुर्भूमिविलसद्-

बकोऽसौ वाचालश्चरणयुगलं मूर्ध्नि कुरुते ॥

हस्ती ।

(१८५)

सञ्चर करिवर धीरं

मा मर्दय मर्म्मराणि च पत्राणि ।

इह पुरतो गिरिकुहरे

किमु सुखशायी न गोचरः सिंहः ॥

(१८६)

नाभूवन् भुवि यस्य कुत्रचिदपि स्पर्द्धाकराः कुञ्जराः

सिंहेनापि न लङ्घिता किमपरं यस्योद्धता पद्धतिः ।

कष्टं सोऽपि कदर्थ्यते करिवर स्फाराखैः फेरवै-

रापातालगभीरपङ्कपटलीमग्नोऽद्य भग्नोद्यमः ॥

(विज्ञकस्य)

उद्भित्-तरङ्गः ।

सामान्य-वृक्षः ।

(१९७)

ये पूर्वं परिपालिताः फलदलच्छायादिभिः प्राणिनो
विश्रामद्रुम कथ्यतां तव विपत्काले क्व ते साम्प्रतम् ।
एताः सङ्गतिमात्रकल्पितपुरस्काराखु धन्यास्त्वचो
यासां छेदनमन्तरेण पतितो नायं कुठारस्त्वयि ॥

आम्रः ।

(१९८)

त्वपाश्यामा जम्बूः स्फुटितहृदयं दाड़िमफलं
सशूलं संधत्ते हृदयमभिमानेन पनसम् ।
अभूदन्तस्तोयं तरुशिरसिजं लाङ्गलिफलं
समायाते चूते जगति रसराजे रसमये ॥

कदली ।

(१९९)

वल्कं श्राद्धविधायकं तव फलं देवादिसन्तर्पणं
पुष्पं व्यञ्जनमुत्तमं परिभवेत् मूलं दरिद्रादनम् ।
पत्रं भोजनसौख्यदं किमपरं चारेण वस्त्रं शुचि
धन्यस्त्वं कदलीतरो परहिते यद्देहपातः पणः ॥

(२००)

धिग् दैवं कदली झटित्युपकृतिं कर्त्तुं क्षमा लीलया
शाखापत्रफलैश्च मूलकुसुमैस्त्वग्भिर्न जीवेच्चिरम् ।
शाखोटः करटालयोऽप्यसरलं काष्ठं न तुष्टिप्रदं
प्रायोभूतनिकेतनं कथमहो दीर्घायुरेवं तरुः ॥

कल्पवृक्षः ।

(२०१)

औदार्य्यं भुवनत्रयेऽपि विदितं सम्भूतिरम्भोनिधे-
र्वासो नन्दनकानने परिमलो गीर्वाणचेतोहरः ।
एवं दातृगुणोत्करः सुरतरोः सर्वोऽपि लोकोत्तरः
स्यादर्थिप्रवरार्थितार्पणविधावेको विवेको यदि ॥

(२०२)

वासः शैलशिलान्तरेषु सहजः सङ्गो भुजङ्गैः सह
प्रेङ्खत्क्षारपयोधिवीचिभिरभूदुद्भूतसेकक्रिया ।
जानीमो न वयं प्रसीदतु भवान् श्रीखण्ड तत् कथ्यतां
कस्मात्ते परतापखण्डनमहापाण्डित्यमभ्यागतम् ॥

चम्पकः ।

(२०३)

चम्पकेषु भ्रमरा नासते इति मनसिकृत्य आह :—

यन्नाद्दृतस्त्वमलिना मलिनाशयेन
किं तेन चम्पक विषादमुरीकरोषि ।
विश्वाभिरामनवनीरदनीलवेशाः
केशाः कुशेशयदृशां कुशलीभवन्तु ॥

(२०४)

कम्पं चम्पक मुञ्च याचकगणैरायासितस्त्वं सखे
मा म्लासीः परितो विलोकय तरून् कस्ते विधत्ते तुलाम् ।
स्याच्चेच्चेतसि कोप एव नितरां धात्रे तदा कुप्यतां
येन त्वं सुसुवर्णवर्णकुसुमामोदोऽद्वितीयः कृतः ॥

ताम्बूलम् ।

(२०५)

ताम्बूलं गदराशिनाशनिपुणं दुर्गन्धविध्वंसनं
रुच्यं जाठरवह्निवृद्धिजननं सुखप्रसंवर्द्धनं ।
आस्यालङ्करणं विनोदसदनं मारानलोल्लासनं
रागेणैव विभातु यस्य नियतं श्रीपूर्णचन्द्राननम् ॥
(उद्भटसागरस्य)

तालः ।

(२०६)

अध्वन्यध्वनि भूरुहः फलभृतो नम्रानुपेक्ष्यादरात्
दूरादुन्नतिसंश्रयव्यसनिनः पान्थस्य मुग्धात्मनः ।
यन्मूलं समुपागतस्य मधुरच्छायाफलैः का कथा
शीर्णेनापि हि नोपयोगमगमत् पर्णेन तालद्रुमः ॥

तृणम् ।

(२०७)

उत्तुङ्गैस्तरुभिः किमेभिरखिलैराकाशसंस्पर्द्धिभि-
र्धन्योऽसौ नितरामुलूपविटपो नद्यास्तटेऽवस्थितः ।
एवं यः कृतबुद्धिरुद्धतजलव्यालोलवीचीवशाद्
मज्जन्तं जनमुद्धरामि सहसा तेनैव मज्जामि वा ॥

(वाणाकस्य)

धुस्तूरः ।

(२०८)

उन्मत्त धूर्त्त तरुणेन्दुनिवासयोग्ये
स्थाने पिशाचपतिना विनिवेशितोऽसि ।
किं कैरवाणि विकसन्ति तमः प्रयाति
चन्द्रोपलो द्रवति वार्द्धिरुपैति वृद्धिम् ॥

निम्बः ।

(२०९)

आम्रं प्रति निम्बस्योक्तिः :—

निम्बो हि तिक्तः खलु कष्टभोग्य-
स्तथापि सेव्यो हितकृद् यतोऽसौ ।
किं मां न जानासि रसाल गर्वाद्
जगन्निवासस्य निवासबीजम् ॥

पद्मम् ।

(२१०)

तत्त्वानभिज्ञो हि प्रायशो वास्तवं वस्तु अन्यथा कल्पयतीति दर्शयितुं कविः पद्मिनी-वचनमुपन्यस्यति भानुरिति :—

भानुः शोषयितुं समेति गगनं मज्जीवनं जीवनं
तच्चाहं नलिनी प्रसारितदला गोप्तुं खरांशोः करात् ।
तत् क्लेशानपनेतुमस्तगमिते भानौ सदा मुद्रिता
मित्रे या मम मित्रता स्वयमृते जानाति तां को जनः ॥

(२११)

एकदा राजा कृष्णचन्द्रः बाणेश्वरविद्यालङ्कारेण सह सरस्तीरे परिभ्रमन् पद्ममेकमव-लोक्य कविवरं कथितवान् महात्मन् एवंविधं पद्यद्वयं रचय यत्रैकस्मिन् पद्मस्य निन्दा अपरस्मिन् प्रशंसा च। विद्यालङ्कारस्य तदैव श्रावितवान् :—

पद्म-प्रशंसा ।

हे पद्मिनीपत्र भवच्चरित्रं
चित्रं प्रतीमो वयमत्र किञ्चित् ।
त्वं पङ्कजन्मापि यदङ्कभावा-
दपि स्पृशस्यम्बु न पङ्कसङ्गि ॥
(बाणेश्वरविद्यालङ्कारस्य)

पद्म-निन्दा ।

रे पद्मिनीदल तवात्र मया चरित्रं
दृष्टं विचित्रमिव यद् विदितं ध्रुवं तत् ।
यैरेव शुद्धसलिलैः परिपालितं त्वं
तेभ्यः पृथग् भवसि पङ्कभवं यतोऽसि ॥
(शार्ङ्गधरस्य)

(२१२)

देशान्तरगमनोन्मुखं प्रियतममुद्दिश्य तत्प्रियायाः करुणोक्तिं भङ्ग्यन्तरेणाह कवि :—

अस्तं गच्छसि गच्छ वर्त्मनि तव स्वस्त्यस्तु भोः सर्वथा
वक्तव्यं कियदस्ति मेऽत्र जगदानन्दैकसिन्धो रवे ।
नाहं कैरविणी न वास्मि रजनी यत्प्रीतिरिन्दूदये
पद्मिन्या न गतिर्विना दिनमणिं स्मर्त्तव्यमेतत् त्वया ॥

पलाण्डुः ।

(२१३)

कर्पूरधूलीरचितालवालः
कस्तूरिकाकुङ्कुमलिप्तदेहः ।
सुवर्णकुम्भैः परिषिच्यमानः
निजं गुणं मुञ्चति किं पलाण्डुः ॥

बदरी ।

(२१४)

श्रीमान् वसन्त भवतोऽभ्युदये तरूणां
के नाम नो सुफलपल्लवशालिनः स्युः ।
अस्माकमल्पतपसां बदरीतरूणां
भ्रष्टं फलं चिरशिखाऽपि जनैर्विलूना ॥

मन्दारः ।

(२१५)

न हि च्छायादानात् पथिकजनसन्तापहरणं
फलैर्वा पुष्पैर्वा नहि सुरनरप्रीतिजननम् ।
इदन्ते मन्दारद्रुम सहजमेतत्त्वनुचितं
वृतीभूतो रक्षस्यपरमपरेषां फलमपि ॥

शालिः ।

(२१६)

येनामी जनिता वयं प्रतिदिनं स्नेहेन संवर्द्धिता
येनास्मत्तृणपीड़नं न सहितुं शक्तं स एव स्वयम् ।
छेत्तुं नः कथमद्य वाञ्छति शिरो मत्वेति नम्राननाः
क्रन्दन्तीव तुषारवाष्पविगलद्बिन्दुच्छलाच्छालयः ॥

शाल्मलिः ।

(२१७)

हंसाः पद्मवनाशया मधुलिहो माध्वीकलाभाशया
पान्थाः स्वादुफलाशया बलिभुजो गृध्राश्च मांसाशया ।
दूरान्निष्फलरक्तपुष्पनिकरैर्निःसार मिथ्योन्नते
रे रे शाल्मलिपादप प्रतिदिनं के न त्वया वञ्चिताः ॥

स्वभावोक्ति-तरङ्गः ।

(क) पर्वतः ।

मन्दरः ।

(२१८)

सुरारातिर्लक्ष्मीं त्रिपुरविजयी शीतकिरणं
करीन्द्रं पौलोमीपतिरपि स लेभे जलनिधेः ।
त्वया किं वा लब्धं कथय मथने मन्दरगिरे
शरण्यः शैलानां यदयमददाद् रत्ननिलयः ॥

मलयः ।

(२१९)

विख्याताः कति सन्ति भूधरगणाः श्लाघ्योऽसि भूमण्डले
यातास्चन्दनतां यतो विटपिनः सर्वे तवैवाश्रयात् ।
किन्त्वेकं मलय त्वदीयमयशो लोकैश्चिरं गीयते
यत् शाखोटरसालसालवकुले नासीद् विशेषग्रहः ॥

मैनाकः ।

(२२०)

वरं पक्षच्छेदः समदमघवन्मुक्तकुलिश-
प्रहारैरुद्गच्छद्बहुलदहनोद्गारगुरुभिः ।
तुषाराद्रेः सूनोरहह पितरि क्लेशविवशे
न चासौ सम्पातः पयसि पयसां पत्युरुचितः ॥

विन्ध्यः ।

(२२१)

आचक्ष्महे तव किमद्यतनीमवस्थां
हा तस्य विन्ध्य शिखरस्य महोन्नतस्य ।
यत्रैव सप्तमुनयस्तपसा निषेदुः
सोऽयं विलासवसतिः पिशिताशनानाम् ॥

सुमेरुः ।

(२२२)

ये सन्तोषसुखप्रबुद्धमनसस्तेषामभिन्ना मृदो
ये चान्ये धनलोभसङ्कुलधियस्तेषां हि भिन्ना नृणाम् ।
इत्थं कस्य कृते कृतश्च विधिना तादृक् पदं सम्पदां
स्वात्मन्येव समाप्तहेममहिमा मेरुर्न मे रोचते ॥
(लुम्बसूनोर्विद्याधरस्य, केषाञ्चिन्मते विद्यापतेः)

हिमालयः ।

(२२३)

क्षौणी यस्य हिरण्मयी मणिमयः प्राकारशैलोच्चयः
कुञ्जः कल्पलतामयः सुरधुनीधारामयो निर्झरः ।
किं चेन्द्रादिसमस्तदिक्पतिपुरीं व्याप्नोति यत्पल्लवः
शैलः सोऽपि गिरिर्वयञ्च गिरयस्तत्रैव मे का मतिः ॥

(ख) जलाशयः ।

कूपः ।

(२२४)

गुणवानपि पूर्णोऽपि कुम्भः कूपे निमज्जति ।
तस्य भारसहो न स्याद् गुणस्य ग्राहको यदि ॥

तड़ागः ।

(२२५)

पीतं मे सकलं जलं जलनिधेश्चण्डालचण्डांशुना
गाम्भीर्यं क्व गतं क्व चाम्बुजगणास्ते मीनहंसादयः ।
सोढ़ा गाढ़तमा मया विपदियं नैतत्तु सह्यं मम
तृष्णान्धाः पथिका यदेत्य सहसा हाहारवं कुर्वते ॥

सागरः ।

(२२६)

यस्य ग्रहाद् दरिद्रा भग्नमनोरथाः प्रतिनिवर्त्तन्ते तस्य सम्पदो व्यर्थैवेत्याह :—

यद् वीचीभिः स्पृशसि गगनं यच्च पातालमूलं
रत्नैर्द्वीपयसि पयसा यत् पिधत्से धरित्रीम् ।
धिक् सर्वं तत् तव जलनिधे यद् विमुच्याऽम्बुधारा-
स्तीरे नीरग्रहणरसिकैरध्वगैरुज्झितोऽसि ॥

(गौराभिनन्दस्य)

(ग) ऋतुः ।

ग्रीष्मः ।

(२२७)

सुतप्ता सौभाग्यस्खलितवनितावद् वसुमती
विवस्वान् दुष्प्रेक्ष्यो द्रविणमदमत्तस्य मुखवत् ।
समीरो मन्थाद्रिभ्रमणफणभृत्फुत्कृतिकवत्
जगद् योगीन्द्राणां नयनमिव निस्पन्दमनिशम् ॥

वर्षा ।

(२२८)

घनतरघनवृन्दच्छादिते व्योमलोके
दिनमणिरजनीशौ नाममात्रावशेषौ ।
दिवसरजनिभेदं मन्दवाताः शशंसुः
कमलकुमुदगन्धानाहरन्तः क्रमेण ॥

शरत् ।

(२२९)

तीक्ष्णं रविस्तपति नीच इवाचिराढ्यः
शृङ्गं रुरुस्त्यजति मित्रमिवाकृतज्ञः ।
तोयं प्रसीदति मुनेरिव चित्तवृत्तिः
कामी दरिद्र इव शोषमुपैति पङ्कः ॥

हेमन्तः ।

(२३०)

वेपन्ते कपयो भृशं जडसमं गोवाजिकं ग्लायति
श्वा चुल्लीकुहरोदरं क्षणमपि प्राप्यापि नैवोज्झति ।
शीतार्त्तिव्यसनातुरः पुनरसौ दीनो जनः कूर्मवत्
स्वान्यङ्गानि शरीर एव हि निजे निह्नोतुमाकाङ्क्षति ॥
(लक्ष्मीधरस्य)

शिशिरः ।

(२३१)

(क)

कन्याप्रसूतस्य धनुःप्रसङ्गा-
दङ्गाधिकासादितविक्रमस्य ।
धनञ्जयाधीनपराक्रमस्य
हिमस्य कर्णस्य च को विशेषः ॥

(ख)

अलं हिमानीपरिदीर्णगात्रः
समापितः फाल्गुनसङ्गमेन ।
अत्यन्तमाकाङ्क्षितकृष्णवर्त्मा
भीष्मो महात्माजनि माघतुल्यः ॥

वसन्तः ।

(२३२)

(क)

पतङ्गपाकसमये पतङ्गपतिविक्रमाः ।
पतङ्गस्योदये चेलुः पतङ्गा इव वानराः ॥

(ख)

लताकुञ्जं गुञ्जन्मदवदलिपुञ्जं चपलयन्
समालिङ्गन्नङ्गं द्रुततरमनङ्गं प्रबलयन् ।
मरुन्मन्दं मन्दं दलितमरविन्दं तरलयन्
रजोवृन्दं विन्दन् किरति मकरन्दं दिशि दिशि ॥

(घ) कालविशेषः ।

प्रभात-वर्णनम् ।

(२३३)

परं प्राची पिङ्गा रसपतिरिव प्राश्य कनकं
परिम्लानश्चन्द्रो बुधजन इव ग्राम्यसदसि ।
परिक्षीणास्तारा नृपतय इवानुद्यमपरा
न राजन्ते दीपा द्रविणरहितानामिव गुणाः ॥

(भोजराजकविवर्गस्य)

सूर्य्योदय-वर्णनम् ।

(२३४)

राजीवानि विहासयन् कुमुदिनीराजिञ्च संरोदयन्
घूकालीञ्च विभाययन् निजकरैः कोकान् समुल्लासयन् ।
नक्षत्राण्यपसारयन् शशभृतः कान्तिञ्च सङ्कोचयन्
लोकालिञ्च विबोधयन् तरलयन् सूर्य्यः समुज्जृम्भते ॥

(उद्भटसागरस्य)

सूर्य्यास्तम् ।

(२२५)

सीताविरहिणा रामचन्द्रेण अस्तगामिनं सूर्य्यमवलोक्य भग्नमनसा सेतुबन्धनाशां विहाय लक्ष्मणं प्रति कथितम् :—

(क)

समग्रामादित्यप्रियकमलिनीं षट्पदहृतां
विलोक्यान्तर्मोदाद् मृदु कुमुदवृन्दं विहसति ।
रविः खिन्नः पन्था हृतनववधूनामयमिदं
निमज्जन्नम्भोधौ कलयति करैरुद्धृततरैः ॥

(ख)

समुद्रतरणे निरुत्साहं श्रीरामचन्द्रं अवलोक्य सूर्य्यास्तं प्रदर्श्य तं बोधयति लक्ष्मणः :—

समुद्विग्नानस्मानतलजलपारे गतिविधौ
विलोक्य व्यामर्षात् स्वनगतघनोर्मिं विदधतः ।
पयोधेर्गाम्भीर्य्यं कियदिति स आवेदनपरो
निमज्जन्नम्भोधौ कलयति करैरुद्धृततरैः ॥

सन्ध्या-वर्णनम् ।

(२२६)

रविरस्तं तेजः समुदयति खद्योतपटली
मरालाली मूका कलकलमुलूका विदधति ।
इदं दृष्ट्वा कष्टं परमसहमाना कमलिनी
चिरान्निद्रामुद्रामहह तनुते क्लान्तनयना ॥

चन्द्रोदय-वर्णनम् ।

(२३७)

पाथोजानि निमीलयन् कुमुदिनीजालं समुन्मीलयन्
कोकानाकुलयन् चकोरमिथुनाशंसाश्च सम्पूरयन् ।
ज्योत्स्नां कन्दलयन् तमः कवलयन् सिन्धुं समुद्वेलयन्
लोकानारमयन् धरां धवलयन् सोमः समुज्जृम्भते ॥

(उद्भटसागरस्य)

(ङ) मण्यादयः ।

मणिः ।

(२३८)

क्षितीशानां कोषान्तरतिमिरदोषक्षयकरः
फणीशानां शीर्षे प्रचुरतरशोभाशुभकरः ।
स एवाहं दैवात् तव करमुपेतो मणिवणिग्
उपेक्षाऽपेक्षा वा तव गुणपरीक्षापरिचयः ॥

शङ्खः ।

(२३९)

एकोत्पत्तौ प्रकृतिधवलौ सुन्दरौ सोमशङ्खौ
शम्भुः सोमं प्रकृतिसुभगं स्वोत्तमाङ्गेन धत्ते ।
शङ्खस्तत्र क्रकचनिकरैर्भिद्यते शङ्खकारैः
का नामान्तःप्रकृतिकुटिलो दुर्गतिं न प्रयाति ॥

स्वर्णम् ।

(२४०)

स्वर्णस्य खेदोक्तिरियम् :—

न वा ताड़नात् तापनाद्व वह्निमध्ये
न वा च्छेदनात् क्लिश्यमानोऽहमस्मि ।
सुवर्णस्य मेऽसह्यदुःखं तदेकं
यतो मां जना गुञ्जया तोलयन्ति ॥

---

(२४१)

दानपात्राणां विद्यादिगुणवत्तया विशेषमकुर्वन्तं धनवन्तं दैवस्य निर्विवेकताव्याजेन तिरस्करोति :—

(क)

धिग् दैवं निर्मलं नेत्रं कृतं कज्जलसंयुतम् ।
सच्छिद्रः समलो वक्रः कर्णः स्वर्णेन भूषितः ॥

(ख)

नायं दैवस्य दोष इति द्वाभ्यां श्लोकाभ्यां कश्चिदाह :—

दैवस्य नैव दोषोऽयं प्रत्युत मन्यते गुणः ।
रञ्जितं कज्जलैरच्चि भृङ्गालिभिरिवाम्बुजम् ॥

(ग)

विधिनैवेदमादिष्टं स्वर्ण कर्णगतं भव ।
अजानद्भिस्तदर्थन्तु तेन कर्णावलङ्कृतौ ॥

(एतौ श्रीशिवनारायणशिरोमणेः)

मेघः ।

(२४२)

सत्पात्रेभ्यो धनं दत्त्वा निर्धनस्य दातुर्दारिद्र्यमपि शोभते इत्याह :—

आसिच्य पर्वतकुलं तपनोष्मतप्तं
निर्वाप्य दावविधुराणि च काननानि ।
नानानदीनदशतानि च पूरयित्वा
रिक्तोऽसि यद् जलद सैव तवोन्नता श्रीः ॥

(२४३)

धनिनो गृहे बहुषु याचकेषु कृतार्थेषु प्रतिगतेषु तेषामेकस्तत्र तद्दानमनधिगम्य तं धनवन्तमिदमाह :—

हे धाराधर धीर नीरनिकरैरेषा रसा नीरसाऽ
शेषा पुष्करोत्करैरतिखरैरापूरि भूरि त्वया ।
एकान्तेन भवन्तमन्तरगतं स्वान्तेन सञ्चिन्तय-
न्नाश्चर्यं परिपीड़ितोऽयमभितो यच्चातकस्तृष्णया ॥

(२४४)

मेघ त्वं निजजीवनेन जगतः संतृप्तिमाप्यायसे
प्रायस्त्वत्सदृशो न कोऽपि भविता भूतोऽथवा विद्यते ।
किन्त्वेकन्त्वसमञ्जसं व्यथयते प्रज्ञावतां मानसं
यन्मण्डूकमयूरमोदनविधौ तुल्यस्तवानुग्रहः ॥

निन्दाप्रशंसा तरङ्गः ।

(क) निन्दा-तरङ्गः ।

असन्तोष-निन्दा ।

(२४५)

भोगवासनैव महतां महत्त्वं दूषयतीत्याह :—

आशालताच्छेदनमन्तरेण
भवेदनर्थो महतामवश्यम् ।
भोगप्रसक्तः क्रमशो विवस्वान्
मीनञ्च मेषञ्च वृषञ्च भुङ्क्ते ॥

(कविचन्द्रस्य)

आत्मगौरव-निन्दा ।

(२४६)

क्षुद्रा एवात्मानं श्लाघन्ते इत्याह :—

भेको वक्ति विलङ्घ्य कूपसलिलं को मे हनूमान् पुरो
गन्धर्वं हसति स्वरं खरतरं कृत्वा मुदा गर्दभः ।
खद्योतः परिदर्श्य दीधितिलवं चन्द्रप्रभां निन्दति
क्षुद्रः पश्यति नात्मनोच्चतमतां मिथ्याभिमानोद्धतः ॥

उदरपूर्त्ति-निन्दा ।

(२४७)

श्रीकृष्णस्य स्तोत्रं रचयितुमिच्छुर्वाग्देवतायाः साम्मुख्यमाधत्ते :—

मातर्नीतः परमनुचितं यत् खलानां पुरस्ता-
दस्ताशङ्कं जठरपिठरीपूर्त्तये नर्त्तितासि ।
तत् चन्तव्यं सहजसरले वत्सले वाणि कुर्य्यां
प्रायश्चित्तं गुणगणनया गोपवेषस्य विष्णोः ॥

कलिकाल-निन्दा ।

(२४८)

कलौ प्रायशो जनाः स्वधर्मे नानुरज्यन्ते इत्याह :—

न सन्ध्यां सन्धत्ते नियमितनिमाजान् न कुरुते
न वा मौञ्जीबन्धं कलयति न वा सुन्नतविधिम् ।
न रोजां जानीते व्रतमपि हरेर्नैव कुरुते
न काशी मक्का वा शिव शिव न हिन्दुर्न यवनः ॥

कुपुत्र-निन्दा ।

(२४९)

पित्रोर्नैव वचः शृणोति दिवसेऽतीते व्रजत्यालयं
विद्याभ्यासपराङ्मुखश्च नियतं दुर्बुद्धिमालम्बते ।
बन्धूनामुपदेशवाचि वदति क्रोधैकतानं वचः
साधून् निन्दति दुर्जनश्च मनुते मित्रं कुपुत्रो भुवि ॥

कुभृत्य-निन्दा ।

(२५०)

आहारे वड़वानलश्च शयने यः कुम्भकर्णायते
सन्देशे बधिरः पलायनविधौ सिंहः शृगालो रणे ।
अन्धो वस्तुनिरीक्षणेऽथ गमने खञ्जः पटुः क्रन्दने
भाग्येनैव हि लभ्यते प्रभुजनैरेवंविधः सेवकः ॥

(२५१)

आह्वानेषु गृहीतमौननियमः स्तेयव्रते दीक्षितः
पङ्गुः पर्य्यटने निरन्तरमृषाजल्पेषु पञ्चाननः ।
निद्रायां खलु कुम्भकर्णविजयी हस्ती तथा भोजने
कोलः शौचविधावयं सुकृतिनां भाग्येन भृत्यो भवेत् ॥

कुवैद्य-निन्दा ।

(२५२)

न धातोर्विज्ञानं न च परिचयो वैद्यकनये
न रोगाणां तत्त्वावगतिरपि नो वस्तुगुणधीः ।
तथाप्येते वैद्या इति तरलयन्तो जड़जना-
नसून् मृत्योर्भृत्या इव वसु हरन्ते च गदिनाम् ॥
(वेङ्कटाध्वरिणः)

कुसंसर्ग-निन्दा ।

(२५३)

दुष्टस्य सङ्गतिरनर्थपरम्पराया
हेतुः सतां भवति किं कथनीयमत्र ।
लङ्केश्वरो हरति दाशरथेः कलत्रं
प्राप्नोति बन्धनमहो किल सिन्धुरेषः ॥
(विज्जकायाः)

कृतघ्न-निन्दा ।

(२५४)

दन्तान्तःपरिलग्नदुःखदकणा निःसार्यते जिह्वया
तां हन्तुं सरलां सदोद्यमयुता दन्तास्तु हन्तानुजाः ।
आमूलान्निपतन्ति दुष्टदशना जिह्वा चिरस्थायिनी
मित्रद्रोहदुरन्तदुष्कृतफलैर्नो मुच्यते कश्चन ॥

कृपण-निन्दा ।

(२५५)

सा माता मम भारती प्रतिदिनं लक्ष्म्या विमात्रा सह
मौख्यं विदधाति सापि चपला रुष्टा गृहान्निर्गता ।
तामन्वेषयता मयात्र भवतो द्वारं प्रविष्टं मुदा
मन्ये त्वद्वचसाऽत्र नागतवती स्थानान्तरं गम्यते ॥

(२५६)

दृढ़तरनिबद्धमुष्टेः
कोषनिषण्णस्य सहजमलिनस्य ।
कृपणस्य कृपाणस्य च
केवलमाकारतो भेदः ॥

(२५७)

धनस्य सञ्चयवद् दानमपि कार्य्यमित्याह :—

दातव्यं कृतिभिर्धनं न खलु तैः सञ्चीयतां केवलं
दानं श्रीबलिकर्णविक्रमरवेः ख्यातं पृथिव्यां परम् ।
दृष्ट्वा स्वं मधु दानभोगरहितं नष्टं चिरात् सञ्चितं
निर्वेदादिव पाणिपादयुगलं घर्षन्त्यहो मक्षिकाः ॥

गृहस्थाश्रम-निन्दा ।

(२५८)

कृतदाराणां पुंसां प्रायशो बन्धुविच्छेदी भवतीत्याह :—

यस्या जन्मान्यवंशे वसतिरपि सदा दूरदेशे पुरासीत्
सैषा भूत्वा वधूटी प्रकटितविनया वेश्ममध्यं प्रविश्य ।
आजन्मप्राणतुल्यान् गुरुजनजननीसोदरानन्तरङ्गान्
दूरं कृत्वा स्वगेहात् पतिमनु रमते धिग् गृहस्थाश्रमं नः ॥

(२५९)

गृहचिन्ता हि पुरुषाणां सर्वगुणसंहारिणीत्याह :—

तावद् विद्याऽनवद्या गुणगणमहिमा शौर्य्यगाम्भीर्य्यवीर्य्यं
गेहे स्वे सर्वशान्तिः परगुणकथने वाक्पटुत्वं प्रभूतम् ।
यावत् पाकाकुलाभिः स्वगृहयुवतिभिः प्रेषितापत्यवक्त्रात्
हा बाबा नास्ति तैलं न च लवणमपीत्यादिवाचां श्रुतिर्न ॥

जामातृ-निन्दा ।

(२६०)

श्वशुरगृहचिरवासिनं जामातरं लक्ष्यीकृत्य कथयति :—

श्वशुरगृहनिवासः स्वर्गवासो धरायां
निवसति ननु कश्चिद् वासरान् पञ्चषांश्चेत् ।
तदधिकमपि तिष्ठेत् दुग्धलुब्धो विड़ाल-
स्तदधिकदिनवासे पादुकापूतघातः ॥

(२६१)

भारतं पञ्चमो वेदः सुपुत्रः सप्तमो रसः ।
दाता पञ्चदशं रत्नं जामाता दशमो ग्रहः ॥

टीकाकार-निन्दा ।

(२६२)

विविधशास्त्रेषु वैचक्षण्यं विना कस्यचिद् ग्रन्थस्य टीकाप्रणयनमुपहासाय भवतीत्याह :—

दुर्बोधं यदतीव तद् विजहति स्पष्टार्थमित्युक्तिभिः
स्पष्टार्थेऽप्यतिविस्तरं विदधति व्यर्थैः समासादिकैः ।
अस्थानेऽनुपयोगिभिश्च बहुभिर्जल्पैर्भ्रमं तन्वते
श्रोतॄणामिति वस्तुविप्लवकृतष्टीकाकृतः प्रायशः ॥

दारिद्र्य-निन्दा ।

(२६३)

कमलश्रीर्हरश्चन्द्रः पूर्णचन्द्रस्ततोऽधिकम् ।
तत् तत्र विषदृष्टिस्ते किं मातः कमलालये ॥

(उद्भटसागरस्य)

(२६४)

संसर्गं न हि कश्चिदस्य कुरुते सम्भाषणं नादरात्
प्राप्तोऽयं गृहमुत्सवेषु धनिनां सावज्ञमालोक्यते ।
दूरादेव महाजनस्य विचरत्यल्पच्छदो लज्जया
मन्ये निर्धनतां प्रकाममपरं षष्ठं महापातकम् ॥

(२६५)

पलालोपरि वस्त्रखण्डमेकं पातयित्वा निशि शयानस्य भर्तुः समीपे स्तनन्धयं प्रियुमादाय शयितुमागता पत्नी भर्तारमिदमाह :—

वासःखण्डमिदं प्रयच्छ ननु वा स्वाङ्के गृहाणार्भकं
रिक्तं भूतलमत्र नाथ भवतः पृष्ठे पलालोच्चयः ।
दम्पत्योरिति जल्पितं निशि यदा शुश्राव चौरस्तदा
लब्धं कर्पटमन्यतस्तदुपरि क्षिप्त्वा रुदन्निर्गतः ॥

(२६६)

दारिद्र्यमूलां दुरवस्थां दर्शयति :—

वृद्धोऽन्धः पतिरेष मञ्चकगतः स्थूणावशेषं गृहं
कालोऽभ्यर्णजलागमः कुशलिनी वत्सस्य वार्त्तापि नो ।
यत्नात् सञ्चिततैलबिन्दुघटिका भग्नेति पर्य्याकुला
दृष्ट्वा गर्भभरालसां निजवधूं श्वश्रूश्चिरं रोदिति ॥

(२६७)

तिस्रो भार्य्याः क्षुत्तृषाशा मयि जीवति नान्यगाः ।
तासामाशा महासाध्वी कदाचिन्मां न मुञ्चति ॥

(२६८)

वाग्वैचित्र्येण दारिद्र्यं निन्दन्नाह :—

चौरेभ्यो न भयं न दण्डपतनात् त्रासोऽपि वा भूपतेः
शङ्का नो शयने निशासु गमने दुर्गे च मार्गे स्थितौ ।
दारिद्र्यं सुखमेव केवलमहो दुःखद्वयं दुःसहं
मायान्तोऽतिथयः प्रयान्ति विमुखा निन्दन्ति च ज्ञातयः ॥

(२६९)

दरिद्रस्य विद्या विफलैव ग्रासाच्छादनार्थं भिक्षाश्रयणादित्याह :—

विद्या मे वनिता ततोऽजनि सुतैर्लज्जायशोमानकै-
र्दैन्यात् साऽनशनाऽनशत् सह सुतैर्भिक्षाऽपरा सङ्गृहा।
साऽवाध्या भजते सदैव धनिनस्तस्याश्च जातः सुतः
सोऽर्थः चेत्त्वज एव पाति सुसुखं मां किं तया विद्यया॥

(२७०)

दारिद्र्यान्मरणमपि वरमिति भङ्ग्यन्तरेणाह :—

उत्तिष्ठ क्षणमेकमुद्वह सखे दारिद्र्यभारं मम
श्रान्तस्तावदहं चिरं मरणजं सेवे त्वदीयं सुखम्।
इत्युक्तो धनवर्जितेन विदुषा सख्या श्मशाने शवो
दारिद्र्यान्मरणं परं सुखमिति ज्ञात्वेव तूष्णीं स्थितः॥

(२७१)

धनाशया धनिगृहाङ्गनं प्रविष्टस्य दौवारिकेण गलहस्तं दत्त्वा बहिष्कृतस्य कस्यचिदुक्तिरियम् :—

भस्माच्छन्नतनुः कदर्थ्यशयनात् शूली कदन्नाशनात्
तैलाभाववशात् सदा शिरसि मे केशा जटात्वं गताः।
गौरीकः स च नैव लाङ्गलवहो भार्य्या गृहे चण्डिका
प्राप्य त्वत्त इहार्धचन्द्रमधुना प्राप्तं पदं शाम्भवम्॥

(२७२)

सर्वे क्लेशबहुलैः कर्म्मभिः रामपदं प्राप्तुमभिलषन्ति दारिद्र्यन्तु मामयत्नसुलभं रामत्वं प्रापयदित्याह :—

जनस्थाने भ्रान्तं कनकमृगतृष्णान्धितधिया
वचो वैदेहीति प्रतिपदमुदश्रु प्रलपितम् ।
कृतालङ्काभर्त्तुर्वदनपरिपाटीषुरचना
मयाप्तं रामत्वं कुशलवसुता न त्वधिगता ॥
(भट्टवाचस्पतेः)

(२७३)

सुखदुःखं हि भाग्यमूलकमित्याह :—

कस्त्वं भोः कविरस्मि तत् किमु सखे क्षीणोऽस्यनाहारतो
धिग् देशं गुणिनोऽपि दुर्गतिरियं देशं न मामेव धिक् ।
पाकार्थी क्षुधितो यदैव विदधे पाकाय बुद्धिं तदा
विन्ध्ये नेन्धनमम्बुधौ न सलिलं क्षौण्यां न वा तण्डुलः ॥

(२७४)

केनचित् राजकार्य्यानुरोधेन चिरं प्रोषितं पुनः प्रत्यागतं बाणेश्वरविद्यालङ्कारमवलोक्य महाराजकृष्णचन्द्रेण पृष्टः स "प्रोषिते मलिना कृशे"ति शास्त्रनियमं स्मारयन् प्रत्युवाच :—

न भाले सिन्दूरं न च नयनयोरञ्जनरसो
न गात्रे स्नेहार्द्रं च खदिररागोऽधरपुटे ।
अवैधव्यं किञ्चित् कथयति मदम्भोरुहदृशो-
र्लुंठत्यग्रे बाहोर्विगतकलहो लोहवलयः ॥
(बाणेश्वरविद्यालङ्कारस्य)

(२७५)

दारिद्र्यात् परो रिपुर्नास्तीत्याह :—

शीलं शातयति श्रुतं शमयति प्रज्ञां निहन्ति क्रमात्
दैन्यं दीपयति क्षमां क्षपयति व्रीडां निरस्यत्यपि ।
तेजो जर्जरयत्यपास्यति मतिं विस्तारयत्यर्थितां
दारिद्र्यं पुरुषस्य किं न कुरुते वैरं परं भीषणम् ॥

(त्रिविक्रमस्य)

(२७६)

केनचित् नरपतिना नियम एष प्रचारितः यत् तस्य राज्यमध्ये कोटीश्वरं विना कश्चिदपि जनो वस्तुं न समर्थो भविष्यतीत्याकर्ण्य कश्चित् दरिद्रः कविः राजानमिदमुवाच :—

वाप्यां वाप्यालकोटिः कुपिठरजठरे मक्षिकाणाञ्च कोटिः
कोटिर्गण्डूपदानां मम गृहपटले कुन्तले यूककोटिः ।
अङ्गे विस्फोटकोठिः कटितटविलसत्कर्पटे ग्रन्थिकोटिः
एषां कोटीश्वरोऽहं कथय नृप कथं ते पुरीभागहं न ॥

(२७७)

सर्वेऽपि पुरुषकारा दैवप्रतिकूलत्वे विफलत्वमायान्तीत्याह :—

विद्या सत्कविता तथा सुजनता सेवापि च प्रार्थना
पञ्चैताः परिनिर्मिरे जनयितुं वित्तात्मजं यत्नतः ॥
व्यापारं सकलं विहाय सततं तास्वेव रक्तं मया
दुर्दैवेन दुरात्मना नरपते पञ्चैव वन्ध्याः स्त्रियः ॥

(२७८)

एकदा महाराजः कृष्णचन्द्रः बहुदिनादागतं गुप्तपल्लीग्रामनिवासिनं वाणेश्वर-विद्यालङ्कारमपृच्छत् भो महात्मन् कस्ते निलयसंवाद इति। स च वक्ष्यमाण-श्लोकेन तदुत्तरं दत्तवान् :—

दारिद्र्येण सहोदरेण सकलं तातस्य नीतं लयं
विद्यामानधनञ्च किञ्चन मया स्वोपार्ज्जितं यत्नतः ॥
तेनाद्यापि सह स्थितेन बलिना तत् सर्वमाक्रम्यते
श्रीमन्नाथ विचारणैः समुचितैस्त्वं मत्पृथक् कारय ॥

(वाणेश्वरविद्यालङ्कारस्य)

(२७९)

वर्द्धमानाधिपेन कदाचित् पृष्टः स वाणेश्वरविद्यालङ्कारमहोदयः स्वां पारिवारिकी-मवस्थां वर्णयतिस्म :—

लज्जा मानसुता ममाद्यवनिता भिक्षाऽपरा दैन्यजा
तातैश्वर्य्यविगर्विता बलवती भिक्षा प्रगल्भाऽभवत् ।
सा लज्जा निहता तयैव तनयाशोकेन मानो मृतो
भिक्षा दैन्यसुता चिरात् पतिरता नाद्यापि मां मुञ्चति ॥

(वाणेश्वरविद्यालङ्कारस्य)

(२८०)

दानार्थं कृतमानसेऽपि दातरि द्वारि दौवारिकेण प्रक्षिप्यमाणो वैयाकरणदरिद्रः श्लोकमिमं दातारं श्रावयामास :—

सर्वज्ञ त्वं वदसि बहुधा दीयतां दीयतां भो
दाधातूनां भवति सदृशं रूपमेवं चतुर्णाम् ।
द्वौ दानार्थौ भवत इतरौ पालने खण्डने च
नो जानीमः कथयतु भवान् कस्य वार्यं प्रयोगः ॥

(२८१)

कविर्वाणेश्वरविद्यालङ्कारः कस्यचित् राज्ञः समीपमुपेत्याह राजन् जात्या ब्राह्मणोऽप्यहमिदानीं कुम्भकारवृत्तिमवलम्बितवानस्मीत्युक्त्वा स्वस्य तद्वृत्तिं प्रमाणयति :—

चिन्ताचक्रे भ्रमति नियतं मन्मनोमृत्तिकेय-
मार्द्रीभूता नयनसलिलैर्भ्रस्यते दैन्यदण्डैः ।
आशाकुम्भाः कति कति कृताश्छेदिताः कर्म्मसूत्रै-
र्जात्या विप्रः पुनरहमहो कुम्भकारोऽस्मि वृत्त्या ॥

(वाणेश्वरविद्यालङ्कारस्य)

(२८२)

प्रबलवर्षासु कस्यचिद् दरिद्रस्य कवेः स्वाश्रयलाभार्थं राज्ञे निवेदनमेतत् :—

पीठाः कच्छपवत् तरन्ति सलिले सम्मार्जनी मीनवद्
दर्वी सर्पविचेष्टितानि कुरुते सन्त्रासयन्ती शिशून् ।
शूर्पाच्छादितमस्तका च गृहिणी भित्तिः प्रपातोन्मुखी
रात्रौ पूर्णतडागसन्निभमभूद् राजन् मदीयं गृहम् ॥

(निद्रादरिद्रस्य)

दुर्जन-निन्दा ।

(२८३)

स्वार्थो हि पुरुषाणां रुचिभेदेन तान् उत्तममध्यमाधमतां नयतीत्याह :—

ते ते सत्पुरुषाः परार्थघटकाः स्वार्थस्य ये बाधया
मध्यस्थाः परकीयकार्य्यकुशलाः स्वार्थाविरोधेन ये ।
तेऽमी मानुषराक्षसाः परहितं यैः स्वार्थतो हन्यते
ये तद् घ्नन्ति निरर्थकं परहितं ते के न जानीमहे ॥

(२८४)

खला हि विषकुम्भाः पयोमुखा इति रेफसादृश्येन प्रमाणयति :—

सम्मुखवर्त्ती पिशुनो
भवति हि नीचगो नियतं यः।
स पुनः पृष्ठनिविष्टो
रेफ इवायं शिरःस्थायी॥

(२८५)

परस्परस्य भक्तिविमं चिरमेलनमपि वियोजयितुं कर्णेजपानामलौकिकी शक्तिरित्याह :—

दर्वीदीर्घविघट्टनेन शिखिना भूयोऽपि सन्तापने-
र्विश्लेषः पयसः कदापि हविषः केनापि नोद्भावितः।
मन्थानः पुनरेव विस्तृतमुखो भूयो भ्रमन्नन्तरे
पार्थक्यं विदधाति तादृगनयोरैक्यं यथा नो पुनः॥

(२८६)

काव्ये भव्यतमेऽपि विज्ञनिवहैरास्वाद्यमाने मुहु-
र्दोषान्वेषणमेव मत्सरजुषां नैसर्गिको दुर्ग्रहः।
कासारेऽपि विकासिपङ्कजचये खेलन्मराले पुनः
क्रौञ्चश्चञ्चुपुटेन कुञ्चितवपुः शम्बूकमन्विष्यति॥

(२८७)

दातुं कृतयत्नस्यापि दातुर्मतिविपर्ययं कुर्वन्तं खलं प्रति कस्यचिद् याचकस्योक्तिरियम् :—

प्रायः स्वभावमलिनो महतां समीपे
तिष्ठन् खलः प्रकुरुतेऽर्थिजनोपघातम्।

शीतार्दितैः सकललोकसुखावहोऽपि
धूमे स्थिते नहि सुखेन निषेव्यतेऽग्निः ॥
(निविड़नितम्बायाः)

द्विपत्नीक-निन्दा ।

(२८८)

बिलाद् बहिर्बिलस्यान्तः स्थितमार्जारसर्पयोः ।
आखुर्मध्य इवाभाति द्विभार्यो दुर्बलो नरः ॥

धनि-निन्दा ।

(२८९)

कलौ भाग्यवशादेक एव धनस्वामी अवस्थाभेदेन पञ्चोपास्यदेवतात्मको भवतीत्याह :—

दूरादर्थिनमाकलय्य भजते सद्यो विरूपाक्षतां
सङ्गे किञ्च विरोचनत्वमथ संस्थाने नृसिंहाकृतिम् ।
पाण्डित्योक्तिषु वक्रतुण्डरचनं दाने त्वपर्णात्मता-
मेकः पञ्चसुरात्मकः प्रभुरहो भाग्यैः कलौ लभ्यते ॥

(२९०)

पुनःपुनर्गुरुभारोद्वहनाय प्रभुणादिष्टो भृत्यः स्वगतं विलपति :—

शेषे भवभराक्रान्ते श्रिया शेते सुखं हरिः ।
लक्ष्मीवन्तो न जानन्ति दुःसहां परवेदनाम् ॥
(शीलाभट्टारिकायाः)

(२८१)

निद्राति स्नाति भुङ्क्ते चरति कचभरं शोधयत्यन्तराऽऽस्ते
दीव्यत्यक्षैर्न चायं गदितुमवसरः सायमायाहि याहि ।
इत्युद्दण्डैः प्रभूणामसकृदधिकृतैर्वारितान् द्वारि दीना-
नस्मान् पश्याऽब्धिकन्ये सरसिरुहरुचामन्तरङ्गैरपाङ्गैः ॥
(प्रेमचन्द्रतर्कवागीशस्य)

निर्गुण-निन्दा ।

(२८२)

छेदश्चम्पकचूतचन्दनवने रक्षा करीरद्रुमे
हिंसा हंसमयूरकोकिलकुले काकेषु बद्धादरः ।
मातङ्गेन खरक्रयः सुसमता कर्पूरकार्पासयो-
रेषा यत्र विचारणा गुणिगणे देशाय तस्मै नमः ॥

निर्लज्ज-निन्दा ।

(२८३)

कामः को मे पुरस्तादिति वदति मुहुः पेचको मेचकाभः
संख्ये सिंहेन हेलां प्रथयति नितरां जीर्णबालः शृगालः ।
उड्डीयोड्डीय काकोऽप्युपहसति गरुत्मन्तमप्यन्तराले
लज्जाभीतिच्युतानां वद वदनभृतां वाचि को बाधकः स्यात् ॥

नीच-निन्दा ।

(२९४)

स्वभावतो नीचमना जनो बहुसम्पद्भिसम्पन्नोऽपि स्वीयं नीचत्वं न परिहरतीत्याह :—

स्वभावेन हि यः क्षुद्रो ह्यादिगुणान्वितोऽपि सः ।
न जहाति निजं भावं संख्याङ्के लाङ्गतिर्यथा ॥

पुत्र-निन्दा ।

(२९५)

पुत्रः स्यादिति दुःखितः सति सुते तस्यामये दुःखित-
स्तद्दुःखादिकमार्जने तदनयात् तन्मूर्खतादुःखितः ।
जातश्चेत् सगुणोऽथ तन्मृतिभयं मृत्यौ पिता दुःखितः
पुत्रव्याजमुपागतो रिपुरयं मा कस्यचिज्जायताम् ॥

(भर्तृहरिः)

भिक्षा-निन्दा ।

(२९६)

द्वारे द्वारे परेषामविरलमटति द्वारपालैः करालै-
रालोक्यं वाहतो यः स्वनति गणयति स्वापमानं न किञ्चित् ।
चन्तुं शक्नोति नान्यं स्वसदृशमितरागारमप्याश्रयन्तं
श्राम्यत्यात्मोदरार्थे स कथमिह शुना नो समो भिक्षुकोऽसौ ॥

(दामोदरगुप्तस्य)

(२९७)

यांच्‌ञासन्निपातज्वरयोः साम्यं दर्शयति :—

सप्रस्वेदः पुलकपरुषः संभ्रमो सप्रकम्पः
सान्तर्दाहः प्रशिथिलधृतिः सास्यशोषः सतर्षः ।
संवृत्तो यो गुरुरपि लघुर्हन्त तैस्तैः प्रकारै-
र्यांच्‌ञाशब्दः स्पृशति पदवीं सन्निपातज्वरस्य ॥

मद्यपान-निन्दा ।

(२९८)

यत् पीत्वा गुरवेऽपि कुप्यति विना हेतोस्तथा रोदिति
भ्रान्तिं याति करोति साहसमपि व्याधेर्भवत्यास्पदम् ।
कौपीनञ्च जहाति लोकपुरतोऽप्युन्मत्तवच्चेष्टते
तल्लज्जापरिपन्थि मोहजनकं मद्यं न पेयं नरैः ॥

(शङ्कुकस्य)

मूर्ख-निन्दा ।

(२९९)

मूर्खस्य अष्ट दोषान् विवृणोति :—

मूर्खत्वं सुलभं भजस्व कुमते मूर्खस्य चाष्टौ गुणा
निश्चिन्तो बहुभोजकोऽतिमुखरो रात्रिन्दिवं स्वप्नभाक् ।
कार्य्याकार्य्यविचारणाविरहितो मानापमाने समः
प्रायेणामयवर्जितो दृढवपुर्मूर्खः सुखं जीवति ॥

लोभ-निन्दा ।

(३००)

लोभपरतन्त्रा हि जीवनाशमप्यपहाय किं न कुर्वन्तीत्याह :—

यद् दुर्गामटवीमटन्ति विकटं क्रामन्ति देशान्तरं
गाहन्ते गहनं समुद्रमथनक्लेशां कृषिं कुर्वते ।
सेवन्ते कृपणं पतिं गजघटासंघट्टदुःसञ्चरं
गच्छन्ति प्रधनं धनान्धितधियस्तल्लोभविस्फूर्जितम् ॥

(ख) प्रशंसा-तरङ्गः ।

उद्भटकविता-प्रशंसा ।

(३०१)

रसाय तस्मै नम उद्भटस्य
शीतायते हृत् पृषताऽपि यस्य ।
प्रफुल्लभावं सुजनस्य चास्य-
माविश्यमेवैति सुदुर्जनस्य ॥

(उद्भटसागरस्य)

(३०२)

खिन्नं स्वेन समुद्भटेन सरसं स्वीयं मनो जायते
श्रुत्वाऽन्यस्य समुद्भटं खलु मनः श्रोतुं पुनर्वाञ्छति।
अज्ञान् ज्ञानवतोऽपि येन वशगान् कर्त्तुं समर्थः सुधीः
कार्य्यस्तस्य समुद्भटस्य मनुजैरत्यादरात् संग्रहः॥

(भट्टोद्भटस्य)

(३०३)

अस्थाने पतितः स उद्भटरसो वाणोप्रियः कल्पते
न्यक्काराय घृणाचयाय नितरां तापाय पापाय च।
स्थाने स व्ययितः परं प्रभवति प्रख्यातये भूतये
चेतोनिर्वृतये परोपकृतये शेषे शिवस्याप्तये॥

(पण्डितजगन्नाथस्य)

(३०४)

किं हारैः किमु कङ्कणैः किमसमैः कर्णावतंसैरलं
केयूरैर्मणिकुण्डलैरलमलं साडम्बरैरम्बरैः।
पुंसामेकमखण्डितं पुनरिदं मन्यामहे मण्डनं
यन्निष्पीडितपार्वणामृतकरस्यन्दोपमा उद्भटाः॥

(वल्लभदेवस्य)

उद्यम-प्रशंसा ।

(२०५)

भ्रमन् स्वं पूरयेद् वैद्यो भ्रमन् स्वं पूरयेद् द्विजः ।
भ्रमन् स्वं पूरयेत् तर्कुर्भ्रमन् स्वं न पूरयेत् ॥
(कविचन्द्रस्य)

गुणज्ञ-प्रशंसा ।

(२०६)

गुणपरिचयेन तदास्वादो यस्य कस्यापि न घटते इत्याह :—

स गृह्णाति गुणी गुणं गुणिगणाद् गृह्णाति तं नागुणः
दूरारण्यनिकेतनोऽपि मधुपः प्राप्यैव तत् पङ्कजम् ।
माध्वीकं परिषिवतेऽस्य नितरामाकण्ठमुत्कण्ठितो
भेकस्तन्निकटस्थितोऽपि नियतं खादत्यहो कर्दमम् ॥

गृहि-प्रशंसा ।

(२०७)

पुत्रः सच्चरितः सती प्रियतमा स्वामी प्रसादोन्मुखः
स्निग्धं मित्रमवञ्चकः परिजनो निःक्लेशलेशं मनः ।
आकारो मधुरः स्थिरश्च विभवो विद्यावदातं मुखं
तुष्टे विष्टपकष्टहारिणि हरौ संप्राप्यते गेहिना ॥

छात्त्र-प्रशंसा ।

(२०८)

छात्त्रेषु कः प्रशस्यः को वा निन्द्यस्तदाह :—

यश्छात्त्रः श्रुतिमात्रमर्थमखिलं गृह्णाति स श्लाघ्यतां
यो वेत्ति द्विरुदाहृतं कृतफलं तत्रापि वक्तुर्वचः ।
यस्तु स्पष्टमनेकशोऽप्यभिहितां नावैति लेखार्थतां
धिक् तं तत्पितरौ धिगेव नितरां धिक् तद्गुरुं गर्दभम् ॥

(हरिभट्टस्य)

तेजस्वि-प्रशंसा ।

(२०९)

स्वपौरुषमहायशाः समयदोषदुःस्थोऽपि सन्
अनल्पविषयाशयो लघुषु नेहते कर्मसु ।
महीधरसहोदरद्विरदयूथविद्रावणो
बुभुक्षुरपि केशरी न खलु मूषिकं धावति ॥

दया-प्रशंसा ।

(२१०)

दया परं धर्ममसुत्र चात्र
दयावतां न स्वपरप्रभेदः ।
दुःखं परेषामवलोकते चेद्
मत्वाऽऽत्मनस्तद् व्यथते दयालुः ॥

(श्रीशिवनारायणशिरोमणेः)

दातृ-प्रशंसा ।

(२११)

दरिद्रदुःखदूरीकरणे देवानां वैमुख्यं दर्शयन् दानशीलान् महाजनान् स्तौति :—

रुद्रोऽद्रिं जलधिं हरिर्दिविषदो दूरं विहाय: श्रिता
भोगीन्द्राः प्रबला अपि प्रथमतः पातालमूले स्थिताः ।
लीना पद्मवने सरोजसदना मन्येऽर्थिसार्थाद् भिया
दीनोद्धारपरायणाः कलियुगे धन्या उदारा जनाः ॥

(शङ्कुकस्य)

(२१२)

एकोऽयं पृथिवीपतिः क्षितितले लक्षाधिका भिक्षुकाः
किं कस्मै वितरिष्यतीति किमहो एतद् वृथा चिन्त्यते ।
आस्ते किं प्रतियाचकं सुरतरुः प्रत्यम्बुजं किं रविः
किं वाऽस्ति प्रतिचातकं प्रतिलतागुल्मञ्च धाराधरः ॥

दाम्पत्यप्रेम-प्रशंसा ।

(२१३)

प्रशंसन्ति च निन्दन्ति निगमा यद् गृहाश्रमम् ।
दाम्पत्यसाम्यवैषम्यभेदादेतद्व्यवस्थितिः ॥

(नीलकण्ठदीक्षितस्य)

धन-प्रशंसा ।

(२१४)

धनसम्बन्धादेव पुंसां सम्मानभागित्वमित्याह :—

लक्ष्मीश इति गोविन्दः श्रीदमित्रमितीश्वरः ।
हिरण्यगर्भ इत्येव ब्रह्मापि बहु मानितः ॥

(नीलकण्ठदीक्षितस्य)

धनि-प्रशंसा ।

(२१५)

धनगुणयोर्धनमेव गरीय इत्याह :—

धिगस्त्वेषां विद्यां धिगपि कवितां धिक् सुजनतां
वयो रूपं धिग् धिग् धिगपि च कुलं दुर्गतिमताम् ।
असौ जीयादेकः सकलगुणहीनोऽपि धनवान्
बहिर्यस्य द्वारे तृणलवसमाः सन्ति गुणिनः ॥

धर्म-प्रशंसा ।

(२१६)

मानुष्ये सति दुर्लभा पुरुषता पुंस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यता नययुता विद्यावतोऽर्थज्ञता ।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्म्मे मतिर्दुर्लभा ॥

(क्षेमेन्द्रस्य)

(३१७)

धर्म्मः शर्म परत्र चेह च नृणां धर्म्मोऽन्धकारे रविः
सर्वापत्प्रशमक्षमः सुमनसां धर्म्मो निधिर्मूल्यवान् ।
धर्म्मो बन्धुरबान्धवे पृथुपथे धर्म्मो सुहृन्निश्चलः
संसारोरुमरुस्थले सुरतरुर्नास्त्येव धर्म्मात् परः ।

(क्षेमेन्द्रस्य)

पण्डित-प्रशंसा ।

(३१८)

पण्डितस्य अष्ट गुणान् विवृणोति :—

दम्भं नोद्वहते न निन्दति परान् नो भाषते निष्ठुरं
प्रोक्तं केनचिदप्रियञ्च सहते क्रोधञ्च नालम्बते ।
ज्ञात्वा शास्त्रमपि प्रभूतमनिशं सन्तिष्ठते मूकवद्
दोषांश्छादयते गुणान् वितनुते चाष्टौ गुणाः पण्डिते ॥

(३१९)

उपादाता यावन्न भवति गुणानां गुणवता-
मसत्कल्पास्तावत्त्रिभुवनमहार्घा अपि गुणाः ।
अपि प्राग् दैत्यारेर्हृदयवसतेः कौस्तुभमणेः
स किं नासीदब्धौ स्तुतिरपि किमस्य क्वचिदभूत् ॥

परोपकार-प्रशंसा ।

(३२०)

सद्भिः स्वोपार्जितधनैः परोपकारः कर्त्तव्य इति दृष्टान्तेन द्रढ़यति रत्नाकर इति :—

रत्नाकरः किं कुरुते स्वरत्नै-
विंन्ध्याचलः किं करिभिः करोति ।
श्रीखण्डखण्डैर्मलयाचलः किं
परोपकाराय सतां विभूतिः ॥

प्रेम-प्रशंसा ।

(३२१)

इन्दुः कुत्र च सागरः क्व च रविः पद्माकरः क्व स्थितः
क्वाऽभ्रा वा क्व मयूरपंक्तिरमला क्वाऽलिः क्व वा मालती ।
मन्दाध्वक्रमराजहंसनिचयः क्वाऽसौ क्व वा मानसं
यो यस्याऽभिमतः स तस्य निकटे दूरेऽपि वा वल्लभः ॥

(३२२)

दोषः कश्चिद् यदि निजजने सम्भवेद् दैवयोगाद्
नासौ ग्राह्यो भवति महतां रीतिरेषास्ति लोके ।
भृङ्गो दैवाद् यदि कुमुदिनीं गच्छति भ्रान्तचेताः
पद्मिन्या स प्रियमधुकरस्त्यज्यते किं कदाचित् ॥

ब्रह्मतेजः-प्रशंसा ।

(३२३)

अल्पीयसैव पयसा यः कुम्भः परिपूर्य्यते ।
पपौ तदुद्भवः सिन्धुं गुरुत्वाद् ब्रह्मतेजसः ॥

भक्ति-प्रशंसा ।

(३२४)

नो मुक्त्यै स्पृहयामि नाथ विभवैः कार्य्यं न सांसारिकैः
किन्त्वायोज्य करौ पुनः पुनरिदं त्वामीशमभ्यर्थये ।
स्वप्ने जागरणे स्थितौ विचलने दुःखे सुखे मन्दिरे
कान्तारे निशि वासरे च सततं भक्तिर्ममास्तु त्वयि ॥

(वाग्भटस्य)

मनस्वि-प्रशंसा ।

(३२५)

धनलोभेन परेषां सेवाहस्त्यपेक्षया व्याधिना तत्करणाचमत्वमपि वरमित्याह :—

पङ्गो वन्द्यस्त्वमसि न गृहं यासि योऽर्थी परेषां
धन्योऽन्ध त्वं धनमदवतां नेक्षसे यन्मुखानि ।
श्लाघ्यो मूक त्वमपि कृपणं स्तौषि नार्थाशया यः
स्तोतव्यस्त्वं बधिर न गिरं यः खलानां शृणोषि ॥

महत्त्व-प्रशंसा ।

(३२६)

स्वभावत उन्नतचेता जनो बहुविभवयुक्तोऽपि निजमौन्नत्यं न कदाचित् परिहरतीत्याह:—

महतां प्रकृतिः सैव वर्द्धितानां परैरपि ।
न जहाति निजं भावं संख्यासु लाकृतिर्यथा ॥
(श्रीशिवनारायणशिरोमणेः

मौन-प्रशंसा ।

(३२७)

वाचालतां निन्दन् मौनं स्तौति :—

मौखर्य्यं लघुताहेतुर्मौनमुन्नतिकारणम् ।
मुखरं नूपुरं पादे कण्ठे हारो विराजते ॥

(३२८)

अमुष्मिन्नुद्याने विहगखल एष प्रतिपलं
विलोलः काकोलः क्वणति खलु यावत् कटुतरम् ।
सखे तावत् कीर दृढ़य हृदि वाचञ्च सकलां
न मौनेन न्यूनो भवति गुणभाजां गुणगणः ॥

विद्या-प्रशंसा ।

(३२९)

विद्या नाम नरस्य कीर्त्तिरतुला भाग्यक्षये चाश्रयो
धेनुः कामदुघा रतिश्च विरहे नेत्रं तृतीयं च सा ।
सत्कारायतनं कुलस्य महिमा रत्नैर्विना भूषणं
तस्मादन्यमुपेक्ष्य सर्वसुखदं विद्याधिकारं कुरु ॥

स्वरूपनिरूपण-प्रशंसा ।

(३३०)

एवं वहवो जना दृश्यन्ते ये तावत् स्थानविशेषवासिनः स्थानाख्यया निन्दन्ति । तन्न युक्तमित्याह :—

पुंसः स्वरूपपरिदर्शनमेव कार्यं
तज्जन्मभूमिगुणदोषकथा वृथैव ।
रत्नाकरोत्थमभिनन्दति को विषं वा
को वा न पद्ममभिनन्दति पङ्कजातम् ॥

सहाय-प्रशंसा ।

(३३१)

सद्वंशजातं गुणकोटिनम्रं
धनुः कथं क्षत्रियवामहस्ते ।
शरः परप्राणहरोऽप्यसव्ये
सतपक्षयोगादधमो गरीयान् ॥

(२३२)

दुर्बलोऽपि सहायवत्तथा सबलदुःसाध्यं साधयतीत्याह :—

अत्युच्चशृङ्गोपरि तुङ्गवृक्षात्
काकोऽपि पक्वफलमालभते सपक्षः ।
सिंहो बली द्विरदवर्य्यबलाधिकोऽपि
सीदत्यहो तरुतले स हि पक्षहीनः ॥

सुकवि-प्रशंसा ।

(२३३)

धीरं निक्षिपते पदं हि परितः शब्दं समुद्वीक्षते
नानार्थाहरणञ्च वाञ्छति मुदाऽलङ्कारमाकर्षति ।
आदत्ते विमलं सुवर्णनिचयं धत्ते रसान्तर्गतं
दोषान्वेषणतत्परो विजयते सच्चोरवत् सत्कविः ॥

(२३४)

अर्थान् केचिदुपासते कृपणवत् केचित्त्वलङ्कुर्वते
नष्टावत् खलु धातुवादिन इवोद्बध्नन्ति केचिद् रसान् ।
अर्थालङ्कृतिसद्रसद्रवमुचां वाचां प्रशस्तिस्पृशां
कर्त्तारः कवयो भवन्ति कतिचित् पुण्यैरगण्यैरिह ॥

(राघवचैतन्यस्य)

(२२५)

नव व्याकरणाङ्गमेति पितरं न भ्रातरं तार्किकं
दूरात् सङ्कुचितेव गच्छति पुनश्चाण्डालवत् छान्दसात् ।
मीमांसानिपुणं नपुंसकमिति ज्ञात्वा निरस्तादरा
काव्यालङ्करणज्ञमेत्य कविताकान्ता वृणीते स्वयम् ॥
(क्षेमेन्द्रस्य)

सुजन-प्रशंसा ।

(२२६)

दृश्यन्ते भुवि भूरिनिम्बतरवः कुत्रापि ते चन्दनाः
पाषाणैः परिपूरिता वसुमती वज्रो मणिर्दुर्लभः ।
श्रूयन्ते करटारवाश्च नियतं चैत्रे कुहूकूजितं
तन्मन्ये खलसङ्कुलं जगदिदं द्वित्राः क्षितौ सज्जनाः ॥

(२२७)

घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥

सुपुत्र-प्रशंसा ।

(२३८)

कुम्भः परिमितमम्भः
पिबत्यसौ कुम्भसम्भवोऽम्भोधिम् ।
अतिक्रामति सुपुत्रः
कश्चिज्जनकं निजेन चरित्रेण ॥
(भट्टभल्लटस्य)

(२३९)

पात्रं न तापयति नैव मलं प्रसूते
स्नेहं न संहरति नैव गुणान् क्षिणोति ।
द्रव्यावसानसमये चलतां न धत्ते
सत्पुत्र एष कुलसद्मनि कोऽपि दीपः ॥

(२४०)

अस्तंगते भास्वति नान्धकारान्
शनैश्चरो हन्ति विधौ बुधश्च ।
पितुर्गुणैर्न प्रतिभाति पुत्रो
गुणान्वितो यः स्वगुणेन भाति ॥

सुवंश-प्रशंसा ।

(३४१)

गुणप्रयुक्ताः परमर्मभेदिनः
शरा इवावंशभवा भवन्ति हि ।
तथाविधा ये च विशुद्धवंशजा
व्रजन्ति चापा इव तेऽतिनम्रताम् ॥

सुसंसर्ग-प्रशंसा ।

(३४२)

मलयाद्रेः समीपस्थो विटपी चन्दनायते ।
कृतवासः समं सद्भिर्दुर्जनः सज्जनायते ॥
(रत्नाकरस्य)

(३४३)

दूरीकरोति कुमतिं विमलीकरोति
चेतश्चिरन्तनमघं चुलुकीकरोति ।
भूतेषु किञ्च करुणां बहुलीकरोति
सङ्गः सतां किमु न मङ्गलमातनोति ॥
(अर्गटस्य)

स्थानमहिम-प्रशंसा ।

(३४४)

बकस्य चन्द्राद् गुणाधिक्ये सत्यपि स चन्द्रवत् किं नाद्रियते इति शङ्कां निरस्यन्नाह :—

उभौ पक्षौ शुक्लौ भुवि वियति चाव्याहतगतिः
सदा मौनं भुङ्क्ते वसति सकलस्थाणुशिरसि ।
बके चान्द्रस्तुल्यो गुणसमुदयः कश्चिदधिको
गुणाः स्थाने मान्या न च पुनरमी स्थानरहिताः ॥

(वररुचेः)

रस-तरङ्गः ।

(१) शृङ्गार-रसः ।

(३४५)

वक्षःस्थलीवदनवामशरीरभागैः
पुष्यन्ति यस्य विभुतां पुरुषास्त्रयोऽपि ।
सोऽयं जगत्त्रितयजित्वरचापधारी
मारः परान् प्रहरतीति न विस्मयाय ॥

---

(२) वीर-रसः ।

(३४६)

पीतोऽब्धे कलसोद्भवेन मुनिना ध्वस्तोऽसि देवासुरै-
राबद्धोऽसि च राघवेण मृदुना शाखामृगैर्लङ्घितः ।
धिक् त्वां नाम तवाम्बुधिः सलिलधिः पानीयधिस्तोयधिः
पाथोधिर्जलधिः पयोधिरुदधिर्वारांनिधिर्वारिधिः ॥

(३४७)

लक्ष्मणो लघुसन्धानो दूरपातो च राघवः ।
कर्णो दृढप्रहारी च पार्थस्यैते त्रयो गुणाः ॥

(क्षेमेन्द्रस्य)

---

(३) करुण-रसः ।

(३४८)

व्याधस्य जालनिबद्धा काचिन्मृगी सकरुणं ब्रवीति :—

आदाय मांसमखिलं स्तनवर्जमङ्गान्-
मां मुञ्च वागुरिक यासि कुरु प्रसादम् ।
सीदन्ति शष्पकवलग्रहणानभिज्ञा
मन्मार्गवीक्षणपराः शिशवो मदीयाः ॥

(मुक्तापीडस्य)

(३४९)

महापण्डितस्य वाणभट्टस्य मृत्युसमये खेदोक्तिरियम् :—

ध्वस्तः काव्योरुमेरुः कविविपणिमहारत्नराशिर्विशीर्णः
शुष्कं शब्दौघसिन्धुः प्रलयमुपगतो वाक्यमाणिक्यकोषः ।
दिव्योक्तीनां निधानं निधनमुपगतं हा हता दिव्यवाणी
वाणे गीर्वाणवाणीप्रणयिनि विधिना प्रापिते दीर्घनिद्राम् ॥

(वाणभट्टस्य)

---

(४) अद्भुत-रसः ।

(३५०)

कस्मै किं कथनीयं
कस्य मनःप्रत्ययो भवति ।
रमयति गोपवधूटी
कुञ्जकुटीरे परं ब्रह्म ॥

---

(५) हास्य-रसः ।

(३५१)

कमले कमला शेते हरः शेते हिमालये ।
क्षीराब्धौ च हरिः शेते मन्ये मत्कुणशङ्कया ॥

---

(६) भयानक-रसः ।

(३५२)

दीप्तत्तुद्वेगयोगाद् वदनलहलहल्लम्बजिह्वाग्रलीढ़-
ब्रह्माण्डक्षौद्रबिन्दुप्रबलतरभवज्जाठराग्निस्फुलिङ्गाम् ।
कालीं कङ्कालशेषामतुलगलचलन्मुण्डमालाकराली-
गुञ्जासंवादिनेत्रामजिननिवसनां नौमि पाशासिहस्ताम् ॥

(शार्ङ्गधरस्य)

---

(७) बीभत्स-रसः ।

(३५३)

उत्कृत्य ज्वलितां शवात् कथमपि प्रेताशनः पैशितीं
पेशीमग्निमयीं निगीर्य्य सहसा दन्दह्यमानोदरः ।
धावत्युत्प्लवते मुहुर्निपतति प्रोत्तिष्ठति प्रेक्षते
विष्वक् क्रोशति संपिनष्टि जठरं मुष्ट्या चलन्मस्तकः ॥

---

(८) रौद्र-रसः ।

(३५४)

रे धृष्टा धार्त्तराष्ट्राः प्रबलभुजवहृत्ताण्डवाः पाण्डवा रे
रे वार्ष्णेयाः सकृष्णाः शृणुत मम वचो यद् ब्रवीम्यूर्ध्वबाहुः ।
एतस्योत्खातबाहोर्द्रुपदनृपसुताताताप्रिनः पापिनोऽहं
पाता हृच्छोणितानां प्रभवति यदि वः कोऽपि वा तं स पातु ॥

---

(८) शान्त-रसः ।

अनित्यता ।

(२५५)

सेवध्वं विबुधास्तमन्धकरिपुं मा क्लिश्यतान्यश्रुते
यस्मादत्र परत्र च त्रिजगति त्राता स एकः शिवः ।
आयाते नियतेर्वशात् सुविषमे कालात् करालाद् भये
कुत्र व्याकरणं क्व तर्ककलहः काव्यश्रमः क्वापि वा ॥

(राजानकलोलकस्य)

अनुतापः ।

(२५६)

कविर्वार्द्धकं निन्दति :—

गात्रं संकुचितं गतिर्विगलिता दन्ताः समुन्मूलिता
दृष्टिर्नश्यति रूपमेव चलितं वक्त्रञ्च लालाकुलम् ।
आलापं न करोति बान्धवजनः पत्नी न शुश्रूषते
हा कष्टं स्थविरः पिताऽपि बहुभिः पुत्रैरवज्ञायते ॥

कर्मफलम् ।

(२५७)

लक्ष्मीनाथं वहति गरुडस्तस्य भक्ष्यो भुजङ्ग
उच्चा वोढा धनपतिसखं सोऽपि घासं जघास ।
हंसो भुङ्क्ते विसकिशलयं ब्रह्मणो वाहकोऽपि
सेवाभिर्न त्त्वयति महतां कर्मणो दुर्विपाकः ॥

(३५८)

लब्धं जन्म सह श्रिया स्वयमपि त्रैलोक्यशोभाकरः
स्थित्यर्थं शितिकण्ठमप्युपगतस्तेनापि शीर्षे धृतः।
वृद्धिं शीतकरस्तथापि न गतः क्षीणः परं प्रत्युत
प्रायः प्राक्तनमेव कर्म्म बलवत् कस्योपकुर्वीत कः॥

(पण्डितश्रीवकस्य)

काल-चरित्रम्।

(३५९)

पृथ्वीतलेऽस्मिन् यावतीया जीवाः सर्व्वथा सर्व्वदैव आहारान्वेषणतत्परा न कदाचित् मृत्युचिन्तां कुर्वन्तीत्याह :—

भेको धावति तञ्च धावति फणी सर्पं शिखी धावति
व्याधो धावति केकिनं विधिवशाद् व्याघ्रोऽपि तं धावति।
स्वस्वाहारविहारसाधनविधौ सर्व्वे जना व्याकुलाः
कालस्तिष्ठति पृष्ठतः कचधरः केनापि नो दृश्यते॥

दैवबलम्।

(३६०)

(क)

दाता बलिः प्रार्थयिता मुरारि-
दानं मही वाजिमखे मखे च।
दातुः फलं बन्धनमेव जातं
नमोऽस्तु दैवाय यथेष्टकर्त्रे॥

(क्षेमेन्द्रस्य)

(ख)

योऽयं जनापकरणाय सृजत्युपायं
तेनैव तस्य नियमेन भवेद् विनाशः ।
धूमं प्रसौति नयनान्धकरं यमग्नि-
र्भूत्वाऽम्बुदः स शमयेत् सलिलैस्तमेव ॥
(कह्लणस्य)

प्रार्थना ।

(३६१)

मुक्तिकामिनः कस्यचिदुक्तिरियम् :—

सुव्यक्ता वेदभागैश्वरमदुरितजध्वंसरूपा हि मुक्ति-
स्तत्तातस्तत्त्वबोधो ननु जनकतया तस्य दौत्यं न युक्तम् ।
भक्ते त्वं तत्त्वबोधस्य हि निजजननी धर्मतः सापि नप्त्री
गद्यैः पद्यैर्वचोभिः परिहसनविधौ त्वं हि वक्तुं समर्था ॥
(अगंटस्य)

(३६२)

गङ्गातीरवासी स्थविरः कोऽपि धनवान् कदाचित् केनचिदात्मीयेन "कथं भवान् शरीररक्षार्थं ग्रासाच्छादनादिषु न यतते" इत्येवं पृष्टस्तं प्रत्युवाच स्वरिति :—

स्वःसिन्धुतीरेऽघविघातवीरे
वहत्समीरे करलभ्यनीरे ।
वसन् कुटीरे परिधाय चीरे
करोम्यधीरे न रुचिं शरीरे ॥

विषय-तृष्णा ।

(३६३)

यस्या बीजमहङ्कृतिर्गुरुतरं मूलं ममेति ग्रहो
भोगस्य स्मृतिरङ्कुरः सुतसुताज्ञात्यादयः पल्लवाः ।
स्कन्धो दारपरिग्रहः परिभवः पुष्पं फलं दुर्गतिः
सा मे ब्रह्मविभावनापरशुना तृष्णालता लूयताम् ॥

(३६४)

समाप्य विषयान् सर्वान् यः कर्णे भक्तिमिच्छति ।
सागरे शान्तकल्लोले स्नातुमिच्छुः स दुर्मतिः ॥

वैराग्यम् ।

(३६५)

भोगे रोगभयं सुखे क्षयभयं वित्तेऽग्निभूभृद्भयं
दास्ये स्वामिभयं गुणे खलभयं वंशे कुयोषिद्भयम् ।
माने म्लानिभयं जये रिपुभयं काये कृतान्ताद् भयं
सर्वं नाम भवे भवेद् भयमयं वैराग्यमेवाभयम् ॥

(क्षेमेन्द्रस्य)

विविध-तरङ्गः ।

प्रथम-बिन्दुः ।

प्राचीन-शिलालिपिः ।

(१) पुरीधामस्थ-जगन्नाथमन्दिरम् ।

(३६६)

(क)

पुरीधामस्थजगन्नाथदेवमन्दिरस्य निर्म्माणकालमाह :—

शकाब्दे रन्ध्रशुभ्रांशुरूपनक्षत्रनायके ।
प्रासादः कारितोऽनङ्गभीमदेवेन धीमता ॥

(ख)

वासुदेवरथकृते गङ्गवंशानुचरिते ग्रन्थे नायिकां प्रति अनङ्गसुन्दरनायकेन कथितोऽयं श्लोकः पूर्व्वोक्तस्य श्लोकस्यैव समर्थकः :—

अङ्कक्षौणिशशाङ्केन्दुसम्मिते शकवत्सरे ।
अनङ्गभीमदेवेन प्रासादः श्रीपतेः कृतः ॥

---

(२) काशीधामस्थ-भवानीश्वरमन्दिरम् ।

(३६७)

वाराणसीस्थितस्य भवानीश्वरमन्दिरस्य निर्म्माणं प्रातःस्मरणीयया नाटोरराज्ञा भवान्या कारितमित्याह :—

धरामरेन्द्रवारेन्द्ररामकान्तस्य भामिनी ।
निर्ममे श्रीभवानी श्रीभवानीश्वरमन्दिरम् ॥

---

(३) गङ्गावासग्रामस्थ-हरिहरमन्दिरम् ।

(३६८)

हरिहरभेदज्ञानोपहतचेतसां नरांणां भ्रान्तिं निराकर्तुं महाराजकृष्णचन्द्रेण गङ्गावासे हरिहरमूर्त्तिस्थापनं कृतमित्याह :—

गङ्गावासे विधिश्रुत्यनुगतसुकृतच्छोणिपाले शकेऽस्मिन्
श्रीयुक्तो वाजपेयी भुवि विदितमहाराजराजेन्द्रदेवः ।
भेत्तुं भ्रान्तिं मुरारित्रिपुरहरभिदामज्जतां पामराणा-
मद्वैतब्रह्मरूपं हरिहरमुमयाऽस्थापयल्लीलया च ॥

द्वितीय-बिन्दुः ।

(१) अपह्नुति-कविता ।

(३६९)

या पाणिग्रहलालिता सुसरला तन्वी सुवंशोद्भवा
गौरो स्पर्शसुखावहा गुणवती नित्यं मनोहारिणी ।
सा केनापि हृता तया विरहितो गन्तुं न शक्तोऽस्म्यहं
हे भिक्षो तव कामिनी न हि न हि प्राणप्रिया यष्टिका ॥

(निशानारायणस्य)

---

(२) कूट-कविता ।

(३७०)

(क)

अव्याद् वः करणोरणो रणरणो राणोरणो रावणो
हृत्वा येन रमा रमा रम रमा रामा रमा सा रमा ।
स श्रीमानदयोदयो दयदयो दायो दयोवेदयो
विष्णुर्जिष्णुरभोरभो रभरभो राभो रभोसौरभोः ॥

(पदच्छेदे श्लोकस्यास्य आकृतिरियम्)

(ख)

९ ८ १० ११ १२ १३ ४
अव्याद् वः करणोरणः रणरणः राणः अरणः रावणः
३ १ १७ १८ १९ २० १६ २१
हृत्वा येन रं आर मारं अरमा रामा रमासारमा ।
६ २२ २३ ५ १४ २ २४
स श्रीमानदयोदयः दयदयः दायः अत् अयः वेदयः
७ २५ २६ २७ १५
विष्णुः जिष्णुः अभीरभीरभरभीराभीः अभीसौः अभीः ॥

———

(३) गणित-कविता ।

(३७१)

कश्चिद् गणितशास्त्रसागरपारदर्शी महापुरुषः श्लोकेनानेन पाठका यथेच्छं गणयित्वापि यथा विंशत्यधिकशतवर्षं (१२० वत्सरञ्चापि) परमायुर्लभन्ते तथा सुकौशलमिदं दर्शयति :—

इष्टं कार्त्तिकदर्शनेन गुणितं रुद्रेण युक्तं तथा
ब्रह्मास्यप्रहतं जलाधिपतिना यच्छेषितं तत् पुनः ।
वेदाङ्गेन हृतं तदब्दनिचयं विश्वेशभक्तिव्रता-
स्तिष्ठेयुर्भुवि पाठका इति सदा विप्राशुतोषार्थना ॥

(स्यार् श्रीयुताशुतोषमुखोपाध्यायसरस्वत्याः)

(३७२)

कश्चिदनेन श्लोकेन भिक्टोरिया महाराज्ञ्या मृत्युखृष्टीयाब्दं कौशलेनाविष्करोति :—

इष्टं खाभ्रखसंयुतं खखयमभ्यस्तं खवेदशान्वितं
खाकाशाशुगभाजितं द्विगुणितं यच्छेषितं दृग्हतम् ।
खाकाशाब्धिसमन्वितं शशियुतं यत् तत्र खृष्टीयके
वर्षेऽस्मान् समपास्य नाकमगमद् भिक्टोरिया भूतलात् ॥

(हरकुमारशास्त्रिणः)

(३७३)

श्लोकेऽत्र पूर्वार्द्धे परार्द्धे च पृथग्रीत्या १२०संख्याया आविष्कारणार्थं कौशलद्वयं वर्त्तते :—

इष्टं वाणगुणं सुखेन सहितं खाङ्काहतं यत् फलं
तत् तष्टं शरभूधरैश्च गुणितं पञ्चेन संवत्सरम् ।
वेष्टं नागहतं युतं शशभृता निघ्नं शरघ्नैः शिवै-
स्तष्टं व्योमयुगैर्गजेन गुणितं हे पाठका जीवत ॥

(उद्भटसागरस्य)

---

(४) चित्र-कविता ।

(३७४)

श्लोकोऽयं अनुलोमविलोमपाठे यथा एकविध एव भवति तथा कौशलं दर्शयति :—

वेदापन्ने स मग्ने रचितनिजरुगुच्छेदयत्नेऽरमेरे
देवासक्तोऽमुदच्चो बलदमनयदस्तोदटुर्गासवासे ।
सेवासर्गादुदस्तो दयनमदलवच्चोदमुक्तो सवादे
रेमे रत्नेऽयदच्छे गुरुजनितचिरक्ते मसन्ने ऽपदावे ॥

(रुद्रटस्य)

---

(५) प्रहेलिका-कविता ।

(३७५)

कः कर्णारिपिता किमिच्छति जनः किं स्तोकृतं विष्णुना
को जानाति परेङ्गितं विषमगुः कुत्रास्ति वा कामिनाम् ।
सीता कस्य वधूः प्रियः किमु हरेर्वज्ज्वरः कफे को नृणां
तत्प्रत्युत्तरमध्यमाचरमहामन्त्रो मुखे राजताम् ॥

(अर्भकस्य)

(उत्तरं—"सरस्वति नमस्तुभ्यम्")

(३७६)

सर्वस्वापहरो न तस्करवरो रक्तो न रक्ताशनः
सर्पो नैव विलेशयोऽखिलनिशाचारी न भूतोऽपि च ।
अन्तर्धानपटुर्न सिद्धपुरुषो नाप्याशुगो मारुत-
स्तीक्ष्णास्यो न तु सायकस्तमिह ये जानन्ति ते पण्डिताः ॥

(अर्भकस्य)

(उत्तरं—"मत्कुणः" छारपोका इति भाषा)

---

(६) समस्यापूरण-कविता ।

(३७७)

समस्या—"अष्टम्याः परतस्तिथिर्न नवमी सा पौर्णमासी किल ।"

सायं सन्धिमहोत्सवे बलिवटारक्तोत्कटास्वादनात्
सौहित्येन धराधराङ्गभुवि सोद्गारं क्षिपन्त्यां शिरः ।
चूड़ाचन्द्रनभःस्थलेन्दुमिलने नीरन्ध्रतासंघटाद्
"अष्टम्याः परतस्तिथिर्न नवमी सा पौर्णमासी किल" ॥

(कालिदासस्य)

(३७८)

समस्या—"कुर्वाते कुरुते करोति कुरुतः कुर्वन्त्यलं कुर्वते ।"

द्वारि यस्य सदा समीरवरुणौ संमार्ज्जनं पावकः
पाकं शीतगुरातपत्ररचनां दस्रौ प्रतीहारताम् ।
देवा दास्यविधिञ्च हास्यमपरे धन्यः स लङ्केश्वरः
"कुर्वाते कुरुते करोति कुरुतः कुर्वन्त्यलं कुर्वते ॥"

(३७९)

समस्या—"पतिवक्त्रं न पश्यति ।"

चतुर्थीर्भाद्रमासस्य चन्द्रचूड़स्य कामिनी ।
दिनद्वयं वर्षमध्ये "पतिवक्त्रं न पश्यति" ॥

(३८०)

समस्या—"ब्राह्मणस्य महत् पापं सन्ध्यावन्दनकर्मभिः ।"

परोपकारसद्धर्म्मरोधिपरापकारजम् ।
"ब्राह्मणस्य महत् पापं सन्ध्यावन्दनकर्म्मभिः ॥"

(उद्भटसागरस्य)

(३८१)

समस्या—"चन्द्रोदयं वाञ्छति चक्रवाकी।"

शत्रौ दुरन्ते परिभूयमाणे
न कस्य हर्षः समुदेति चित्ते।
भूत्वा तवाच्छादितमाशुतोष
"चन्द्रोदयं वाञ्छति चक्रवाकी"॥

(उद्भटसागरस्य)

तृतीय-बिन्दुः ।

कुम्भः ।

(३८२)

स्वकण्ठमापीड्य दृढं यथेष्टं
निपत्य कूपादुपनीय वारि।
प्राणान् परेषामवतीह कुम्भः
परोपकाराय सतां प्रयत्नः॥

(३८३)

गुणयुक्तोऽप्यधो याति रिक्तः कूपे घटो यथा।
पूर्णो गुणविहीनोऽपि जनैः शिरसि धार्य्यते॥

छत्त्रम् ।

(३८४)

कस्त्वां शिरसि निदध्यात् को वा तवादरं विधत्ते।
छत्त्र स्वयमपि तप्तं परतापस्त्वेन्न वारयसि॥

तमाखुः ।

(३८५)

विडौजाः पुरा पृष्टवान् पद्मयोनिं
धरित्रीतले सारभूतं किमस्ति ।
चतुर्भिर्मुखैरित्यवोचद् विरिञ्चि-
स्तमाखुस्तमाखुस्तमाखुस्तमाखुः ॥

तुलादण्डः ।

(३८६)

प्राप्य प्रमाणपदवीं को नामास्ते तुलेऽवलेपस्ते ।
नयसि गरिष्ठमधस्तात् तदितरमुच्चैस्तरां कुरुषे ॥

(अमरुकस्य)

नस्यम् ।

(३८७)

अब्धिं गोष्पदवत् पविं यवसवत् सूर्यञ्च खद्योतवद्
मेरुं मृत्कणवद् दवं तुहिनवद् भूमीपतिं भृत्यवत् ।
चिन्तारत्नचयं शिलाशकलवद् देहं निजं भारवद्
भक्ताः पश्यति यस्य तद् विजयतां नस्यं परब्रह्मवत् ॥

(उद्भटसागरस्य)

प्रदीपः ।

(३८८)

रे रे दीप तिरस्कृताखिलतमःस्तोमारिवर्गस्य ते
रात्रौ गूढ़निजाङ्गपातिशलभाघातैन किं पौरुषम् ।
तत् कर्म्माचर येन तावकयशो भूयात् प्रभाते पुन-
र्न स्नेहो न च सा दशा नहि परं ज्योतिः पुनः स्थास्यति ॥

मध्यस्थः ।

(३८९)

विशेषं विविच्य मध्यस्थो निर्णेतव्यः। सत्यपि नानुपे गुणराशौ प्रकृतिलघुश्चेत् कदाप्यसौ न निर्णेयः। अन्यथा परिणतौ विपत्तिरेव। तत्सूत्रधारस्तमुदाहृत्य कविरुद्रटेव प्रमाणयति :—

प्रकृतिलघौ मध्यस्थे
गुणिनि शुचावपि न विश्वासः।
बोधयति वेधकालं
भासितरङ्गो हि मीनस्य ॥

मूर्ख-पण्डित-पार्थक्यम् ।

(३८०)

शब्दायते श्रुतिकठोरमलं जलेन
हीनो घटोऽर्द्धसलिलोऽपि च रौति घोरम् ।
पूर्णोऽरवो भवति यत् तदयं विशेषो
विद्यावतोऽल्पविदुषः खलु वालिशस्य ॥
(शीलाभट्टारिकायाः)

साधारण-नीतिः ।

(३८१)

पण्डिते बहुविद्ये च स्त्रीजने च विभूषिते ।
भोजने व्यञ्जनाढ्ये च को रसो गोरसं विना ॥

(३८२)

द्वे कुर्य्याद् द्वे न कुर्य्याच्च सन्देहे समुपस्थिते ।
कुर्य्याद् मूत्रपुरीषे द्वे न कुर्य्याद् गमनाशने ॥

(३८३)

भुक्तोपविशतस्तुन्दं शयानस्य च पुष्टता ।
आयुश्चंक्रममाणस्य मृत्युर्धावति धावतः ॥

सुजन-दुर्जन-पार्थक्यम् ।

(३९४)

पनसचूतकुन्दाभा उत्तममध्यमाधमाः ।
फलं पुष्पं फलं पुष्पं कर्म्म वाक् कर्म्म वागपि ॥

(विकटनितम्बायाः)

(३९५)

आरम्भगुर्वी क्षयिणी क्रमेण
लघ्वी पुरा वृद्धिमती च पश्चात् ।
दिनस्य पूर्वार्द्धपरार्द्धयोः सा
छायेव मैत्री खलसज्जनानाम् ॥

(वाचस्पतेः)

(३९६)

गुणायन्ते दोषाः सुजनवदने दुर्जनमुखे
गुणा दोषायन्ते तदिदमपि नो विस्मयपदम् ।
यथा मेघः क्षारं पिबति कुरुते वारि मधुरं
फणी क्षीरं पीत्वा वमति गरलं दुःसहतरम् ॥

(३९७)

उत्कृष्टमध्यमनिकृष्टजनेषु मैत्री
यद्वच्छिलासु सिकतासु जलेषु लेखा ।
वैरं क्रमादधममध्यमसज्जनेषु
यद्वच्छिलासु सिकतासु जलेषु लेखा ॥

———

स्वभावाख्यानम् ।

(३९८)

असाधुः साधुर्वा भवति खलु जात्यैव पुरुषो
न सङ्गाद् दौर्जन्यं न च सुजनता कस्यचिदपि ।
प्ररूढ़े संसर्गे मणिभुजगयोर्जन्मजनिते
मणिर्नाहेर्दोषान् स्पृशति न च सर्पो मणिगुणान् ॥

(३९९)

काकः पद्मवने रतिं न कुरुते हंसो न कूपोदके
मूर्खः पण्डितसङ्गमे न रमते विद्वान् न मूर्खे जने ।
दुष्टः सेवति नो कदापि सुजनं शिष्टो न दुष्टं जनं
या यस्य प्रकृतिः स्वभावजनिता सा त्यज्यते न क्वचित् ॥

स्वर्णकारः ।

(४००)

हे हेमकार परदुःखविचारमूढ़
किं मां मुहुः क्षिपसि वारशतानि वह्नौ ।
सन्दीपिते मयि सुवर्णगुणातिरेको
लाभः परं तव मुखे खलु भस्मपातः ॥

(अमरुकस्य)

परिशिष्टम् ।

उद्भट-सागरः ।

तृतीय-प्रवाहः ।

टिप्पनी ।

(१) शिखी—अग्निः । पाशी—वरुणः । पायोधिः—समुद्रः । पतगः—पक्षी । विश्वरूपः—विश्वमेव रूपं यस्येति बहुव्रीहिः ।

(२) सिद्धः—देवयोनिविशेषः । सत्त्वानुकम्पोद्यतः—सत्त्वगुणप्रधाना अनुकम्पा सत्त्वानुकम्पा स्वार्थनिरपेक्षा दया इत्यर्थः, सा उद्यता उदिता यस्मात् सः । गुणगणैः—रजःसत्त्वतमोभिः । संस्कृतः—सृष्टिस्थितिप्रलयकार्य्येषु ब्रह्मविष्णुरुद्ररूपतया निर्म्मितः प्रकटित इत्यर्थः । स्वयं तटस्थोऽपि सृष्ट्यादिकार्य्येषु सत्त्वादिगुणैः सह सम्पृक्त इति यावत् ।

(३) इह भवोदन्वति भवरूपसमुद्रे यत् ब्रह्म वस्तु कर्णधारः तदेव ब्रह्म सम्प्रति इदानीं गिरो वचसः मनसश्च .विषयीकुरु । चक्षुरविषयत्वात् केवलं वाङ्मनसयोर्विषयं कुरु इत्यर्थः । अत्र हेतुमाह । कीदृशं निष्परोपाधि नास्ति परस्त्वत् शरीरादि उपाधि-र्यस्य तत्तथा विशुद्धचैतन्यस्वरूपमित्यर्थः । अतएव सुदुष्प्रापम् । ननु तदा कुत्र तत् प्राप्यमित्यत आह अवनिपर्य्यन्तेष्वपि सर्वतोभावेन पृथिवीव्यापकं सर्वत्रैवास्ति इत्यर्थः । (पक्षे) यत् यत्नवान् सन् इह मदुक्तौ कर्णधारो भव कर्णं पातय । तत्—सूत्रम् । गिः, ओ मनसोऽपि विषयीकुरु । उत्, अनु, अति, निर्, परा, उप, अधि, सु, दुर्, प्र, अप, अव, नि, परि, अभि, वि, आ, अपि, सम्, प्रति गिः—अत्र ओ इत्यव्ययं सम्बोधन-सूचकम् । एते विंशतिर्गिंसंज्ञाः स्युः ।

(५) माधवः—मायाः लक्ष्म्याः धवः पतिः । सपत्नी लक्ष्मीश्च हरेः प्रिया अभिमता । तस्मिन्नेव—तस्मिन् स्वामिन्येव । स्थिरा—तमेव सेवते इत्यर्थः ।

(६) दूना—दुःखिता । मत्सुतगणाः—विद्वांसो जनाः । पद्मासुतस्य—लक्ष्मी-पुत्रस्य धनिनः इत्यर्थः । आधिनिवारणाय—मनोदुःखमोचनाय ।

(७) अचय्यं—अक्षयम्। सर्वसाफल्यमूलं—सर्व्वं साफल्यं धर्म्मार्थकाममोक्ष-रूपफलभागित्वं तस्य मूलम्। भावः—देवविषया राजविषया च रतिः। जनिः—जन्म।

(८) दर्शयते—आत्मानमिति शेषः। कुटिला हि स्वस्वामिनोऽनुरागमनेऽपु नेच्छन्ति, तथापि भक्तमात्मानं दर्शयते इत्युक्त्या तमिति तच्छब्दवाच्यस्य नितरां भक्त-वात्सल्यं दर्शितमिति भावः।

(९) भक्तिप्रह्वादीनि विशेषणानि नेत्रपक्षे तनुपक्षे च पर्य्यायक्रमेण द्विवचनैक-वचनान्तानि। प्रह्वः—नम्रः आसक्त इत्यर्थः। समाधिनिरतैः—ध्यानपरायणैः। नीते-हितप्राप्तये—(नेत्रपक्षे) नीते प्रापिते, हितप्राप्तये; (तनुपक्षे) नीता ईहितप्राप्तये अभीष्टलाभाय। लावण्यानां सौन्दर्य्याणां एकौ मुख्यौ महानिधी प्रशस्ताधारौ; (पक्षे) महानिधिः रेफपरत्वात् सन्धौ महानिधी। रसिकतामित्यादि—राधिकानयनद्वयमेव हरेर्नयनयोस्तनोश्च रसं वेत्तीति भावः।

(१०) केन—केन उपचारेण। अर्च्चयेत्—अर्च्चयितुं शक्नुयात्, न केनापीत्यर्थः। तस्मात् मननादिकमेव श्रेय इति भावः।

(११) सामानाधिकरण्यम्—एकाधिकरणवृत्तित्वं, तच्च विष्णुर्विश्वम्भर इत्युक्तौ विष्णुत्वविश्वम्भरत्वयोस्तुल्याधिकरणवृत्तित्वं प्रतीयते। परन्तु विश्वान्तर्गतस्यापि दीनस्य मम भरणाभावात् स सम्बन्धस्त्वयि न घटते। एतेन तव लज्जितत्वमुचितमेव। अन्वयं—सम्बन्धम्। उरीकृत्य—स्वीकृत्य। जनार्द्दनो भवसि—अभिनवजनार्द्दनोऽसीत्यर्थः। तथाच तव जनार्द्दनत्वं हि जनानामसुरविशेषाणामर्द्दनेनैव, न तु शरणागतानां मादृशानामिति भावः।

(१२) प्रकृतिमुखरा—प्रकृत्या स्वभावतः मुखरा वाचाला सरस्वतीत्यर्थः। चञ्चला—लक्ष्मीः। मन्मथः—मदनः। शेषः—अनन्तनागः। दारुभूतः—काष्ठमयः।

(१३) कम्पं—कम्पनम्; (पक्षे) वरुणम्, कं जलं पातीत्यलुक् समासः। गुरुं—प्रबलं; (पक्षे) बृहस्पतिम्। विषादं—दुःखं; (पक्षे) विषप्राशिनं शिवम्। बलभिदं—शक्तिक्षयकरं; (पक्षे) इन्द्रम्। संजृम्भं—सम्यग् जृम्भणं; (पक्षे) सम्यग् जृम्भा यस्य स तम्। श्वसनं—निश्वासं; (पक्षे) पवनम्। उद्धरयं—प्रबलवेगम्। लोकमाता—लक्ष्मीः। श्लोकेऽत्र चित्रलेखावृत्तम्।

(१४) गजभुक्तकपित्थवत्—गजेन कपित्थान्तर्गतचुद्रकीटेन भुक्तं खादितं यत् कपित्थफलं तद्वत्। "कपित्थान्तर्गतः कीटो गज इत्यभिधीयते"—इत्युत्पलमाला।

(१५) (ख) चुद्रः—कृपणः। हीनाचरः—मूर्खः। सखि—हे सरस्वति।

(१६) वल्लभः—स्वामी कृष्णः। अन्येन—भृगुमुनिना। वैरिणी—सरस्वती। गेहं—आलयं पद्ममित्यर्थः। छेदयन्ति—छेदं खण्डं कुर्व्वन्तीति छेदिनामधातो रूपम्। उमेति स्त्रीनामनिर्देशः कोपहेतुरिति बोध्यम्।

(१९) भूतिः—जन्म। पणः—हरधनुर्भङ्गरूपशुल्कः।

(२०) सम्भ्रमं—हर्षभयादिजनितमावेगम्। तत्—काठिन्यमित्यर्थः। चौणी—पृथिवी। चितिरुहः—वृचः। आविन्दति—सम्यग् लभते।

(२१) रघूणां कुलपतिः—सूर्य्यः। माता—पृथिवी इत्यर्थः। प्राणाधीशः—रामचन्द्रः। विधौ—भाग्ये। वामे—प्रतिकूले। कामं—यथेष्टम्। प्रसरति—अत्र "भवति किम्" इत्यपि पाठान्तरम्।

(२२) "द्रवति च हिमरश्मावुद्गते चन्द्रकान्तः"—इत्युत्तरचरिते। पाणिग्रहे—विवाहे; (पचे) अङ्गुल्या धारणे।

(२३) अविश्वस्तैः—अविश्वासिभिः। प्राणाधिकपरित्यागाद् अविश्वसता।

(२४) चित्यादिपञ्चभूतघटितोऽयं श्लोकः। चतुर्थजः—चतुर्थभूतमरुत्पुत्रः। पञ्चमगः—पञ्चमभूतव्योमविहारी। प्रथमसम्भवाम्—प्रथमभूतचितिजां सीतामित्यर्थः। तृतीयम्—तृतीयभूतं अग्निमित्यर्थः। द्वितीयम्—द्वितीयभूतं जलं सागरमित्यर्थः।

(२५) कर्पूरेति—कर्पूराक्तस्तं कर्पूरमिश्रं यत् भस्म तेन अचिता व्याप्ता सकल-तनुः सर्व्वशरीरं यस्य सः। रुद्रमुद्रासमुद्रः—रुद्रस्य शिवस्य या मुद्राः शिवोचितव्यापार-चिह्नादिकं ताभिः समुद्रः तच्चिह्नधारीत्यर्थः। मायायोगी—कपटयोगिवेशधारी। रघुरमणेति—रघुरमणस्य रामचन्द्रस्य पुरस्य गृहस्य प्राङ्गणे।

(२६) चेलाञ्चले—वस्त्रप्रान्ते। नाथ—हे रामचन्द्र। योषा—नारी। तपस्वी—मम पतिः गौतममुनिः।

(२७) कलसीङ्गवधर्मपत्नीं—अगस्त्यरमणीं लोपामुद्रामित्यर्थः। चुलुकिताम्बु-

निधिः—चुलुकितः गण्डूषीकृत्योज्झितः अम्बुनिधिर्येन स तस्य अगस्त्यस्य इति शेषः। उक्तञ्च—"निपीतकालकूटस्य हरस्येवाहिखेलनम्" इति।

(२९) व्रजवासिवारिजदृशां—पद्माचीणां गोपीनाम्। पाञ्चालजायाः—द्रौपद्याः।

(३०) मातः—हे यशोदे। मन्थानकं—मन्थनदण्डं। ईश्वरः—शिवः। सरभसं—सौत्सुक्यं।

(३२) मुरहर—श्रीकृष्ण। एधः—काष्ठं तृणं वा। कृशानुः—अग्निः।

(३३) सद्वंशजं—सुरलोकसम्भूतवंशनिर्मितत्वात्। गुणः—मौर्वी, उपचिकीर्षादिरित्यपि। धनुः—हरशरासनम्। निर्गुणः—मौर्वीरहितः, दयादाक्षिण्यादिहीनश्च। सच्छिद्रः—सदोष इत्यपि। कुवंशजः—कौ पृथिव्यां यो वंशो वेणुस्तज्जातः, कुत्सितकुलसम्भूतश्च।

(३५) आभीरकन्याप्रियगुणकथने—गोपतनयानां मनोहरगुणावलीकीर्त्तने। श्रीकृष्णलीलेति—श्रीकृष्णस्य लीलाविलासश्रवणे।

(३६) शस्याय—शस्यं कोमलतृणं भक्षयितुम्। न स्पन्दते—किञ्चिदपि न चलति। संहतिः—समूहः। कुरङ्गनयनानेत्राम्बुभिः—हरिणलोचनानां गोपाङ्गनानां नेत्रजलैः।

(३७) अमला—निर्मला। प्रसूनमाला—पुष्पमाला। सुलभा—अव्यवहारादित्यर्थः। प्रोषितभर्तृकाणां तथा नियमात्। नलिनदलं—पद्मपत्रम्। दुरापं—दुर्लभं गोपीविरहतापशान्त्यर्थं अधिकचयनात्।

(३८) सुषमिणी—सुषमा परमा शोभा तद्वती। आवालिनी—आलवालविशिष्टा। "स्यादालवालमावालमावापोऽथ नदी सरित्"—इत्यमरः।

(३९) निगमः—वेदः। मृगितं—अन्विष्टम्। कृष्ण एव परंब्रह्मेति भावः।

(४०) भवता—उद्धवेन। प्रयाणसमये—मथुरायात्राकाले। आशालता—श्रीकृष्णस्य प्रत्यानयनस्याशा तद्रूपा लता। त्वयैव मम हृदि कृष्णप्रत्यागमनाशा जनिता इति भावः। विज्ञातं—अस्माभिरिति शेषः। फलिता—फलिष्यति। माधवदूत—श्रीकृष्णप्रेरितदूत हे उद्धव इत्यर्थः।

(४१) मांसलांशः—परिपुष्टः। पटयति—दीप्तिमन्तं करोति।

(४२) कोकिलकुले—पिकसमूहे। उज्ज्वलकलनादं—मनोहरमधुरस्वरं यथा

तथा कूजति सति इत्यन्वयः । जैमिनिरिति—जैमिनिनामोच्चारणादेव वज्रभयस्य निराकृतिः प्रसिद्धा । गरुड़ेति—गरुड़नामोच्चारणात् सर्पभयस्यापि तथा ।

(४३) सुरञ्जनभूतः—शोभनरञ्जनद्रव्यभूतः । निरञ्जनः—परब्रह्मस्वरूपः श्रीकृष्णः ।

(४४) अलिन्दे—बहिर्द्वारप्रकोष्ठे ।

(४५) सुकृतचैत्यवृन्दानि—तीर्थस्थानानि । शक्रः—इन्द्रः ।

(४६) ज्येष्ठे—पञ्चसु पतिषु इति शेषः, युधिष्ठिरे । पतिश्वशुरता—श्वशुरत्वन्तु, "ज्येष्ठभ्राता समः पितु" रिति शास्त्रात् । अनुजे—सहदेवे । वितयं—पतित्वं श्वशुरत्वं देवरत्वञ्च ।

(४७) शल्कसीम्नि—शल्कं—आँइष् इति भाषा, शल्करूपप्रान्तभागे । दितिसुताधीशः—हिरण्यकशिपुः । रोदसी—द्यावापृथिव्यौ । ध्याने—परब्रह्मचिन्तने । विश्वं—ब्रह्माण्डं, विश्वस्य मिथ्याभूतत्वात् । असौ—खड्गे । अलीयतेति सर्व्वत्रान्वेति । दशावतारवर्णनमेतत् ।

(४८) स्थाणुः—शिवः ; (पक्षे) शाखापत्रादिशून्यः वृक्षः । मूलेन हीनः—अनादिः ; (पक्षे) मूलशून्यः । अपर्णा—पार्वती ; (पक्षे) पत्ररहिता । विशाखः—कार्त्तिकेयः ; (पक्षे) शाखारहितः । परैरनैशः उपनीतं दत्तं कुसुमं यस्मै तादृशः ।

(४९) शिवायां—दुर्गायाम् । कीकसौघैः—अस्थिनिचयैः ।

(५०) आखुम्—उन्दुरम् । क्रौञ्चपतेः—कार्त्तिकेयस्य । कलानाथम्—चन्द्रम् । निर्विण्णः—संसारविरक्तः ।

(५१) षड़ास्यः—कार्त्तिकेयः । इतरः—अपरतनयः । वर्त्तनं—जीविकानिर्वाहः ।

(५२) जीवनं—जीविकानिर्वाहोपायः । सद्म—गृहम् । गुरुणा—पुरोहितेन ।

(५४) जगदम्ब—जगन्मातः । त्र्यम्बकः—त्रिलोचनः शिवः । भावः—देवविषया रतिः ।

(५५) अतुलनिर्वृतिं—अनुपमसुखम् । उज्झति—त्यजति ।

(५६) सुरतटिनीव्यतिकरमरणेऽपि—सुरतटिनी गङ्गा तस्याः व्यतिकरः सम्पर्कस्तेन मरणेऽपि । गङ्गाधरस्य मम शिरसि गङ्गा वर्त्तते, तस्यां सतस्य हरस्य पुनर्हरत्वापत्तौ न काचिद्द विक्रतिः ।

(५७) अपर्णां—पत्रशून्यां लतामिति शेषः ; (पक्षे) दुर्गाम्। रोगनाशिनीं—व्याधिविनाशिनीम् ; (पक्षे) त्रितापक्षयकारिणीम्। शूली—शूलग्रस्तः ; (पक्षे) शिवः।

(५८) वामा—सुन्दरी। पशुपतीत्यादि—पशुपतिनयनयोः आ ईषत् कीकरः आलोकः अपाङ्गदृष्टिः तं कामयते या सा। कैवल्योल्लाससीमा—मुक्तिलाभस्य परमोपायरूपा। भवेत्यादि—भवगहनगतानां संसारारण्यनिवासिनां क्लेशनाशी प्रणामो यस्याः सा। कान्तकामा—कान्तस्य पत्युः कामाः सर्व्वाभीष्टानि यस्याः सा, सर्व्वथा पतिसेवापरायणेत्यर्थः।

(५९) हे जननि अभ्रान्ता श्रुतिः तव नेत्रकर्णौ नास्तीति वदति, तस्मात् त्वया मम दुःखं न दृष्टं अतिकातरवचनञ्च न श्रुतम्। इत्थं सर्व्वं श्रुतिवाक्यं यदि मय्येव प्रमाणीकरोषि, तर्हि त्वं निस्तारिणी इत्यपि श्रुतिवाक्यात् त्वं मां नूनमेव संसारसागरात् तारयिष्यसीति मे परमो विश्वास इत्यस्य श्लोकस्य निर्गलितार्थः।

(६०) तले—तलदेशे। धातुः—ब्रह्मणः। रूपं—रूपविशिष्टं पादाम्बुजमित्यस्य विशेषणम्। अर्शआदित्वादः एवं परत्रापि। त्रिगुणमयि – रजःसत्त्वतमोगुणात्मिके। भजन्ते—सेवन्ते, सेवार्थं तत्तत्स्थानेषु तेषां ब्रह्मादीनामाश्रयणात् तेषां तलादिस्थानानां तत्तद्रूपवैशिष्ट्यमिति भावः।

(६१) दुर्गेत्यादि—विषमसंसारसागरतरङ्गसमुद्भावितभयभ्रान्तजननिवेदितवाक्यम्। देयदयितं—दातव्यवस्तुषु यत् प्रियं तत्। मा गाः—न आगच्छ। मूका—निर्वाकसीति शेषः। कथं मां भद्राभद्रं किञ्चिदपि न ब्रवीषीत्यर्थः।

(६२) परमोत्कर्षं चरणस्येति शेषः। तं—केशचयम्।

(६४) स्वं—स्वकीयम्। शवे—शवरूपधारिणि। या कदाचिद् यस्य निन्दामाकर्ण्य प्राणांस्तत्याज, सैव तस्य वक्षसि पदं निदधे, अहो किमद्भुतमिति।

(६६) जनुरन्तं—पुनर्जन्मविनाशकम्। मनुं—मन्त्रम्। चतुर्बाहुं—विष्णुम्। चतुरास्यं—ब्रह्माणम्। काञ्चीं—मेखलाम्। विष्णुत्वविरिञ्चित्वप्राप्तिहेतू वर्णितौ। शवत्वप्राप्तिहेतुस्तु भजन्तं तव पदमित्युक्त्या पदं सेवमानः शिवो भवतीत्युक्तं "पदस्पर्शमात्राच्छवोऽभून्महेशः" इति प्रसिद्धेः।

(६७) मुनिना—जह्नुना। सेव्यापि—उपास्यापि। सेवकोपपदगा—उपासकस्य भगीरथस्य नामधारिणी भागीरथीत्यर्थः।

(६९) दीर्घसम्बन्धात्—गङ्गातीरवासिनामस्माकमाजन्मनस्तस्याः सेवासम्बन्धात्। पक्षे नराकारं निराकारञ्चं त्वुभयत्र दीर्घस्वरसंयोगात्। वयन्तु गङ्गोपासनामेव ब्रह्मोपासनां मन्यामहे इति भावः। नाराकारां नीराकारां वा—जलरूपिणीं गङ्गामित्यर्थः। "नारस्तर्णकनीरयोः"—मेदिनी।

(७०) त्रिदोषनाशाय—त्रयो दोषाः आध्यात्मिक आधिदैविक आधिभौतिकाश्च एतेषां नाशाय; (पक्षे) वायुपित्तादिनाशार्थम्। चतुर्दोषं—दोषचतुष्टययुक्तम्; (पक्षे) चतुर्बाहुं विष्णुम्। चत्वारः दोषा दोषश्च यस्य तादृशम्। विकत्थसे—सुखदा मोक्षदेत्यादिनामभिः श्लाघां करोषि।

(७१) अतिजवेन—निरतिशयवेगेन। इह—त्रिवेण्याम्।

(७२) सुरहर—हे श्रीकृष्ण। महानदी—गङ्गा। "विष्णुपादोद्भवा गङ्गा" इति शास्त्रम्।

(७३) प्रमथपतितां—शिवत्वम्। त्रिभुवनेति—त्रिभुवनजनानां त्राणाय सलिलं यस्याः सा तथाभूता।

(७४). व्यालः—सर्पः। खगवरः—गरुडः। नागः—हस्ती। मिहिरः—सूर्यः। विघ्नवार्द्धेः—विघ्नरूपसमुद्रस्य।

(७५) धराधरेन्द्रदुहिता—हिमाचलकन्या पार्वती इत्यर्थः। विघ्नकुलान्तकः—गणेशः। पितृसखः—पितृबन्धुः। क्रौञ्चविदारणे—क्रौञ्चनामकपर्व्वतभेदने। पाणिग्रहः—विवाहः।

(७६) एतत् फलं—मम यथेष्टभोजनाभावरूपम्।

(७७) उत्तमाङ्गे—मस्तके। काशी केवलं पञ्चक्रोशव्यापिनी गङ्गा तु लक्षयामा लक्षं यामाः प्रहरा दैर्घ्यातिक्रमकालो यस्यास्तादृशी अतिदीर्घा इत्यर्थः।

(७८) (क) स्वर्दीर्घिका—मन्दाकिनी, गङ्गा इत्यर्थः। (ख) घर्माम्भः—घर्मजलम्। भगवतः—विष्णोः। शम्भुनगरे—काश्याम्। तारकं—तारकमन्त्रः। सखे श्रीपाद—हे श्रीपादनामकबन्धो।

(७९) मोमेति—मा लक्ष्मीः उमा दुर्गा सावित्री ताभिः उपेताः युक्ता मिलिता इत्यर्थः। रथचरणः—चक्रम्। तार्क्ष्यः—गरुड़ः। पत्रं - वाहनम्।

(८०) पूतनामारणलब्धकीर्त्तिः—पूतनाराक्षसीवधेन विख्यातनामा ; (पक्षे) पूतनामा पवित्रनामा, रणलब्धकीर्त्तिश्च। काकोदरः—सर्पः कालियनाग इत्यर्थः ; (पक्षे) अदरः नास्ति दरः भयं यस्य स निर्भयः गर्वित इति यावत् तादृशः काकः जयन्त इत्यर्थः। यशोदया—नन्दपत्न्या ; (पक्षे) यशस्य दया च ताभ्याम्।

(८१) एका प्रकृतिः—एकं मूलकारणम् ; (पक्षे) हरिहरशब्दयोः प्रकृतिर्धातुः हृ इत्येक एव। प्रत्ययभेदात्—प्रत्ययः विश्वासः तस्य भेदः तस्मात् ; (पक्षे) इ, अच् इति प्रत्यययोर्भेदात्। कलयति—जानीते। विनाशास्त्रं—शास्त्रं शास्त्रज्ञानं विना ; (पक्षे) विनाशस्य अस्त्रं स्वस्यामङ्गलकारणम्, हरिहरभेदमित्यस्य विशेषणम्।

(८२) शङ्खः—पाञ्चजन्यम्। कपालः—भिक्षाभाजनम्। द्वारवती—द्वारका। नागारिः—गरुड़ः। त्रिव्यक्षौ—एको त्र्यक्षः अपरस्त्र्यक्षः। श्रीवत्सः—वक्षःस्थरोमावर्त्त-विशेषः।

(८३) उमाधवपक्षे—"सर्वदा उमाधवः शिवः त्वां पायात्। येन ध्वस्त-मनोभवेन विनाशितमदनेन बलिजितो विष्णोः कायः पुरा स्त्रीकृतः। मोहिनीरूप-दर्शनेच्छुना शिवेन प्रेरितो विष्णुः पुनर्मोहिनीरूपं दधार इति पौराणिकी कथा। [अथवा अस्त्रीकृतः इति छेदः। त्रिपुरासुरवधकाले विष्णुर्यस्य बाणो बभूव इत्यपि पौराणिकी वार्त्ता] यस्य उत्कर्षेण वर्त्तितौ भुजङ्गरूपी हारवलयौ येन सः। यश्च शिरसि गङ्गां अधारयत्। यद्वा शरीरार्द्धेन गौरीं शिरसि गङ्गां च इत्यभिप्रायेण च-कार:। यस्य शिरः शशिमत् चन्द्रयुक्तं हर इति स्तुत्यं नाम च अमरा आहुः। अन्धकस्य असुरविशेषस्य विनाशकरः"।

माधवपक्षे—"सर्वदः सर्वाभीष्टदाता माधवः त्वां पायात्। अभवेन जन्मरहितेन अनः शकटं ध्वस्तं पादेन परावर्त्तितम्। बलेः असुरराजस्य जेता। कायः पुरा अमृतपरिवेषणकाले स्त्रीकृतः स्त्रीत्वं प्रापितः। अमृतार्थं विवदमानानां देवासुराणां अमृतपरिवेषणाय मायया नारायणेन मोहिनीरूपं धृतमिति पौराणिकी कथा। यश्च उद्वृत्तस्य अघासुरस्य हन्ता। यद्वा कालियस्य पीड़ाकरः। आरवलयः अरिसम्बन्धि

केनाऽ' यातीत्यर्थः । यद्वा उद्धृतभुजङ्गहारं वक्तं यस्य तेन गरुड़ेन यातीत्यर्थः । अगं गोवर्द्धनं कृष्णरूपेण, गां पृथ्वीञ्च कूर्म्मरूपेण योऽधारयत् । शशिनं मथ्नातीति शशिमत् राहुस्तस्य शिरोहरः इति स्तुत्यं नाम यस्य चामराः आहुः । अन्धकानां यादवानां चयकरः (चयो निवासः) द्वारकाख्यनिवासनिर्म्माता ।"—रामचरणतर्कवागीशः ।

(८४) (क) (गौरीपक्षे) शवशिवे—हे शवोपरिस्थिते दुर्गे । चिद्व्योमतः—चिदाकाशरूपब्रह्मवस्तुनोऽपि । प्रथमं—वस्तु इति शेषः । योगिनस्तुतिपराः—योगिनः स्तुतिपराः इति पदच्छेदः । प्रणिधानदृश्या—प्रणिधाने योगावलम्बनदशायां या दृष्टिस्तया ।

(ख) (शिवपक्षे) विश्वम्भरेश—हे विश्वपते शिव । प्रथमं—अनादिमित्यर्थः । योगिनस्तु इति पदच्छेदः ।

(८५) राधे क्षेममिति चन्द्रावलीं प्रति समेत्य कृष्णस्योक्तिः । प्रियस्य—कृष्णस्य । क्षेमं कंस—प्रियं कृष्णं कंसेति सम्बोध्य चन्द्रावली प्रतिवक्ति क्षेममिति । दृष्टः—अहमिति शेषः । राधा का—त्वयाहं यथा राधा दृष्टा, तथा मयापि त्वं कंसो दृष्टः ।

(८६) गोदुहः—गोपालाः । क्षीणः—लज्जितः ।

(८७) मे—हे मातः । "मः शिवश्चन्द्रमा वेधा मा लक्ष्मीश्च प्रकीर्त्तिता । मा च मातरि माने च बन्धने मूः प्रकीर्त्तिता"—एकाक्षरकोषः ।

(८८) चषकं—पानपात्रम् ।

(८९) माधवः—अहमिति शेषः, एवं परत्रापि । घोराहिमर्द्दी—घोरं भीषणं अहिं कालियसर्पं मृद्नाति पराजयते यः सः ।

(९०) मातः—इति कार्त्तिकेयस्योक्तिः । जीव—इति पार्व्वत्या उक्तिः, जीव वत्स किं ब्रवीषीति शेषः । प्रयच्छति—तव तात इति शेषः । मे—मह्यम् । प्रहिते—प्रेरिते । गुहे—कार्त्तिकेये । विघटयति—विश्लेषयति सति । सन्ध्याञ्जलिं—सन्ध्योपासनार्थमञ्जलिपुटम् ।

(९१) लुठति—आहन्ति । अग्निभूः—कार्त्तिकेयः । विचेष्टितं—विरुद्धं कर्म्म । चरितं—आचरणम् । मिमीते—परिमाति ।

(९२) एषा अल्पा भूमिः किं कथं याच्यते इति शेषः । त्रैलोक्यमित्युत्तरम् ।

(९४) केशवः—विष्णुः ; (पक्षे) प्रशस्तकेशः पुरुषः । शौरिः—विष्णुः ;

(पक्षे) शूरो यादववंशीयः तत्सम्भूतश्च। चक्री—विष्णुः ; (पक्षे) कुम्भकारः। गर्वायसे—गर्वं करोषि।

(९५) हरिः—वानर इत्यर्थमादाय प्रत्युत्तरम्। कृष्णः—कृष्ण इति वानरविशेषणं कल्पयित्वाह बिभेमीति। मधुसूदनः—मधु पुष्परसं सूदयति हरतीत्यर्थमादाय प्रत्युक्तिः। क्षीणः—लज्जितः।

(९६) अमुना कुन्दकुञ्जेन—अमुना पुरोवर्त्तिना ; (पक्षे) नास्ति मुः मुकारो यत्र तेन मुकुन्दरहितकुञ्जेन इत्यर्थः।

(९७) भ्रातः—हे लक्ष्मण। हिमचन्द्रमाः—शीतलचन्द्रः।

(९८) वत्स—हे लक्ष्मण। देव्याः—सीतायाः। मृग्यते—अन्विष्यते।

(१००) कुपिता—क्रोधान्विता ; (पक्षे) पृथिवीपालकः। जगतां माता—जगत्प्रसविनी ; (पक्षे) जगद्रक्षकः। अनन्ता—असीमा ; (पक्षे) अनवनतः। शौरिः—विष्णुः।

(१०१) लोले—इति पार्वत्या उक्तिः। ब्रूहि कपालिकामिनि—इति लक्ष्म्या उक्तिः। लोले इति सम्बोधनं यथा चापल्यदोषं सूचयति, तथा कपालिकामिनि इत्यपि भिक्षुकपत्नीत्वगर्हां गमयति। पायसां जलानां पतिः समुद्रः। प्रत्येति—विश्वसिति।

(१०२) ताण्डवं—उद्धतनृत्यम्। वृन्दावनान्ते—अन्तशब्दोऽत्र स्वरूपवाचकः। मृगशिशुः—मृग्यते अन्विष्यतेऽसौ मृगः अन्वेष्टव्यः स चासौ शिशुश्चेति मृगशिशुः अतिशिशुरित्यर्थः। सोल्लुण्ठोक्तिरियम् ; (पक्षे) मृगशावक इत्यर्थमादाय प्रतिवचनम्। जरठवृषपतिः—जरठः वृद्धः स चासौ वृषपतिश्चेति ; (पक्षे) जरठानां वृषाणां पतिरित्यर्थः। लीलासंलापः—लीलया विलासेन संलापः मिथोभाषणम्।

(१०४) पूर्वचरणत्रये सप्तमाक्षरविलोपात् योऽर्थः प्रतीयते, स एव सीताया अभिमतः। लघिष्ठेति रावणं सम्बोध्य सीता प्राह।

(१०५) हे गौरि मां प्रति रुषा कोपेन किं कोपं मा कुरु इत्यर्थः। इति शिवोक्तौ 'गौः' इति स्वसम्बोधनपदं 'इमां' इति द्वितीयान्तपदं परिकल्प्य पार्वती प्राह, ननु भोः अहं गौरिति स्वीकरोमीति शेषः। कां प्रति कुप्यामि। अथ शिवः 'गौः' 'इमां' इति पदद्वयस्य पार्वतीकृतविच्छेदमुपेक्षमाण आह 'मयि' मां प्रति कोप इति

अनुमानत: अनुमानेन अहं जानामि। पश्चात् पार्वती 'अनुमानत' इति शिवोक्त-पदस्य श्लेषेण अर्थान्तरं प्रतिपाद्याह सत्यमित्यादि—अनुमानत: इति तव वचनात् त्वं अनुमानत:—न उमा अनुमा उमाव्यतिरिक्ता नारी तस्यां नतस्तद्वशीभूत इत्यर्थ: ; इति सत्यमेवेत्यर्थ:। गिरिभुव:—पार्व्वत्या:। कुटिला:—श्लिष्टा:।

(१०६) प्रिये—गौरि। क्रोध: न क्रियताम्, इति शिवोक्ति:। गौरी तु शिव-वाक्यस्य नक्र: कुम्भीर: अध:क्रियतां त्यज्यताम् इत्यर्थमादायाह, स नक्रस्तु भवन्मौलिस्थ-गङ्गोदरे। मुग्धे—प्रकृतार्थपरिज्ञानमूढ़े। मानसपूजितम्—मन:कल्पितमर्थं त्यज इति शिवोक्ति:। अथ गौरी मानसपूजितमिति पदस्य मानसं तदाख्य: सरोवर: पूजितं आद्दतं येनेति समासाश्रयेण हंसरूपमर्थं परिकल्प्य प्राह युग्मनियोगद्वयं कृतम्, मदन्तिके नक्रो हंसश्च नास्त्येव तदुभयन्तु तव शिरश्चारिण्यां गङ्गायामेव। वक्रे—मद्वाक्यस्यविपरीता-र्थग्राहिणि। असुं—पूर्व्वोक्तम्। श्लेषं—मद्वाक्यस्य अर्थान्तरयोजनाम्। निराकुरु—परि-हर इति शिवोक्ति:। गौरी च वक्रे इति सम्बोधनपदं सप्तम्यन्तत्वेन श्लेषमिति पदस्य आलि-ङ्गनार्थकत्वेन च कल्पयित्वा प्रत्युवाच, वक्र:—कुटिलस्त्वमिति शेष: मया कदा आश्लिष्टोऽसि आलिङ्गितोऽसि, नाहमिदानीं त्वामालिङ्गितवती, तत् कथमालिङ्गनपरिहाराय मामेवं ब्रवीपीत्यर्थ:। वामाङ्गया—अर्द्धनारीश्वरमूर्त्तौ वामे वामभागे अङ्गानि देहो यस्यास्तया पार्व्वत्या। अन्यत् सुगमम्।

(१०७) अनेन श्लोकेन शिवसमीपे पार्वत्या: स्वेदादिसात्त्विकभावगोपनं वर्णितम्।

(१०८) हरशिरसि गङ्गामवलोक्य पार्व्वती हरं पृच्छति, हरस्तु गङ्गां गोपयन् पार्व्वतीमन्यथा प्रतिवक्ति एषा ते इत्यादि।

(१०९) भूपे कूपसाधर्म्यं दर्शयति भूप इति। नमज्जनसुखावह:—कूपो हि मज्जनेन अवगाहनेन यत् सुखं तत् आवहति जनयति यस्मादृशो न। पक्षे नमतां नम्राणां जनानां सुखावह: सुखजनक:। कूपस्तावत् गुणसम्बन्धात् रज्जुसंयोगात् पात्रानुसारत: घटीघटादिभेदानुसारेण यादृक् पात्रं तादृगित्यर्थ:। नित्यं ददाति पय इति शेष:। (पक्षे) गुणसम्बन्धात् विद्यादिगुणवत्तया हेतुना, पात्रानुसारत: योग्या-योग्यव्यक्तिभेदेन। अन्यत् सुगमम्।

· (११०) श्लोकेऽस्मिन् चतुर्विंशत्यक्षरवृत्तम्, वृत्तचन्द्रिकामते द्रुमिलाच्छन्दः, वाग्वल्लभमते तु द्विमिलाच्छन्दः।

(११२) सर्वं ददासीति सर्वदः। वृथा—मिथ्या, स्तूयसे त्वमिति शेषः। सर्वशब्दस्य सङ्कोचं दर्शयित्वा वृथात्वमुपपादयति नेति। अरयः पृष्ठं पृष्ठदेशं तवेति शेषः न लेभिरे, त्वं कदापि रणभङ्गेन पलायमानः शत्रूणां स्वस्य पृष्ठं न दत्तवान्, शत्रून् पृष्ठदर्शनं न कारितवानसीत्यर्थः। अपिच परयोषितः परस्त्रियः नेत्रं त्वदीयनेत्रपातं न लेभिरे इति शेषः। शत्रुभिस्तव पृष्ठं परस्त्रीभिश्च नेत्रं त्वत्तः कदाचिन्न लब्धम्। अत एतदुभयोरप्रदानं भवतः सर्वदात्वं व्याहन्ति। एतेन राज्ञोऽसाधारणं वीरत्वं जितेन्द्रियत्वञ्चेति व्याजस्तुतिरलङ्कारः।

(११३) गीः—सरस्वती, शास्त्रज्ञानमिति यावत्। रमा—लक्ष्मीः धनप्राचुर्य्यमित्यर्थः। ते—लक्ष्मीसरस्वत्यौ। विनयो नास्ति—तवेति शेषः। सा—लक्ष्मीश्च। सा—गीश्च। स—विनयश्च एते त्वयि सन्ति। अतः साधारणधनिविद्वद्भ्यो विलक्षणोऽसीति भावः। धनवन्तो विद्यावन्तश्च प्रायश उद्धता दृश्यन्ते। त्वयि—अत तुकारोऽध्याहार्यः।

(११४) न जानाति—न ज्ञानवान्। न ददाति—न दाता इत्यर्थः। जगती जाया यस्य सः, जायाया जानिरादेशः। जगतीशब्दोऽत्र पृथिव्यर्थे प्रयुक्तः। तेन—भूगतस्यापि भवतः स्वर्गगतबृहस्पतिकल्पवृक्षापेक्षया गुणोत्कर्ष इति सूचितम्।

(११५) ते जनाः कौपीनवनाः—कौपीनमात्रावलम्बिनः; (पक्षे) कौ पृथिव्यां पीनधनाः प्रचुरधनाः। धात्रीफलं—आमलकीफलं अन्नभोज्याभावात्; (पक्षे) धात्र्याः पृथिव्याः फलं भोगैश्वर्य्यादिकम्। न दन्तिवाजिनिवहाः हस्त्यश्वसमूहाः न; (पक्षे) वाजिनिवहाः अश्वसमूहाः नदन्ति शब्दायन्ते। क्षितिः—क्षयः विनाश इति यावत्; (पक्षे) क्षितिभुंग्भिः राजभिरित्यर्थः। निजकुलं समलं कलङ्कितं ख्यातम्; (पक्षे) समलङ्कृतं सम्यग्भूषितं। परमेश्वरेण—सम्राजा।

(११६) गुणयोगात्—ज्यासंयोगात्; (पक्षे) शीलसौजन्यादिगुणसम्बन्धात्। सन्नतः—अवनतकायः; पक्षे विनयनम्रः इति धनुषा सह साम्येऽपि धनुर्वक्रं त्वन्तु वक्रस्वभावो न। रुचिमत्त्वात्—कान्तिमत्त्वात्। विधुः—कलङ्की, त्वन्तु न तथा। गभीरः—अतलस्पर्शः; (पक्षे) गाम्भीर्य्यगुणयुक्तः। अप्रतीतः—अविश्वस्तः, जलधिर्बहुहिंस्रजलचर-

समाकुलत्वात् अविश्वस्तः, त्वन्तु विश्वस्तः, धनुराद्युपमानानां गुणा एव त्वयि सन्ति न तु तेषां दोषा इति तेभ्यः समुत्कर्षख्यापनाद् व्यतिरेकालङ्कारः।

(११७) हे उर्वीधर राजन् रम्यकाव्यकरणे त्वां सत्यं निश्चितं सत्यवतीभये—सत्यवती भूरुत्पत्तिस्थानं यस्य स सत्यवतीभूः द्वैपायनो व्यासः तं आचक्षे। सत्यवतीभि इति णिजन्तनामधातोर्लट् ए। एवं परत्रापि। सैनाग्रने—सैन्यगहने यद्वा सैन्यरचणे शरभये शरभूः कार्त्तिकेयः तं आचक्षे; शरभि इति नामधातोः पूर्ववद् रूपम्। भाषणे—संलापे वागीशये वागीशं बृहस्पतिं आचक्षे। त्राणे—रक्षणे विष्णये विष्णुं आचक्षे, विष्णि इति नामधातो रूपम्। व्याकरणे—दाक्षीकुक्षिभये दाक्षी पाणिनिजननी तस्याः कुक्षि उदरं तस्माद् भूरुत्पत्तिर्यस्य स दाक्षीकुक्षिभूः पाणिनिः तं आचक्षे। रणे—युद्धे पृथोदरभये पृथा तस्याः उदरं भूरुत्पत्तिस्थानं यस्य स तं अर्ज्जुनं आचक्षे। वितरणे—दाने देवद्रये देवद्रुः कल्पवृक्षः तं आचक्षे, सर्वेषां सर्वाभीष्टप्रद इत्यर्थः। विश्वम्भराभूषणे—विश्वम्भरायाः पृथिव्याः भूषणे अलङ्करणे मेरये मेरुः हेमाद्रिः तं आचक्षे। सर्वत्र अहमिति शेषः। अन्ये जना यद्यद्गुणवत्तया जगति तैः सह उपमीयन्ते, त्वं हि तत्सर्वोपमानभूतोऽसीति भावः।

(११८) असौ—वारिधिः। स—मुनिः अगस्त्य इति शेषः। तद्—व्योम। पदं—चरणम्। साम्प्रतं पुरीधाम्नि जगन्नाथदेवस्य यन्मन्दिरं दृश्यते तस्य निर्म्माणमनेनैव राज्ञा कारितमिति प्रसिद्धिः।

(१२१) हस्तन्यस्तकुशोदके—दानार्थं कुशवारि गृह्णति सति। भूः—पृथिवी। न कम्पते—यस्मै कस्मैचिद् दानाशङ्कयेत्यर्थः। सर्व्वंसहा—यतः सा निखिलं क्लेशं सोढुं समर्था। देवागारतया—देवानां निवासस्थानतया। काञ्चनगिरिः सुमेरुः। न ज्ञातं द्विपानां हस्तिनां भयं येन तादृशस्य भिचोर्भवने प्रस्थानेन या दुःस्था दुःखेनावस्थितिः तस्या आशया शङ्कया।

(१२२) निरञ्जनम्—निर्म्मलं, उत्कृष्टमित्यर्थः; (पक्षे) अञ्जनयुक्तं पवित्रमित्यर्थं। सुदुष्प्रापं—(उभयपक्षे) सुदुर्लभम्। सर्वव्यञ्जनम्—सर्व्वेषु व्यञ्जनेषु अन्नमित्यर्थं। भोजनस्य उपकरणेषु सुखदायकम्; (पक्षे) सर्व्वेषां सर्गादौ अव्यक्तानां पदार्थानां व्यञ्जनेन सगुणावस्थायां व्यक्तीकरणेन रञ्जनं लोकप्रत्यक्षीभावजननम्।

(१२३) कृष्णघट्टनृपते—मुर्शिदाबादप्रदेशान्तर्गतं कृष्णघट्टनामकं स्थानं महाराजनन्दकुमारस्य जन्मभूमिरिति प्रसिद्धिः।

(१२४) द्वितीयभूतभूयिष्ठा—जलबहुला। अल्पाद्यसम्भवा—स्वल्पचितिका। अस्याः—मूर्त्तः। पार्थिवसम्बन्धः—भूमिसम्पर्कः; (पक्षे) पार्थिवस्य राज्ञस्तव सम्बन्धः कृपादृष्टिरिति यावत्। यथा जलबहुलं स्वल्पचितिकं हि द्रव्यं अधिकतरचितिसंयोगं विना न क्वाप्युपयुज्यते, तद्वदियमपीति भावः।

(१२५) अगस्त्यवंशसम्भूताः—अगस्त्यकुलजाता ब्राह्मणा इत्यर्थः। वातापिः—असुरविशेषः; (पक्षे) निम्बू विशेषः। नवकृष्णः—नूतनाचारी श्रीकृष्णः; (पक्षे) तन्नामको महाराजः। कमला—निम्बू विशेषः; (पक्षे) नवकृष्णमहाराजस्य सहधर्म्मिणी।

(१२८) भिक्षाश्रयः—भिक्षा एव आश्रयः अवलम्बनम्। भिक्षालब्धद्रव्यस्य पात्रम्।

(१२९) त्वत्कीर्त्तिशीतकिरणे—तव यशोरूपचन्द्रे। रोहिणी—चन्द्रपत्नी। स्वपतीत्यादि—स्वस्याः पतिः तस्मिन् संशयः उभयोः सौन्दर्य्यादिना तुल्यत्वात् को मे पतिरिति सन्देहेन जातशङ्का पातिव्रत्यभङ्गभयेन भीता सती। कज्जललाञ्छनेन—कृष्णवर्णाञ्जनचिह्नेन। प्रेयांसं—प्रियतमं गगनचन्द्रम्। आङ्कयत्—अङ्कितमकरोत्। कलङ्कः—कुकर्म्मजो दोषः।

(१३१) आलीवर्द्दिनवावं—वङ्गविहारोत्कलानामधिपतिम्। नवद्वीपेश्वरं—महाराजं कृष्णचन्द्रम्। नवकृष्णभूपतिम्—कलिकाताशोभावाजाराधिपतिं महाराजं नवकृष्णम्।

(१३२) मातृतातः—मातामहः आलिवर्द्दिरित्यर्थः। अल्लामुखः—अल्लेति परमदेवतायाः नाम मुखे यस्य सः। सुनसरमुलुकः—सिराजद्दौलानवावस्य नामान्तरम्।

(१३३) सुन्नादिवर्णः—खण्डितासाचरः; श्लोकेऽत्र शब्दपक्षे आद्याक्षरत्यागः इत्यर्थः। वैकुण्ठाभिप्रणीतः—(सम्राट्पक्षे) वैकुण्ठं विष्णुपुरं अभिप्रणीतं आराधितं येन सः; (शब्दपक्षे)—कुण्ठा सङ्कोचः अभिप्रणीता सम्यग्रचिता येन सः।

कोदण्डोदारनामा—(सम्राट्पक्षे) कोदण्डेन धनुषा उदारं प्रशस्तं नाम यस्य सः ; (शत्रुपक्षे)—दण्डेन दण्डप्राप्त्या उदारं विख्यातं नाम यस्य सः, दण्डग्रहणेन अपयशोभागीत्यर्थः। अन्यत् सुगमम्।

(१३५) गन्धवाहाधिकविहितजवाः—वायोरप्यधिकवेगवन्तः।

(१३६) सोऽयं—मसीसङ्गमः। तिग्मांशुकन्या—सूर्य्यतनया यमुना इति यावत्। नूरदीनः—जाहाङ्गीर-बादसाहस्य नामान्तरम्।

(१३७) सम्भाविताः—सादरं कृताः। दिल्लीवल्लभः—अत्र साजाहान-बादसाहः। आसनं—वासस्थानं आग्रानगरीत्यर्थः। मधुपुरी—मथुरा।

(१३९) असौ दारा (दाराशिकः) साजाहान-सम्राजो ज्येष्ठपुत्रः।

(१४३) दुरूहद्रुते—दुरूहश्लोकानां द्रुतरचनायाम्।

(१५२) गुम्फः—ग्रन्थनम्। कुम्भी—हस्ती। पञ्चाननः—सिंहः। कवित्वविधौ पञ्चसंख्यकवदनविशिष्ट इत्यपि प्रतीयते।

(१५३) विसरः—विस्तरः सञ्चार इति यावत्। उट्टङ्किताः—उत्कीर्णा उल्लिखिता इत्यर्थः।

(१५४) रघुकारे—कालिदासे। दाक्षीपुत्रे—पाणिनौ।

(१५५) माघे—माघकविरचिते शिशुपालवधनामके काव्ये ; (पक्षे) माघमासे। भा—दीप्तिः शोभा इत्यर्थः।

(१५६) "दण्डिनः पदलालित्य"मिति दाक्षिणात्यदेशीयः पाठः।

(१५७) माघेन—तन्नामककाव्येन ; (पक्षे) माघमासेन। पदक्रमे—सुप्तिङन्तपदविन्यासे ; (पक्षे) चरणक्षेपे। भारवेः—तन्नामककवेः ; (पक्षे) रवेः सूर्य्यस्य भाः किरणान् (स्मरन्त इत्यस्य कर्म्मणि षष्ठी) ; (पक्षे) द्वितीया।

(१५८) बाणभट्टः मयूरकवेर्जामातासीदिति प्रसिद्धिः।

(१५९) असौ मुरारिकविरेव अनर्घराघवकारः। जनकोऽस्य भट्टश्रीवर्द्धमानो जननी च तन्तुमती। "भवभूतिमनादृत्य निर्वाणमतिना मया। मुरारिपदचिन्तायामिदमाधीयते मनः"—कस्यचित्।

(१६०) कान्यकुब्जमहाराजो यशोवर्मा प्रसिद्धः कविरासीत्। तस्य सभा वाक्पतिराजभवभूतिभ्यामिव समलङ्कृताऽसीत्।

(१६३) मौग्ध्यमधुरं—अतीव मनोहरम्।

(१६७) गाम्—पृथिवीं भूमिमित्यर्थः। साङ्गारप्रकरां—प्रज्वलिताङ्गारयुक्ताम्। अमर्षन्—असहमानः। प्रेङ्खत्—चलत्।

(१६८) अकिल्बिषः—निष्पापः गङ्गाजलसंसर्गाद् निर्दोष इति यावत्। प्रियतमस्य दोषदृष्टिः प्रायशो न भवतीति विशेषणसङ्गतिः। मुक्तिः—मोचः; (पक्षे) मोचनं विरेचनमित्यर्थः।

(१६९) विलोचनहारि—नेत्रतृप्तिकरम्। आरटितं—शब्दः। करभ—उष्ट्र।

(१७०) माकन्दं—आम्रम्। मकरन्दतुन्दिलं—प्रचुरमधुयुक्तम्। कर्णारुन्तुदं—श्रुतिकटु। सङ्केत—सन्येत।

(१७२) परभृत—कोकिल। गोष्ठी—सभा।

(१७३) भिल्लार्भकाः—भिल्ला म्लेच्छजातिविशेषास्तेषामर्भका बालकाः।

(१७४) अरविन्दवनैकबन्धुः—पद्मसमूहसुहृत्। चक्र—चक्रवाक।

(१७५) रात्रौ व्याधेन पिञ्जरबद्धायाश्चक्रवाक्याः चक्रवाकं प्रति उक्तिरियम्।

(१७८) प्रियतनयतया—तनयवात्सल्येन। दत्तहुंकारमुद्रा—दत्तहुंकारसङ्केता। धेनुः—सवत्सा पयस्विनी गौः। मूर्ध्ना—मस्तकेन। आहत्याहत्य—पुनः पुनः पीड़यित्वा। अनु—पश्चात्। प्रस्नुतं—क्षरितदुग्धम्। ऊधः—स्तनम्। किञ्चिदित्यादि—किञ्चित् ईषत् कुब्जं वक्रं एकं जानु यस्य तादृशस्य। अनवरतेत्यादि—तथा अनवरतं चलत् अस्थिरं चारु सुन्दरं पुच्छं यस्य तथोक्तस्य। विच्योतत्क्षीरेति विच्योतन्ती क्षरन्ती या क्षीरधारा तस्या लवेन लेशेन शवलं नानावर्णं मुखं यस्य तथाभूतस्य। तर्णकस्य—वत्सस्य। उत्कर्णं—उद्गतौ कर्णौ यस्य तं। आतृप्ति—तृप्तिपर्यन्तं वत्सस्येति शेषः। लेढ़—स्वदते।

(१८१) परिमलबहुले—सुगन्धपूरिते।

(१८२) दानान्वितलोचनः—दानेन खण्डनेन वितरणेन वा अन्विते विलोचने यस्य सः।

(१८३) दानार्थिनः—मत्तहस्तिनो गण्डनिःसृतमदजलं पिपासवः ; (पक्षे) भिक्षार्थिनः। मदान्धबुद्ध्या—मदेन दानवारिणा ; (पक्षे) गर्व्वेण अन्धा सदसद्विवेकहीना या बुद्धिस्तया। अनेन भृङ्गदूरीकरणेन करिवरस्यैव क्षतिर्न पुनर्भृङ्गाणां यतस्ते हस्तिमदवत् कमलमकरन्दमपि पिबन्तीति।

(१८५) असौ परमविदुषी जयन्तीदेवी फरिदपुरजेलान्तर्गतकोटालिपाडानिवासिनः प्रसिद्धनैयायिकस्य श्रीकृष्णसार्व्वभौमस्य भार्य्यासीत्। तौ उभौ मिलित्वा "आनन्दलतिका"-नामकं ग्रन्थमेकं रचयामासतुः। "आनन्दलतिकाग्रन्थो येनाकारि स्त्रिया सह" इत्येव वचनं ग्रन्थशेषे प्राप्तम्।

(१८७) वेल्लति—चलति स्फुरतीत्यर्थः। हरिदन्तावलाः—दिग्दन्तिनः।

(१८८) कीटगृहं—शङ्खो हि कीटविशेषस्यावासः। अन्तः—मध्ये। क्षाराम्बुसम्भवः—लवणजलसमुद्भूतः, एतेनास्य जन्म च निन्दितमिति सूचितम्। शून्यः—अन्तःशून्यः असार इति यावत्। इत्थं बहुदोषदूषितोऽपि शङ्खः केन गुणेन श्रीपतिनिकटे लक्ष्मीवत्पुरुषसन्निधौ स्थितिं लेभे इति साक्षेपः प्रश्नः। केन गुणेनेति पदद्वयेनैवास्य प्रत्युत्तरमाह—कः शब्दस्तेन, स्निग्धगम्भीरघोषेण गुणेनेत्यर्थः शङ्खस्य लक्ष्मीप्रीतिकरत्वात् श्रीपतेरपि तस्यादरः समुचित एवेत्यपि प्रतीयते।

(१८९) कूजितमञ्जुलजालके—विहगध्वनिविशिष्टशैवालसमूहे।

(१९१) आत्मलक्ष्मत्यागः—एतेन महती त्यागशीलता दर्शिता। निर्यत्नोपनतैः—अनायासलब्धैः। वृत्तिः—जीविका। एकत्र—एकस्मिन् पक्षे। चर्य्या—आचरणम्। अनृजुवर्त्मता—वक्रगतिः ; (पक्षे) कपटव्यवहारः। वक्त्रे द्विरसना—जिह्वाद्वयं ; (पक्षे) वाक्यनिष्ठाभावः। वीक्षणं—दृष्टिः ; (पक्षे) विषवद्दृष्टिः। भोगिन्—सर्पं ; (पक्षे) भोगासक्त।

(१९३) सितं—शुभ्रम्। कज्जलाभं—कृष्णवर्णम्। चीयते—वर्द्धते। अपचीयते—न्यूनीभवति। उभयत्र कर्म्मकर्त्तरि प्रयोगः।

(१९५) गिरिकुहरे—पर्व्वतगुहायाम्।

(१९८) त्रपाश्यामा—त्रपया लज्जया श्यामवर्णा। पनसम्—कण्टकिफलम्। लाङ्गलिफलम्—नारिकेलम्।

(२००) करटालयः—काकवसतिः। भूतनिकेतनं—देवयोनिविशेषवासस्थानम्

(२०१) सम्भूतिः—जन्म। परिमलः—सुगन्धः। गीर्व्वाणचेतोहरः—देवानां मनोमोहनः। दातृगुणोत्करः—दानकर्त्तृगुणसमूहः। अर्थ्यौत्यादि—अर्थिप्रवराणां याचकश्रेष्ठानां या अर्थिता तस्याः अर्पणविधौ दानविषये। विवेकः—ज्ञानम्।

(२०२) प्रेङ्खत्—चलत्। श्रीखण्ड—चन्दन।

(२०३) अलिना—भ्रमरेण। उरीकरोषि—अवलम्बसे, प्राप्नोषीति यावत्। कुशेशयदृशां—कुशेशयं पद्मम्, तद्वत् दृशो यासां तासां, कमललोचनानां रमणीनामित्यर्थः।

(२०५) गदराशिनाशनिपुणं—रोगसमूहविनाशदक्षम्।

(२०६) स्वं मूलं—स्वीयं मूलदेशम्। नोपयोगमगमत्—आनुकूल्यं न चकार।

(२०७) उलूपविटपी—उलुखड़ इति भाषा।

(२०८) उन्मत्त—रे धुस्तूर। पिशाचपतिना—महादेवेन। चन्द्रोपलः—चन्द्रकान्तमणिः। वार्द्धिः—समुद्रः।

(२१०) सञ्जीवनम्—मम प्राणस्वरूपम्। जीवनम्—जलम्। तत्र—जीवनस्य। प्रसारितदला—विस्तारितपत्रा। मित्रे—सूर्य्ये।

(२१३) कर्पूरेति—कर्पूरमिश्रिता धूल्यस्ताभिः रचितं आलवालं यस्य सः। पलाण्डुः—पेँयाज इति भाषा।

(२१४) श्रीमन् वसन्त—हे शोभासम्पन्न वसन्तसमय। चिरशिखा—पूर्व्वशाखा। विलूना—छिन्ना।

(२१५) मन्दारः—मादार इति भाषा। वृतिः—वेष्टनम्; वेड़ा इति भाषा।

(२१६) शालयः—हैमन्तिकधान्यानि।

(२१७) मधुलिहः—भ्रमराः। माध्वीकं—मधु। बलिभुजः—काकाः।

(२१८) करीन्द्रं—ऐरावतम्। पौलोमीपतिः—शचीपतिरिन्द्र इत्यर्थः। मथने—समुद्रमन्थने। मन्दरगिरे—हे मन्थाद्रे। शरण्यः शैलानां—पर्व्वतानां रक्षकः। रत्ननिलयः—रत्नाकरः समुद्र इत्यर्थः। अददात्—ददौ।

२१९) आखोटः—वृक्षविशेषः, सेश्रोड़ा इति भाषा। रसालः—आम्रः। विशेषग्रहः—उत्तमाधमविवेकः।

(२२१) आचक्ष्महे—कथयामः। सप्तमुनयः—मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठः। विलासवसतिः—लीलाभूमिः। पिशिताशनानां—हिंस्रजन्तूनां राक्षसानां वा।

(२२३) पल्लवाः—विस्तारा वनानि वा।

(२२५) जलनिधेः—बहुजलस्य। चण्डालीति—चण्डालवन्निष्ठुरसूर्य्येण।

(२२६) पिधत्से—आहृणोषि। नीरग्रहणरसिकैः—जलपानानुरागिभिः। अध्वगैः—पथिकैः। उज्झितः—त्यक्तः।

(२२९) अचिराढ्यः—सम्प्रति धनाढ्यो नीच इव रविस्तीक्ष्णं तपति, अकृतज्ञो जनः मित्रं यथा त्यजति तथा रुरुः मृगविशेषः शृङ्गं त्यजति। अन्यत् सुगमम्।

(२३२) (क) पतङ्गपाकसमये—पतङ्गस्य शालिधान्यविशेषस्य पाकसमये परिपाककाले। पतङ्गपतिविक्रमाः—पतङ्गानां पक्षिणां पतिः गरुड़ः तस्य विक्रम इव विक्रमो येषाम् ते। पतङ्गस्य—सूर्य्यस्य। पतङ्गाः—शलभाः। "पतङ्गः शलभे शालिप्रभेदे पक्षिसूर्य्ययोः"—मेदिनी।

(२३३) प्राची—पूर्व्वदिक्। पिङ्गा—पिङ्गलवर्णा। रसपतिः—पारदः। ग्राम्यसदसि—ग्राम्यजनसभायाम्। द्रविणरहितानां—निर्धनानाम्।

(२३४) घूकालीं—पेचकसमूहम्। लोकालिं—जनसमूहम्।

(२३५) (क) हृताः अन्येनापहृताः नववध्वो येषां तादृशानां पुरुषाणां अयं अम्भोधिनिमज्जनरूपः पन्थाः। करैः—किरणैः; (पक्षे) हस्तैः।

(ख) अस्मान्—रामादीन्। व्यामर्षात्—क्रोधात्। खनगतघनोर्म्मिम्—शब्दितोत्तालतरङ्गम्। करैः—किरणैः; (पक्षे) हस्तैः।

(२३६) उलूकाः—पेचकाः। चिरात्—अव्ययं; दीर्घकालं व्याप्येत्यर्थः। निद्रामुद्रां—निद्राचिह्नम्, निद्रया नेत्रनिमीलनं वा।

(२३९) तत्र—तयोर्मध्ये। क्रकचनिकरैः—शङ्खभेदकास्त्रविशेषैः।

(२४०) गुञ्जया सह—गुञ्जा—कुँच इति भाषा। तोलयन्ति—ऊर्द्ध परिमाणेन समीकुर्व्वन्ति। श्लोकेऽत्र भुजङ्गप्रयातच्छन्दः।

(२४१) (क) सच्छिद्रः—छिद्रं रन्ध्रं ; (पक्षे) दोषः। वक्रः—कुटिलः।

(ख) अलिकुलैः कमलमिव कज्जलैरक्षिकमलं रञ्जितमित्यर्थः।

(ग) विधिना इदमेवादिष्टं, हे स्वर्ण त्वं कर्णगतं भव, श्रुतिमावे तिष्ठ ; कामिनीकाञ्चनयोस्तत्त्वज्ञानपरिपन्थित्वाद् व्यवहारसंसर्गं मा कुरु। तु किन्तु तदर्थं विधातृवाक्यार्थं अजानद्भिः बोद्धुमक्षमैः मूढैरित्यर्थः। तेन—स्वर्णेन।

(२४२) दावविधुराणि—दावानलदग्धानि। रिक्तः—शून्यः जलरहित इत्यर्थः।

(२४३) रसा—पृथ्वी। पूषकरोत्करैः—पूष्णः सूर्य्यस्य कराणां उत्करैः समूहैः। एकान्तेन—तद्गतेन। अन्तरागतं—अवसरप्राप्तम्। स्वान्तेन—चेतसा। अभितः—सम्मुखे।

(२४४) असमञ्जसं—अयोग्यम्। मण्डूकः—भेकः।

(२४५) विवस्वान्—सूर्य्यः। मीनमेषवृषाणां क्रमपाठात् भोगवासनाया उत्तरोत्तरं प्राबल्यं सूचितमिति।

(२४७) खलानां—सदसद्विवेकविधुराणाम्। अस्ताशङ्कं—अस्ता नष्टा आशङ्का यस्मिन् तद् यथा तथा। जठरपिठरोपूर्त्त्यै—उदररूपस्थालीपूरणाय। गोपवेशस्य विष्णोः—श्रीकृष्णस्य। गुणगणनया—गुणकीर्त्तनरूपस्तोत्ररचनया प्रायश्चित्तं कुर्य्याम्।

(२५०) कुम्भकर्णायते—कुम्भकर्णवत् दीर्घनिद्रां याति। सन्देशे—संवादवहने। वस्तुनिरीक्षणे—द्रव्यदर्शने।

(२५१) स्तेयव्रते—चौरकर्म्मणि। मृषाजल्पेषु—मिथ्याकथनेषु। कोलः—शूकरः।

(२५२) वातपित्तकफादयो धातव उच्यन्ते। वैद्यकनये—वैद्यशास्त्रे। तरलयन्तः—व्याकुलीकुर्व्वन्तः।

(२५३) सागरस्य रावणसन्निहितत्वादिति।

(२५५) अन्वेषयता—अन्वेषणम् अन्वेषस्तं कुर्व्वता। तत्करोति तदाचष्टे इति णिच्, ततः शतृप्रत्ययः।

(२५६) दृढ़तरं निबद्धा मुष्टिर्येन, (पक्षे) यस्मिन् तस्य। एकत्र दृढ़मुष्टित्वेन धनं रक्षतः, अन्यत्र धारणकाले। कोषे धनागारे निषण्णस्य अपहरणादिभयात् सदैव दत्तदृष्टेः, (पक्षे) कोषे आवरणे स्थितस्य। सहजमलिनस्य—नीचस्वभावस्य; (पक्षे) स्वभावतः कृष्णवर्णस्य। आकारतः—आकृत्या आकारेण वर्णेन च।

(२५८) वधूटी—बाला वधूः। अनु—सह।

(२५९) अनवद्येति पदं परत्र यथासम्भवं लिङ्गव्यत्ययेनान्वेतव्यम्।

(२६१) वेदादीनां पञ्चमादिसंख्याया असत्त्वेऽपि तत्कथनात् तेषां तद्वत् कार्य्यकारित्वमिति बोध्यम्। अप्राणानि रत्नानि सप्त, भार्य्यादीनि प्राणिरत्नानि सप्त। एतेन रत्नानि चतुर्द्दश।

(२६३) तत्र—पूर्णचन्द्रे। कमलालये—इत्यनेन विपद्दृष्टिहेतुः सूचितः।

(२६४) अस्य—दरिद्रस्य। यथा महापातकिनः संसर्गसम्भाषणसहावस्थानादिकं निषिद्धं, तथा दरिद्रस्यापि दृश्यते। अतो दारिद्र्यं पञ्चातिरिक्तमहापातकमेव मन्यामहे इति भावः।

(२६५) अर्भकम्—शिशुम्। कर्पटम्—वस्त्रम्।

(२६६) स्थूणा—गृहस्तम्भः खुँटि इति भाषा। अभ्यर्णजलागमः—अभ्यर्णः आसन्नः जलागमः यस्मिन् तादृशः कालः।

(२६७) मयि जीवति सति नान्यगाः—अन्यं पुरुषान्तरं गच्छन्ति यास्तादृश्यो न। यद्यपि क्षुधा तृष्णा च कदाचिन्मां मुञ्चति आशा तु न क्षणमपि।

(२६९) संग्रहा—सं सम्यक् ग्रहो ग्रहणं यस्याः सा, यथाविधि परिणीता अभूदिति शेषः।

(२७२) जनस्थानं—दण्डकारण्यमध्यपाती भूखण्डविशेषः; (पक्षे) लोकालयः। कनकमृगेति—कनकमृगः मायामृगः, तद्विषयिणी तृष्णा लिप्सा तदन्वितधिया; (पक्षे) कनकमेव मृगतृष्णा मरीचिका तदनुगतबुद्धिना। अयि वैदेहि! इति वचः। प्रलपितं—वृथा कथितं; (पक्षे) प्रतिपदम्—पदे पदे। उदस्नु—सजलनयनं यथा तथा। प्रलपितं—वृथा कथितं; (पक्षे) वे इति पादपूरणे। देहि इति वचः; अन्यत् सुगमम्। लङ्काभर्तुः—रावणस्य, वदनानां या परिपाटी अनुक्रमस्तस्यां इषुरचना वाणवर्षणं कृता; (पक्षे) कुत्सितो भर्त्ता कामभर्त्ता

अप्रशस्तधनस्वामी तस्य समीपे वदनपरिपाटीषु गुणकथनशृङ्खलासु रचना अलं अत्यर्थं कृता। कुशलवसुता—सीता, कुशलवौ सुतौ यस्याः सा ; (पक्षे) कुशलानि पटूनि योग्यानीत्यर्थः वसूनि धनानि यस्य तस्य भावस्तत्ता। अधिगता—प्राप्ता।

(२७४) विगतकलहः—सति द्वितीये आभरणे कलहः सम्भवेत्, अत्र तु तद्भावात् कलहाभाव इति भावः।

(२७५) शातयति—पातयति। क्षपयति—नाशयति।

(२७६) वाव्वाला:—जघन्यहस्तविशेषाः। कुपिठरजठरे—कुत्सितपाकस्थालीरूपजठरे। गण्डूपदानां—किञ्चुलुकानाम्। कर्पटे—वस्त्रे।

(२७८) सकलं—सर्व्वं पैतृकं धनम्। लयं—नाशम्। तं—दारिद्र्यसहोदरम्। मत्—मत्तः।

(२७९) मानसुता—मानस्य सुता मम आद्यवनिता प्रथमा स्त्री। अपरा वनिता भिक्षा दैन्यस्य कन्या। तातैश्वर्य्यविगर्विता—तातस्य दैन्यस्य ऐश्वर्य्येण प्रभुत्वेन विगर्विता। एतेन दैन्यस्य प्राबल्यं सूचितम्।

(२८१) कृता:—दैन्यदण्डैः रतिशेपः।

(१८६) मत्सरजुषां—खलानाम्। दुर्ग्रहः—दुर्बुद्धिः। कासारे—सर सि।

(२८७) अर्थिजनोपघातम्—याचकजनानां विघ्नम्।

(२८९) आकलय्य—ज्ञात्वा। विरूपाक्षतां—विकटलोचनत्वं विमुखत्वमिति यावत् ; (पक्षे) शिवत्वम्। सङ्गे—संसर्गे समीपागमने इति यावत्। विरोचनत्वं वैलक्षण्यम् ; (पक्षे) सूर्य्यत्वम्। नृसिंहाकृतिं—नराकारसिंहभावं ; (पक्षे) तद्देवत्वम्। वक्रतुण्डरचनं—वक्रेण वक्रभावापन्नेन तुण्डेन मुखेन रचनं वाक्यविन्यासं ; (पक्षे) वक्रेण शनिना कृतं तुण्डस्य मुखस्य रचनं निर्म्माणं तद्रूपं गणपतिभावम्। अपर्णात्मतां—पर्णस्यापि अभावशालिदरिद्रस्वरूपताम् ; (पक्षे) अपर्णा दुर्गा तत्स्वरूपतां शक्तिरूपमिति यावत्।

(२९०) शेषे—अनन्तनागे। भवभराक्रान्ते—ब्रह्माण्डभारनिपीड़िते। श्रिया—लक्ष्म्या। लक्ष्मीवन्तः—लक्ष्मी विशिष्टाः धनिन इत्यर्थः।

(२९१) सरसिरुहरुचां—कमलकान्तीनाम्। अन्तरङ्गैः—आत्मीयैः तत्तुल्यकान्तिमद्भिरित्यर्थः।

(२९२) करीरद्रुमे—वंशाङ्कुरे कण्टकिवृक्षविशेषे वा। खरः—गर्द्दभः अश्वतरी वा।

(२९३) संख्ये—युद्धे। हेलां—अवहेलाम्। गरुत्मन्तं—गरुड़म्। वदन-भृतां—मुखविशिष्टानां जनानाम्।

(२९४) द्व्यादिगुणान्वितः—द्वित्रिचतुरादिभिर्विषयैरन्वितः; पक्षे) द्वित्रि-चतुरादिभिरङ्कैर्गुणितः। लाकृतिः—लृकारस्य आकृतिरिव आकृतिर्यस्याः सा नवम-संख्येत्यर्थः। द्व्यादिसंख्यया नवमसंख्याया गुणे कृते यो राशिर्भवति तस्य योगफलेनापि पुनर्नवमसंख्यैव जायते। यथा २×९=१८; १+८=९। एवं त्र्यादिभिर्गुणेऽपि।

(२९७) सप्रस्वेदः—घर्म्मार्त्तः। पुलकपरुषः—रोमाञ्चान्वितः। संभ्रमी—भ्रमणशीलः भ्रान्तश्च। सप्रकम्पः—कम्पयुक्तः। सान्तर्द्दाहः—दरिद्रस्य अन्नचिन्तया, ज्वरिणः ज्वरप्रकोपात्। प्रशिथिलधृतिः—च्युतधैर्य्यः, उभयोरपि विचारबुद्धेरभावात्। सास्यशोषः—चिन्तया ज्वरप्रकोपेण च शुष्कमुखमध्यः।

(३००) गजघटासंघट्टदुःसञ्चरम्—मदमत्तगजसङ्घसङ्घर्षदुर्गमम्। प्रधनं—युद्धम्। सर्पन्ति—गच्छन्ति।

(३०२). स्वेन समुद्भटेन—स्वरचितेन उद्भटश्लोकेन।

(३०३) न्यक्काराय—धिक्काराय पातयितुः कवेरितिशेषः। एवं परत्र। पापं हि अस्थानोपन्यासजनितमिति बोध्यम्।

(३०४) हारैः—स्रग्भिः। साड़म्बरैः—वैचित्र्यबाहुल्ययुक्तैः। अम्बरैः—वस्त्रैः। निष्पीड़ितो यः पार्वणामृतकरः पूर्णचन्द्रः तस्य स्यन्देन चरता अमृतेन उपमा येषां ते।

(३०५) तर्कुः—"टेको" इति भाषा। स्वपोषणार्थं कृतश्रमो जनः सिद्धिं लभते इति भावः।

(३०७) विद्यावदातं—विद्यया अवदातं शुभ्रं निर्म्मलमित्यर्थः। विष्टप-कष्टहारिणि—भुवनदुःखविमोचके।

(३०८) लेख्यार्थता—लिखितपत्रार्थसमूहं; अत्र जनादित्वात् समूहार्थे त-प्रत्ययः।

(३११) दिविषदः—देवताः। विहायः—आकाशं स्वर्गमित्यर्थः। अर्थिसार्थात्—याचकगणात्।

(३१३) निगमाः—शास्त्राणि। दाम्पत्यसाम्ये गृहाश्रमः प्रशस्तः, तद्वैषम्ये तु निन्द्य इति भावः।

(३१४) ..दः कुबेरः तस्य निवम्। लक्ष्मीकुबेरहिरण्यानां यथाक्रमसम्बन्धात् गोविन्दादीनां सम्मान इत्यर्थः।

(३१७) पृथुपथे—सुविस्तृतपथे स्वर्गगमनपथे इत्यर्थः। संसारेति—संसाररूपं पृथु विस्तृतं भीषणमित्यर्थः मरुस्थलं तस्मिन्। सुरतरुः—कल्पवृक्षः।

(३१९) गुणवतां गुणानां उपादाता गृहीता यावन्न भवति तावत् त्रिभुवन-महार्घाः त्रिषु भुवनेषु महामूल्या अपि गुणवतां गुणाः असत्कल्पाः मन्दाभिप्राया भवन्तीति शेषः। अत्र दृष्टान्तमाह—दैत्यारेर्विष्णोः हृदयवसतेः हृदि धारणात् प्राक् अपि स प्रसिद्धः कौस्तुभमणिः अब्धौ समुद्रे किं नासीत् अपित्वासीदेव। क्वचित् कुत्रापि अस्य मणेः श्रुतिः श्रवणमपि अभूत् उपादातुरभावान्नाभूदेव। गुणपरिचयेन गुणवतां माहात्म्यं आश्रयमूलमेवेति भावः।

(३२०) रत्नाकरः—समुद्रः स्वरत्नैः किं कुरुते आत्मनः किं हितं साधयति न किमपीत्यर्थः। एवं सर्वत्र। श्रीखण्डखण्डैः—चन्दनकाष्ठैः। विभूतिः—सम्पत्।

(३२१) मन्दाध्वक्रमराजहंसनिचयः—अध्वनि पथि क्रमः पादविक्षेपः अध्वक्रमः ; मन्दः अध्वक्रमो यस्य स चासौ राजहंसनिचयश्चेति।

(३२२) व्यलीकानि—अपराधान्। दग्धमन्दिरसारे—वह्निविशेषणमेतत्, दग्धं मन्दिरसारं श्रेष्ठगृहं येन तादृगपराधकारिण्यपि।

(३२३) तदुद्भवः—तस्मात् कुम्भात् उद्भवो यस्य सः अगस्त्य इत्यर्थः।

(३२६) परैः—अन्यैः स्तुतिपाठकैः ; (पक्षे) त्रिचतुरादिभिरङ्कैः। वर्द्धि-तानामपि—उत्कर्षं गमितानामपि ; (पक्षे) गुणितानामपि। लृकृतिः—लृकारस्य आकृतिरिव आकृतिर्यस्याः सा, नवसंख्येत्यर्थः। द्व्यादिसंख्यया नवसंख्याया गुणे कृते यो राशिर्भवति तस्य सङ्कलनेनापि पुनर्नवसंख्यैव जायते। यथा २×९=१८ ; १+८ =९। एवं त्र्यादिभिर्गुणेऽपि।

(३२७) मौखर्य्यं—वाचालता। मौनं—तूष्णीम्भावः।

(३२८) विहगखलः—विहगेषु खलः। "पक्षिधूर्तश्च वायस" इत्युक्तेः।

प्रतिपलं—प्रतिक्षणम्। विलोल:—चञ्चल:। काकोल:—द्रोणकाक: (दाँड़काक इति प्रसिद्ध:)। कीर—हे शुक।

(३२९) कामदुघा धेनु:—अभीष्टदायिनी गवी। तृतीयं नेत्रं—विद्याया: सूक्ष्मदर्शन-साधनत्वात्। सत्कारायतनं—समादरभूमि:।

(३३१) सद्वंशजातं—उत्कृष्टवेणुरचितं; (पक्षे) सत्कुलसम्भूतञ्च। गुण-कोटिनम्रं—गुणेन मौर्व्या कोट्यो: कोटिद्वये नम्रं; (पक्षे) बहुगुणैरवनतस्वभावम्। असव्ये—दक्षिणे। सत्पक्षयोगात्—सद्भ्यां वर्त्तमानाभ्यां पक्षाभ्यां पार्श्वद्वयनिहिताभ्यां पक्षिपक्षाभ्यां सह योगात्; (पक्षे) सता साधुना पक्षेण सहायेन सह सम्बन्धात्। उक्तञ्च "कीटोऽपि सुमन:सङ्गादारोहति सतां शिर" इति।

(३३२) सपक्ष:—पक्षाभ्यां सह वर्त्तमान:; (पक्षे) सहाययुक्त:। स हि पक्षहीन:—हि यत: स सिंह: पक्षहीन: पक्षशून्य: असहाय इत्यर्थ:।

(३३३) धीरं—सुविचारपुर:सरं; (पक्षे) मन्दं मन्दम्। पदम्—सुप्तिङन्तादि पदम्; (पक्षे) चरणम्। शब्दं समुहीक्षते—शब्दोऽयं शुद्ध: अशुद्धो वा इति विचारयति; (पक्षे) कुत्र क: शब्दो जायते इति शृणोति। नानार्थाहरणम्—श्लिष्टपद-प्रयोगेण विविधार्थसंग्रहम्; (पक्षे) स्वर्णरौप्याद्यपहरणम्। अलङ्कारम्—उपमादि-विविधालङ्कारम्; (पक्षे) कङ्कणादिभूषणम्। सुवर्णनिचयम्—सुश्राव्यवर्णसमूहम्; (पक्षे) स्वर्णसमूहम्। रसान्तर्गतम्—शृङ्गारादिरसमिश्रं वाक्यम्; (पक्षे) रसाया: पृथिव्या: अन्तर्गतं अभ्यन्तरस्थं लुक्कायितं धनम्। दोषान्वेषणतत्पर:—दोषाणां दु:श्रवत्वादीनां काव्यस्येति शेष: अन्वेषणे तत्पर: मनोयोगी; (पक्षे) दोषा रात्रि: तस्या अन्वेषणे तत्पर:।

(३३५) कविताकान्ता स्वयंवरेति शेष:। व्याकरणञ्च पितरं नैव एति कविताया व्याकरणज्ञानजनकत्वात् तस्य तस्या: पितृत्वम्। छान्दसात्—वेदाध्यायिनो जनात्।

(३३६) वज्रो मणि:—हीरकम्। करटारवा:—करटानां काकानां आरवा: शब्दा:।

(३३७) चन्दनशब्दस्य क्लीवत्वे चन्दनकाष्ठार्थप्रतीति:।

(३३८) कुम्भसम्भव:—कुम्भजातोऽगस्त्यमुनि:।

(३३९) पात्रम्—दीपाधारम् ; (पक्षे) परिवारवर्गम् । मलं—पापं ; (.पक्षे) सुगमम् । स्नेहं—तैलं ; (पक्षे) सुगमम् । गुणान्—दीपवर्त्तिकाः ; (पक्षे) विनयादीन् । चिणोति—नाशयति । द्रव्यावसानसमये—तैलाद्यभावे ; (पक्षे) खाद्यपरिधेयाद्यभावे । कुलसद्मनि—वंशरूपगृहे । कोऽपि—अनिर्व्वचनीयः, साधारणदीपादितर इत्यर्थः ।

(३४०) भास्वति—सूर्य्ये । शनैश्चरः—सूर्य्यसुतः । विधौ—अस्तं गते इति शेषः । बुधः—सौम्यः ।

(३४१) अवंशभवाः—वेणुभिन्नवस्तुनिर्म्मिताः ; (पक्षे) नीचकुलोत्पन्नाः । गुणेन मौर्व्या नैपुण्यादिगुणेन च प्रयुक्ताः प्रेरिताः सन्तः परमर्म्मभेदिनः परेषां मर्म्मस्थान-विदारकाः भवन्ति । ये च विशुद्धवंशजा उत्कृष्टवेणुनिर्म्मिताः उत्कृष्टकुलोत्पन्नाश्च ते तथाविधाः गुणप्रयुक्ताः चापा इव नम्रतां व्रजन्ति । वंशस्य गुणदोषा हि पुंसां सदसत्प्रवृत्तिं जनयन्तीति भावः ।

(३४२) चुलुकीकरोति—गण्डूषीकरोति नाशयतीत्यर्थः । किञ्च—अन्यच्च ।

(३४४) पूर्व्वार्द्धेन वकस्य गुणाधिक्यं दर्शयति । उभौ पक्षौ शुक्लौ शुभ्रौ वकस्येति यावत् ; परं चन्द्रस्य एकपक्ष एव शुक्लः । विशति—आकाशे । अव्याहतगतिः—वक इति शेषः ; चन्द्रस्तु केवलाकाशे । वकः सदा मीनं भुङ्क्ते खादति ; चन्द्रस्तु मासमेकं मीनराशिं भजते । वकः सकलस्थाणुशिरसि समस्तशाखापत्रशून्यवृक्षोपरि वसति ; चन्द्रस्तु एकस्य स्थाणोः शिवस्य शिरसि वसति ; कश्चित् एभ्यः पृथक् कोऽपि अधिकः गुणः चन्द्रेऽस्तीति शेषः । स क इत्याह गुणा इति । स्थाने योग्याधिकरणे मान्याः पूज्याः ; स्थानरहिता अयोग्यस्थाने निहिताश्चेत् नहि, न तादृक् मान्या भवन्तीति फलितार्थः । स्थानोत्कर्षेणैव गुणानामुत्कर्ष इति भावः ।

(३४५) वक्षःस्थलीति—हरेर्वक्षःस्थली, विधेर्वदनं, हरस्य वामशरीरभागः तैः । पुरुषास्त्रयः—हरिविधिहराः ।

(३४६) समुद्रं प्रति रावणस्य तिरस्कारोक्तिरियम् । रावणेन दशमुखैः अम्बुधि-शब्दादय उच्चारिताः ।

(३४८) वागुरिक—व्याध । सीदन्ति—दुःखमनुभवन्ति । शष्पकवलग्रहणानभिज्ञाः नवकोमलतृणान्यपि भक्षयितुमक्षमाः ।

(३५४) कौरवपाण्डववार्थीयान् सम्बोध्य दुःशासनं प्रति भीमस्य क्रोधोक्तिरियम्। वः—युष्माकम्। तम्—दुःशासनम्।

(३५७) वोढ़ा—वहनशीलः। धनपतिसखम्—कुवेरमित्रं शिवमित्यर्थः।

(३६०) (क) वाजिमखस्य—अश्वमेधयज्ञस्य।

(ख) षुञ् ऐश्वर्य्यप्रसवयोरित्यदादिगणीयस्य सु-धातो रूपम्। "प्रसौति विजयं धर्म्म" इति हलायुधः।

(३६१) तत्तातः—तस्याः भुक्तेः तातः पिता। दौत्यं—दूतकार्य्यं, विवाहकार्य्ये घटकत्वमिति यावत्। भक्तो—हे भक्तो। परिहसनविधौ—कौतुकच्छलेन।

(३६२) स्वःसिन्धुतीरे—स्वर्गगङ्गातटे, मन्दाकिनीतीरे इत्यर्थः। अघविघातवीरे—अघानां पापानां विघाते विनाशविषये वीरे वीरसदृशे। चीरे—अजिने। अधीरे—नश्वरे।

(३६४) समाप्य—उपभुज्य। विषयान्—भोग्यवस्तूनि। कल्लोलः—तरङ्गः।

(३६६) (क) श्लोकः—९१११ अङ्कस्य वामगत्या ११११९ शकाब्दाः।

(ख) श्लोकः—२१११ अङ्कस्य वामगत्या १११२ शकाब्दाः।

(३६७) धरेति—भूदेवराजस्य वारेन्द्रवंशीयस्य रामकान्तनृपस्य। भामिनी—सहधर्म्मिणी। श्रीभवानी—श्रीमती राज्ञी भवानी।

(३६८) गङ्गावासे—नवद्वीपाद्दूरपूर्व्वदेशवर्त्तिनि प्राक्तनगङ्गातीरस्थायिनि ग्रामविशेषे। विधिश्रुतिः=चतुर्म्मुखवर्णः=८; सुकृतं=पुण्यं=९; क्षौणिपालः=राजा=१६। अतएव अङ्कस्य वामगत्या १६९८ शकाब्दाः उन्नवन्ति।

(३६९) पाणिग्रहः—विवाहः; (पक्षे) पाणौ हस्ते धारणम्। सुवंशोद्भवा—उच्चकुलजाता; (पक्षे) उत्तमवेणूत्पन्ना।

(३७०) येन विष्णुना रामेणेत्यर्थः; अयो लौहं लक्षणया तन्निर्म्मितमस्त्रमित्यर्थः; धृत्वा रावणः दायः खण्डितः हत इत्यर्थः। दो-धातोः कर्म्मणि घञ्।

स रामरूपो विष्णुर्वो युष्मान् अव्यात् पायात्। रावणं विशिनष्टि—करणोरणः, करणे कार्य्ये युद्धकर्म्मणीति यावत् उरणः मेष इव तद्वत् विपक्षमपराभूय कथमपि रणान्न निवर्त्तते इति भावः। यद्वा करणे इन्द्रिये तदुपभोगे उरण इव पशुस्वभाव इति यावत्,

परदारापहारकलादिति भावः। रणरणः—रणे युद्धे रणति स्पर्द्धया सिंहनादं करोति यस्तादृशः। रावः—राति ददातीति कर्त्तरि अनः, दातेत्यर्थः। अरणः—न विद्यते रणो युद्धं यस्य तादृशः, रामेण सह युद्धात् प्राक् दिग्विजयित्वान्निवृत्तयुद्ध इत्यर्थः। अत्—अत्ति भक्षयति मानुषानिति शेषः, नरमांसभक्षकः। अभीः—अविद्यमाना भीर्भयं यस्य सः। अधुना रामं विशिनष्टि। अत्र यस्येति पदमध्याहार्य्यम्। यस्य रामस्य रामा पत्नी सीतेति यावत् रम् अग्निं आर आत्मशुद्धये वह्निं प्रविवेश। सीता कीदृशी-त्याह या सीता मारं कन्दर्पं प्रत्यपि अरमा अनभिलाषा पतिव्रतेत्यर्थः। या च रमा-सारमा—रमाया लक्ष्म्याः सारं तेजः माति परिमितं करोति, स्वरूपतो लक्ष्मीरित्यर्थः। रामः स्वयं कीदृशः श्रीमानदयोदयः—श्रीः सम्पत् मानश्चित्तसमुन्नतिः दया परदुःख-प्रहरणेच्छा आसां उदयो यस्मात् सः, यमाराध्य सर्व्वे ऐश्वर्य्यं सम्मानं तदनुग्रहञ्च लभन्ते इत्यर्थः। पुनः कीदृशः दयदयः—दये दाने दया यस्य सः, यो हि पात्रेभ्यः सदयं ददाति नत्वसन्तोषमित्यर्थः। अपिच वेदयः—वेदयतीति णिजन्त-विद-धातोः कृदन्तरूपं, मानवदेहमाश्रित्य स्वकर्म्मभिः परेभ्यो ज्ञानप्रद इत्यर्थः। किञ्च जिष्णुः—जयशीलः। पुनः कीदृशः अभीरभीरभरभीराभीः—न भीरभीः अभयमित्यर्थः अभियं राति ददातीति अभीरो वायुर्जगत्प्राणत्वात्, अभीराय वायवे भियं राति ददातीति अभीरभीरः सर्पः पवनाशनत्वात्, तस्य भरो धारणं तेन भियं राति यः भयप्रदः, अभीरभीरभरभीरो गरुड़ः तस्मात् अभीः अभयं यस्य तादृशः विष्णुरिति फलितार्थः गरुड़वाहनत्वादस्येति। पुनः कथम्भूतः अभीसौः—न विद्यते भीर्भयं देवेभ्य इति शेषः यस्य स इन्द्रजित् तं स्यति हिनस्तीति अभीसो लक्ष्मणः तं अवति रक्षति अभीसौः।

(३७१) इष्टं—अभिलषितं अङ्कम्। कार्त्तिकदर्शनेन—१२ अङ्केन। रुद्रेण—११ अङ्केन। ब्रह्मास्यप्रहतं—४ अङ्केन गुणितम्। जलाधिपतिना यच्छेषितं—वरुणेन २४ अङ्केन इत्यर्थः भक्तं सत् यत् अवशिष्टम्। वेदाङ्गेन हतं—६ अङ्केन गुणितम्। एवंप्रकारेण १२० संख्या उद्भवति।

(३७२) इष्टं—अभिलषितं अङ्कम्। खाग्नेति—००० युक्तम्। खखयमेति—२०० राशिना व्यवकलितम्। खखेशेति—११०० अङ्केन युक्तम्। खाकाशेति—५०० राशिना भक्तम्। यच्छेषितम्—यत् शेषितं भागावशिष्टं, तत् द्विगुणितं ;, पुनश्च

इन्द्रहतं २ अङ्केन गुणितं ; ४ अङ्केन गुणितमित्यर्थः । खाकाशाग्नीति—३०० अङ्केन युक्तम् । शशियुतम्—(पुनश्च) १ अङ्केन संयुक्तम् । एवंप्रकारेण १९०१ खृष्टीयाब्दाः भवन्ति ।

(३७३) इष्टं—अभिलषितं अङ्कं । वाणगुणम्—५ द्वारा गुणितम् । सुखेन हितम्—४ युक्तम् । खाङ्काहतम्—९० गुणितम् । तत् तष्टम्—तत् शरभूधरैः ७५ द्वारा तष्टं भक्तं ; तत्र यत् अवशिष्टं तत् पक्षेण २ द्वारा गुणितञ्च । संवत्सरम्—व्याप्य इत्यर्थः । अर्थात् १२० वत्सरं व्याप्य जीवत ।

अथवा इष्टं—अभिलषितमङ्कम् । नागहतं—८ द्वारा गुणितम् । युतं शशभृता—एकेन सह युक्तम् । निघ्नं शरघ्नैः शिवैः—५५ द्वारा गुणितम् । व्योमयुगैः तष्टं—४० द्वारा भक्तञ्च यत् अवशिष्टं तत् । गजेन—८ द्वारा । अर्थात् १२० वत्सरं व्याप्य जीवत ।

(३७४) स कश्चिद्द गुणग्राही जनो रत्ने कस्मिंश्चिद्द गुणवति जने रेमे ननन्द "जातौ जातौ यदुत्कृष्टं तद्द रत्नमिति कथ्यते" । स कीदृशः ? न मोदन्ते प्रमोदं न यान्तीत्यमुन्दि अक्षाणीन्द्रियाणि यस्य सोऽमुदक्षो जितेन्द्रियः । तथा बलदममयदः शत्रुप्रशमनीतिदाता । तथा सेवायां परप्रणतौ सर्गः उत्साहस्तस्मात् उदस्तो निवृत्तः स्वाधीन इत्यर्थः । रत्ने कीदृशे ? वेदानापन्नो वेदापन्नस्तत्र अधीतवेदे इत्यर्थः । तथा वक्रे प्रियंवदे । तथा रचितः कृतो निजाया रुजो रागद्वेषात्मिकाया वाधाया उच्छेदे उन्मूलने यत्नो येन तस्मिन् रचितनिजरुगुच्छेदयत्ने । तथा न रमन्ते सुजनेषु धर्म्मे वा ये ते अरमा दुर्ज्जनास्तानीरयति दूरीकरोति यस्तस्मिन् अरमेरे दुर्ज्जनदूरीकारके इत्यर्थः । तथा देवेषु आसक्तो देवासक्तस्तस्मिन् देवासक्ते देवपूजानिरते इत्यर्थः । तथा तोदस्य व्यथाया दुर्गाः दुर्गमाः परानभिभूतास्तानप्यस्यन्ति क्षिपन्तीति तोददुर्गासास्तेषां वासे निकेतने ; शूराणामपि शूरा यमाश्रिताः तस्मिन् इत्यर्थः । तथा दयनं दानं रक्षा वा, तेन यो मदलवो गर्व्वकणिका तेन यः क्षोदः परिवेदना तेन मुक्ते रहिते, प्रियं कृत्वापि अगर्व्वित इत्यर्थः । तथा वादेन सह वर्त्तते सवादस्तस्मिन् प्रमाणशास्त्रज्ञे इत्यर्थः । तथा अयन् अगच्छन् अच्छो निर्म्मलता यस्मात् तस्मिन् अयदच्छे शुद्धिमति इत्यर्थः । तथा गुरुभिः यस्मिन् क्लेशः श्रमस्तेनैव सन्ने श्रान्ते अथवा सन्ने

आसक्तो। तथा अपदान् पदभ्रष्टान् अवतीति अपदावः, यद्वा अपगतो दावः उपतापो यस्मात् तस्मिन्निति।

(३७५) कः कर्णारिपिता: ?—कर्णस्यारेरर्ज्जुनस्य पिता "वासवः"। किमिच्छति जनः ?—"हरत्वम्"। किं स्वीकृतं विष्णुना ?—"कृष्णत्वम्"। को जानाति परेङ्गितम् ?—"मतिमान्"। विषमगुः क्वास्ति वा कामिनाम् ?—"मनसि"। सीता कस्य वधूः ?—"रामस्य"। प्रियः किमु हरेः ? —"कौस्तुभः"। वर्ज्यः कफे को नृणाम् ?—"अभ्यङ्गः"। इति अष्ट प्रत्युत्तराणां मध्यमाक्षरसंयोगेन "सरस्वति नमस्तुभ्यम्" इति महामन्त्रः प्राप्तः।

(३७७) सन्धिमहोत्सवे—सन्धिपूजाकाले। सौहित्येन—पर्य्याप्तभोजनेन।

(३७८) शीतगुः—चन्द्रः। आतपवरचना—छत्रधारणम्। दस्रौ—अश्विनी-कुमारौ।

(३७९) भाद्रमासस्य शुक्लचतुर्थ्यां कृष्णचतुर्थ्यांच्च तिथौ नष्टचन्द्रत्वात् चन्द्रदर्शन-निषेधः। "पञ्चाननगते भानौ पक्षयोरुभयोरपि। चतुर्थ्यामुदितश्चन्द्रो नेक्षितव्यः कदाचन॥"

(३८०) ब्राह्मणस्य—हे ब्राह्मण त्वं स्य खण्डय (सो + लोट् + हि)।

(३८२) स्वकण्ठमापीड्य—रज्ज्वा इति शेषः। हठं निपत्य—एतादृशः कुम्भस्य कूपपतनस्वभावः। उपनीय—गृहीत्वा। अवति—रक्षति। सतां—साधूनाम्।

(३८७) पविं—वज्रम्। यवसवत्—तृणवत्। दवं—वनाग्निम्। शिला-शकलवत्—प्रस्तरखण्डवत्।

(३८८) तमःस्तोमः—अन्धकारसमूहः। शलभः—पतङ्गः।

(३८९) प्रकृतिलघौ—प्रकृत्या स्वभावेन लघौ तुच्छे। शुचौ—पवित्रे। तरक्षुः—बड़िशसूववक्षः फातृनेति प्रसिद्धः।

(३९१) पण्डिते गोरसः वाक्यरसः। स्त्रीजने गोरसः चक्षूरसः दृष्टिरसो वा, दर्शनमाधुर्य्यमिति यावत्। भोजने गोरसः धेनुरसः दुग्धमित्यर्थः।

"दिग्दृष्टिदीधितिस्वर्गवज्रवाग्बाणवारिषु।
भूमौ पशौ च गोशब्दो विद्वद्भिर्दशसु स्मृतः॥"—हलायुधः।

(३९४) पनसः पुष्पमप्रदश्यैव फलं प्रसूते तथोत्तमजनोऽपि वाचमकृत्वैव कार्य्यं करोति । अतस्तत्सादृश्यमुत्तमस्य । आम्रः पुष्पं फलञ्च प्रकटीकरोति, तथा मध्यमोऽपि जनः प्रथमं वाक् परं कर्म्म इत्येवं करोति । अतस्तत्सादृश्यं । कुन्दस्तु केवलं पुष्पमेव ददाति, तथा अधमोऽपि केवलं वाक्परायणः नतु कर्म्मतत्परः । अतः कुन्दसादृश्यमधमस्य । पुष्पफलमित्यत्र जातिरप्राणिनाम् (पा—२।४।६) इति द्वन्द्वैकवद्भावः । वाक्-कर्म्मत्यत्र सर्व्वो हि द्वन्द्वो विभाषया एकवद्भवतीति न्यायाद् द्वन्द्वैकवद्भावः । वागपि इत्यत्र अपि शब्दः अवधारणार्थः वागेव वाङ्मात्रमिति यावत्, न तु कर्म्मत्यभिप्रायः ।

(४००) हेमकार—स्वर्णकार । सुवर्णगुणातिरेकः—सुन्दरवर्णगुणातिशयः ।

तृतीय-प्रवाहः समाप्तः ।

शेषोक्तिः ।

(१)

जानाति यत्र विष्णुः स्वयमुपयमने कन्यका लोकमाता
विश्वामित्रश्च दूतो निखिलगुणनिधिर्यागकर्त्ता वशिष्ठः ।
राजर्षिः सम्प्रदाता नरवरजनकस्ते ग्रहाः सुप्रसन्ना
दैवं तन्नौमि यस्याकरुणविधिवशात् सौख्यलेशो न तत्र ॥

(२-३)

जनकः कृष्णचन्द्रो मे जननी विन्ध्यवासिनी ।
पितामहो रामचन्द्रः सार्थकः प्रपितामहः ॥
शोभाराम इति ख्यातो मद्वृद्धप्रपितामहः ।
देवताभक्तिसम्पन्ना इमे मे पूर्व्वपूरुषाः ॥

(४)

श्रीपूर्णचन्द्रकविभूषणकाव्यरत्नौ
सौरे शुचौ व्यतनुतोद्भटसागराख्यः ।
ग्रन्थं गुरोरतुलमुद्भटसागराख्यं
मेवे दिने ग्रहगुणेभशशाङ्कशाके ॥

(५)

संसारेऽछिन्नसारे कलिकलुषहरे सुन्दरे सौधनीरे
सर्व्वस्थानैकसारे सकलसुखकरे जाह्नवीपुण्यतीरे ।
यस्यां भूतालिपाली निवसति नितरां लिङ्गशाली कपाली
हुग्लीजेलान्तरे सा मम सुजननभू "भद्रकाली" सुखालिः ॥

सम्पूर्णोऽयं ग्रन्थः ।

उद्भट-सागरः ।

तृतीय-प्रवाहः ।

शुद्धि-पत्रम् ।

अशुद्धिः	पृष्ठम्	पङ्क्तिः	शुद्धिः
गुणगणैस्तस्मै नमो ब्रह्मणे	१	१५	गुणगणैः कस्मैचिदस्मै नमः
वामे	८	१४	वामे
विच्छेद	८	२१	विच्छेदः
कथयस्व कथाः	१०	१८	कथय स्वकथाः
खमत	१२	१७	स्वमत
वंशीरवो	१३	४	वंशीरवो
सुन्मूलितं	१५	२०	सुन्मूलितं
सुधांशु-	१६	४	सुधांशु-
कस्मैचिदस्य नमः	१६	७	कस्मैचिदस्मै नमः
द्रौपद्या	१७	१६	द्रौपद्या
प्रेमोच्छ्वासेन	२१	१५	प्रेमोच्छ्वासेन
गिरीशे	२३	१३	गिरीशि
त्वयापि	२४	८	त्वयेदम्
वहुमुख	२४	२१	वहुमुख
गङ्गाः	२५	१	गङ्गा
गङ्गाः	२५	२	गङ्गा
द्वादशाधिकशतवर्षस्य	२५	१६	द्वादशाधिकशतवर्षवयस्कस्य
शवशिरो	२७	४	शिवशिरो
विहाय	२७	४	विहाय
मूर्द्धलालिता	२७	५	मूर्द्धलिता

अशुद्धिः	पृष्ठम्	पङ्क्तिः	शुद्धिः
स्तद्दैववलीन	२७	२१	स्तद् दैव[illegible]
शभ्वत्तमाङ्गे	२८	१२	शभ्भूत्तमाङ्ग
खर्म्माम्भो	२९	१३	घर्म्माम्भो
+ + +	२९	१७	मूर्त्ति-समष्टिः।
+ + +	३१	१६	हरगौरी-मूर्त्तिः।
क्ते ति	३२	१५	केति
यद्दुनाथ	३३	९	यदुनाथ
दोह्निनी	३५	११	दोहनी
प्रयाह्युपवनं	३५	१४	प्रयाहि विपिनं
कपालकामिनि	३७	१७	कपालिकामिनि
प्रोद्यत्मारज	३८	१२	प्रोद्यन्मारज
लघिष्ठे दं	३८	२०	लंघिष्ठे दं
कश्चिद्द	४२	११	कश्चित्
रुष्ठे न	४३	६	रुष्टे न
निदानं	४३	११	निधानं
पुरोह्नितस्य	४४	१४	पुरोतिहस्य
नवनीतपुञ्ज	४५	५	नवनीतपुञ्ज
निम्ब नां	४७	११	निम्बू नां
अथैकदा स्वस्य	५०	२	अथैकदा स स्वस्य
प्रस्फूर्ज्ज द्व	५१	१४	प्रस्फुर्ज्ज द्व
कश्वित्	६२	१४	कश्चिद्द
स्तीति	६२	१४	स्तीति
काक्षः	६३	१२	काक
विधात्वकलिपिर्व्यर्थीकृता येन हि	६५	७	विधातृलिखितं व्यर्थीकृतं येन
दूरीकृता	६७	१३	दूंरीकृता